अत एव हव्य का अर्थ होतव्य अग्नि में होमने योग्य वस्तु ह कव्य का अर्थ अन्न है जो अग्नि में पक्तव्य है। क्रव्य का मांस या शव अर्थ हुआ। अब इस बात को समन्वय के साथ रखते हैं। 'देवयट्, आमाद्, क्रव्याद्' ये तीनों एक जगह ही पूर्वोक्त (यजुः १।१७) मन्त्र में आये हैं। इसी मन्त्र पर शतपथ में व्याख्या है कि **"अयं वाऽआमाद् येनेदं मनुष्याः पक्त्वाऽश्नन्त्यथ येन पुरुषं दहन्ति स क्रव्याद् यो देवयट् तस्मिन् हवींषि श्रपयाम तस्मिन् यज्ञं तनवामहै"** (श० १ । २ । १ । ४)

अर्थ—जिस अग्नि से मनुष्य भोजन पका कर खाते हैं उस भोजन पकाने वाली अग्नि का नाम आमाद् हुआ और जिस अग्नि से पुरुष यानि शव को जलाते हैं वह शव दहनाग्नि क्रव्याद् कहलाती है। एवं देवयट् अग्नि वह है जिसमें हव्य वस्तुओं को डालते हुए यज्ञ करते हैं। इसी देवयट् को शतपथ में आगे चलकर 'हव्यवाहन' और 'हव्यवाट्' नाम भी दिया है "एष हि हव्यवाड् यदग्नि······जुहुत च यजत च······एष हि हव्यवाहनो यदग्निः" (श० १ । ४ । ३ । ३६)

महीधर ने भी उक्त देवयट् अग्नि को हवन करने की अग्नि,आमाद् अग्नि को भोजन पकाने वाली पाकाग्नि और क्रव्याद् अग्नि को शव दहन करने वाली चिताग्नि मानी है। यजुः १ । १७ पर उसके निम्न वचन हैं—

"एक आमात् आममपक्वमत्तीत्यामाल्लौकिको अग्निः। द्वितीयः क्रव्यात् शवदाहे क्रव्यं मांसमत्तीति क्रव्यात् चिताग्निः। तृतीयो यागयोग्यः" (यजुः० १ । १७)

इस प्रकार महीधर के शब्दों में देवयट् यागाग्नि, आमाद् लौकिकाग्नि, क्रव्याद् चिताग्नि है। एडकोपनिषद् में भी इस देवयट् यागाग्नि अर्थात् शथपथा-

नुसार हवि डालने योग्य या यज्ञ करने योग्य अग्नि को हव्यवाहन नाम से कहा है "यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत्" (मुण्डक० १।२।२) इस लिये 'देवयट्, हव्यवाहन, हव्यवाट्' यागाग्नि अर्थात् जिसमें होतव्य वस्तुओं का हवन किया जावे उसको कहते हैं। तीनों शब्द एकार्थक हैं। अब 'हव्य' शब्द का अर्थ भी स्पष्ट हो गया। अग्नि में यज्ञ करने के लिये जो होतव्य ओषधि आदि वस्तु डाली जाती है उसको हव्य कहते हैं। निरुक्त में हव्य का यही अर्थ दिया है "हव्या हवींषि" (निरु० ८।७) जिस प्रकार शवरूप मांस क्रव्य को खाने से शवदहन या चिताग्नि को क्रव्याद् और खाद्य अपक्व आम वस्तु को खाने से पाकाग्नि को आमाद् नाम दिया है। एवं देवयट्, हव्यवाहन, हव्यवाट् अग्नि को हव्य खाने से हव्याद् नाम दिया जा सकता है। ऋग्वेद में इसका यह नाम दिया भी है—"अवीन्नो अग्निर्हव्यात्" (ऋ० । ७ । ३४ । १४)

हव्यवाहन और हव्य का निर्णय हो जाने के अनन्तर कव्यवाहन और कव्य का भी समन्वय दृष्टि से निर्णय करते हैं। शतपथ की प्रतिज्ञानुसार 'देवयट्, आमाद्, क्रव्याद् ये तीन अग्नियां हैं। तैत्तिरीय संहिता की प्रतिज्ञा 'हव्यवाहन, कव्यवाहन, सहरक्षाः' इन तीन के लिये है। अभिप्राय एक ही है केवल नामान्तर है। जिस प्रकार इस क्रम में देवयट् और हव्यवाहन यागाग्नि के नाम हैं उसी प्रकार द्वितीय क्रम में आमाद् और कव्यवाहन भोजन बनाने वाली पाकाग्नि के नाम हैं। आमाद् के लिये तो शतपथ में स्पष्ट परिचय दिया ही है। कव्य या कव्यवाहन के सम्बन्ध में निरुक्त में तो कुछ नहीं लिखा। ब्राह्मणों ने भी इस पर कुछ प्रकाश नहीं डाला। महर्षि मनु ने कव्य शब्द का प्रयोग किया है। जो अर्थ कव्य का हमने ऊपर प्रदर्शित अर्थात् पाकाग्नि में जो पक्तव्य-अन्न भोजन किया है उसी अर्थ में मनु का प्रयोग है—

"दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् ।
तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ॥"
" सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते ।
एकस्तान् मन्त्रवित्प्रीतः सर्वानर्हति धर्मतः ॥" मनुः ३ । १३०, १३१ ॥

इन श्लोकों में कव्य को खाने की चर्चा है। अतः कव्य का अर्थ अन्नादि भोजन है यह स्पष्ट हो गया। अत एव कव्यवाहन का अर्थ भी भोजन पाकाग्नि है।

अब तृतीय अग्नि 'क्रव्याद्' और 'सहरक्षाः' ये भी एकार्थ हैं। शतपथ के क्रम में तृतीय अग्नि क्रव्याद् शवदहनाग्नि के लिये प्रयुक्त हुआ है। एवं तैत्तिरीय

संहिता के प्रथम और द्वितीय इन दो अग्नियों का एकार्थ दर्शा चुके हैं एवं उसी क्रम में क्रव्याद् और सहरक्षाः शब्द भी एकार्थक शवदहनाग्नि के अर्थ में समझने चाहियें। रक्षोभिः सह सहरक्षाः। रोगोत्पादक जन्तु जो कि बाहर से या शरीर के अन्दर खून पीने वाले कृमि हैं उनको रक्षः शब्द से यहां लिया गया है। निरुक्त में रक्षः का अर्थ यह है—"रक्षो रक्षितव्योऽस्मात्। रहसि क्षिणोतीति वा रात्रौ नक्षत इति वा" (निरु० ४। १८) जिस से अपनी रक्षा करनी चाहिये या जो छिप कर गुप्त हुआ अन्दर घुस कर किन्हीं धातु आदि को नष्ट करता हो या जो रात्रि में अपना कार्य करता हो वह रक्षः है। उक्त तीनों निर्वचनों में पहले दो निर्वचन रोगोत्पादक जन्तुओं में घटते हैं क्योंकि उनसे हरएक अपनी रक्षा करना चाहता है और वे शरीर के अन्दर घुस कर हानि पहुँचाते हैं। "असृग्भाजनानि ह वै रक्षांसि" (कौ० १०। ४) रक्षः खून के पीने वाले होते हैं यह भाव उक्त रोग जन्तुओं में पाया जाता है। तथा इनका शमन औषधों द्वारा किया जाता है "रक्षोघ्नानि विषघ्नानि यानि धार्याणि भूभुजा। अगदानि समाचक्ष्व तानि धर्मभृतां वर॥" विषनाषक और रक्षोनाशक ओषधियों के वर्णन तथा सहयोग से रक्षः का अर्थ रोगोत्पादक जन्तुओं का ही है। तथा आयुर्वेद में वायविडङ्ग ओषधि को कृमिघ्नी और रक्षोघ्नी नामों से कही है। यह बात सुप्रसिद्ध है कि मरणानन्तर से ही शव के अन्दर रोगजन्तु उत्पन्न होने लगते हैं। शवदहनाग्नि का उन रोग जन्तुओं के साथ सहयोग हो जाने से 'रक्षोभिः सह=सहरक्षाः' नाम हो जाता है। रोग जन्तुओं से युक्त शव का दहन करना आवश्यक है क्योंकि अग्नि उन रोग जन्तुओं को नष्ट कर देती है। "अग्निर्वै रक्षसामपहन्ता" (कौ० ८। ४। १०। ३)

इस प्रकार समन्वय से क्रव्याद् और सहरक्षाः अग्नि, शवदहनाग्नि या चिताग्नि का नाम तथा क्रव्य शब्द का शव या मांस अर्थ हुआ।

(प्रश्न) जब आपने तैत्तिरीय संहिता में आई हुई 'हव्यवाहन, कव्यवाहन, सहरक्षाः' इन तीनों अग्नियों का स्वीकार किया तो फिर उसी वचन में कहे हुए "हव्यवाहनो देवानां कव्यवाहनः पितॄणां सहरक्षा असुराणम्" (तै० सं० २। ५। ८। ६) सिद्धान्त का भी स्वीकार करना चाहिये।

(उत्तर) हम ने तैत्तिरीय संहिता का वचन दिया अवश्य है परन्तु हव्य, कव्य, क्रव्य शब्दों के अर्थ निर्णय के लिये समन्वय दृष्टि से रखा है। यह तैत्तरीय संहितामें कहा हुआ त्रिक वेद में नहीं आता किन्तु पृथक् २ भी हव्यवाहन और कव्यवाहन शब्द ही आते हैं 'सहरक्षाः' शब्द चारों वेदों में कहीं अकेला भी नहीं आया।

फिर इसकी व्यवस्था पर विचार का अवसर ही नहीं रहता केवल 'देवयद्, आमाद्, क्रव्याद्' यह त्रिक ही आता है। इसकी व्याख्या शतपथ के अनुसार हमने कर ही दी है। और उक्त हव्यवाहन, कव्यवाहन, सहरक्षाः का समन्वय भी दर्शा दिया है। यदि तैत्तिरीय के वचन पर भी विचार करना है तो इस प्रकार किया जा सकता है कि शतपथ के अन्दर जो विचार तीन अग्नियों के सम्बन्ध में है वह सामष्टिक या भौतिक अग्नि के रूप में है और तैत्तिरीय संहिता में वर्णन प्राण्यन्तर्गत व्यष्टि रूप आहार-वाहक अग्नियों का है। अर्थात् आयुर्वेद की दृष्टि से तीन प्रकार का आहार ' कहलाता है। एक फलाहार जिसमें फल, फूल, पर्ण, कन्द, मूल, रस, दूध, घी आदि जो सात्विक, लघु, बुद्धि-शान्ति आदि दैव (ब्राह्म) गुणों के वर्धक हों, दूसरे अन्नाहार जिसमें विविध अन्न, दाल, शाक, व्यञ्जन, दूध, घी और फलादि जो सात्विक तथा राजसिक, लघु, गरिष्ठ, बुद्धि-बल-पराक्रम आदि पित्र्य (जातिदेशप्रजापालन) शक्ति के वर्धक हों। तीसरे मांसाहार जिसमें मांस, चर्बी, खून तथा अन्नादि जो राजसिक और तामसिक, गरिष्ठ, कठोर, क्रोध-द्वेष-हिंसकबल-चाञ्चल्य-क्रूरता आदि असुर (परपीड़ाकारक) अवगुणों के वर्द्धक हों। उक्त आहारों को वहन करने वाली प्राणियों के कोष्ठ में वर्तमान अग्नियां हव्यवाहन, कव्यवाहन, सहरक्षाः कहलाती हैं। उपरिनिर्दिष्ट फलाहार हव्य हैं, उनको वहन करने वाली अग्नि हव्यवाहन जिन मनुष्यों की है वे देवकोटि में हैं। अथवा देवलोग फलाहार करने वाले होते हैं यही "हव्यवाहनो देवानाम्" का तात्पर्य है। हव्य जो अग्निहोत्रादि में होमा जा सकता हो ऐसा पदार्थ हव्य कहलाता है। पूर्वोक्त फलाहार अग्नि में होमने योग्य होने से हव्य कहलाता है। हव्य खाया जाता है इसमें प्रमाण यह है कि—

दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्।
तीर्थं हव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः॥
यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्॥ मनु० ३। १३०। १३३॥

इत्यादि मनु वचनों में ब्राह्मण को हव्य खाने का विधान है। "देव्यो वै वर्णो ब्राह्मणः" (तै० । १ । २ । ६ । ७) इसी प्रकार अन्नाहार कव्य है उसको वहन करने वाली अग्नि कव्यवाहन जिन मनुष्यों की है वे पितृकोटि (राष्ट्र, प्रजा और समाज के पालक वर्ग) में हैं अथवा पितृजन (पालक जन) अन्नाहार करने वाले होते हैं यही भाव "कव्यवाहनः पितृणाम्" का है एवं मांसाहार रक्षोभोजन है उसको वहन करने वाली अग्नि सहरक्षाः जिन मनुष्यों की है वे असुरकोटि (राष्ट्र, प्रजा और समाज के पीडकवर्ग) में हैं। अस्तु। यजुः १। १७ में कही हुई देवयद्, आमाद्,

क्रव्याद् इन तीन अग्नियों का भौतिकवाद में तो शतपथ में विचार किया, और हमने भी शतपथ के अनुसार तैत्तिरीय में उनके अपर नाम 'हव्यवाहन, कव्यवाहन, सहरक्षाः' का समन्वय दिखलाया। अपि तु तैत्तिरीय संहिता के सिद्धान्त का दृष्टिकोण प्राणियों की आमाशयस्थ अग्नि के सम्बन्ध में है, ऐसा हमने दर्शा दिया। यदि पाठक उक्त आमाशयगत अग्नियों का वैदिक दृष्टि से समन्वय करना चाहें तो उस का केवल दिग्दर्शन पूर्वोक्त उसी देवयद्, आमाद्, क्रव्याद् वाले (यजुः १ । १७) के उत्तरार्द्ध में आन्तरिक सम्बन्ध में कर सकते हैं यथा "ब्रह्मवनि त्वा क्षत्रवनि त्वा सजातवनि त्वा"

१—देवानां हव्यवाहनः = ब्रह्मवनिः

२—पितॄणां कव्यवाहनः = क्षत्रवनिः

३—असुराणां सहरक्षाः = सजातवनिः

सजाताः = जातैः सह ये जायन्ते ते प्राण्यन्तर्जाताः कृमयः, जातैर्वा सह ये जीवन्ति, तान् जातान् भक्षयित्वेत्यर्थः, एवं तादृशा मांसभोजिनः सिंहादयो वा मनुष्या वा सजाताः । अस्तु ।

इस समन्वय के साथ प्रसंगतः ऐसे मनु श्लोक भी पाठकों के सम्मुख रखना चाहते हैं जिनमें पाठक यह देखेंगे कि हव्य कव्य का प्रदान जीवित व्यक्तियों के लिये कहा है—

"मातामहं मातुलं च स्वस्रीयं श्वसुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ।"
ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः ।
तान् हव्यकव्ययोर्विप्राननर्हान् मनुरब्रवीत् ॥
चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥

(मनु ३ । १४८, १५०, १५२)

इन श्लोकों में आस्तिक, विद्वान्, तपस्वी और नाना, मामा, भांजा, श्वसुर, गुरु, दौहित्र, राजा, मित्र, ऋत्विक्, पुरोहित, यजमान आदि को हव्य कव्य खिलाने का विधान है। तथा 'पतित, नपुंसक, नास्तिक, चिकित्सक, देव का नाम लेकर या पूजापाठ के नाम से खाने वाले, मांस बेचने वाले, सट्टा आदि उपाय से जीने वाले, लोगों को छोड़ देना चाहिये। यह मनु का विधि-निषेध जीवितों में ही घट सकता है।

विदित हो कि इन हव्यवाहन आदि शब्दों के अर्थ सर्वत्र अग्नि भी नहीं है अपि तु जब यह त्रिक-सम्बन्ध को छोड़कर अलग २ होंगे तो इनके अन्यार्थ भी हो सकते हैं। उदाहरणतः देखिये—

"वायुर्वै तूर्णिर्हव्यवाड् वायुर्देवेभ्यो हव्यं वहति" (ऐ० २ । ३४)

"ब्रह्मद्विषे क्रव्यादे । ब्राह्मणद्वेष्ट्रे क्रव्यमदते" (निरु० ६ । ११)

उक्त वचनों में वायु को हव्यवाहन और ब्राह्मण-द्वेषी मांसाहारी दुष्टजन को क्रव्याद् कहा है। अस्तु। इस प्रकार हव्य, कव्य आदि की मीमांसा के अनन्तर हम अपनी प्रकृत व्याख्या पर आते हैं। पूर्वोक्त मीमांसा से पाठकों को विदित हो गया होगा कि कव्य का अर्थ अन्न, दाल, शाक, फल, घृत, दूध आदि भोजन है। यही अर्थ इस "मातली कव्यैः" (ऋ० १० । १४ । ३) प्रस्तुत मन्त्र में करेंगे—

मन्त्रार्थ—(मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः) मातली कव्यैर्वावृधानो यमोऽङ्गिरोभिर्वावृधानो बृहस्पतिर्ऋक्वभिर्वावृधानो भवति। मातली भूतली पृथिवीतली पृथिवीस्थानी पृथिवीस्थानोऽग्निर्देवः। 'मा पृथिवी' "अयं वै पृथिवीलोको माऽयं हि लोको मित इव" (श० ८।३।३।५) तस्यास्तलमस्यास्तीति मतुपि मातली पृथिवीस्थानोऽग्निः स च द्विविधः प्राण्यन्तर्वर्ती जीवनाग्निरपरो भौतिकाग्निः, अस्ति चात्र मन्त्रे श्लेषालङ्कारः। तत्र प्राण्यन्तर्वर्ती जीवनाग्निः कव्यैरन्नादिभोजनैर्भौतिकश्चाग्निः कुःपृथिवी तत्र भवैः कव्यैः पार्थिवैर्घृततैलान्नकाष्ठादीन्धनद्रव्यैर्वावृधानो वर्धमानो भवति वर्धत इति सिद्धान्तः कुःपृथिवीत्यत्र प्रमाणम् "रविवर्षार्द्धं देवाः पश्यन्त्युदितं रविं तथा प्रेताः। शशिमासार्द्धं पितरः शशिगाः कुदिनार्द्धमिह मनुजाः"। (आर्यभटीयं ज्यौतिषम्। गीतिका० ।१७) "जीर्यन्मर्त्यः क्वधःस्थः प्रजानन्" (कठो० १ । १ । २८) यमो मध्यस्थानो देवः प्राण्यन्तर्वर्ती जीवनकालोऽपरश्च भौतिको लोकानामन्तकृद् विश्वकालोऽङ्गिरोभिरङ्गानां रसः प्राणैः प्राणसञ्चरणैस्तत्तुल्यकालावयवैः सूर्यरश्मिभिस्तन्निष्पन्नकालगतिभिर्वा वर्धते। "अङ्गिरसोऽङ्गानां हि रसः प्राणो वा अङ्गानां रसः" (बृहदा० १ । ३६ । ३) "प्राणो वा ऽङ्गिराः" (श० ६ । १ । २ । २८) प्राणः कालावयवः "प्राणादिः कथितो मूर्त्तः (कलनात्मकः कालः)" सूर्यसिद्धान्ते १ । ११ ॥ "अङ्गिराः Division of time" इत्याप्टे। बृहस्पतिरूर्ध्वस्थानः प्राण्यन्तर्वर्ती जीवनप्राणः, न तु श्वासप्रश्वासात्मकः, अपि तु जीवयति यः प्राणिनं स जीवनशक्तिरूपः प्राणः जीवनप्राणः, यथा बृहदारण्यके "एष उ एव प्राणो बृहस्पतिर्वाग् वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः"(बृहदा० १।२।२०) द्वितीयश्च भौतिको वर्षाधिपतिर्देवः। यथा निरुक्ते "बृहस्पतिर्बृहतः पाता वा पालयिता वा" (निरु० १० । १२) "द्यौर्वै बृहत्" (श० ६ । १ । २ । ३७) "असौ द्युलोको बृहत्" (ऐ० ८ । २) द्यौश्च मेघमण्डलम् "असौ वै द्युलोकः समुद्रो नभस्वान्" (श० ६ । ४ । २ । ५), "द्यौर्वाऽपां सदनं दिवि ह्यापः सन्नाः" (श० ७ । ५ । २ । ५६) एवं मत्वा हि यास्केनर्गुदाहृता "तस्यैषा भवति-अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि-

क्षियन्तम् । निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेण विकृत्य ॥" (ऋ० १० । ६८ । ८) व्यापनवता मेघेन जलमपिनद्धमासीत्ताद् विशेषशब्देन बृहस्पतिर्निर्दिष्टवान् पृथिव्यामिति निरुक्तार्थः । स एवं द्विविधः शरीरभुवनभेदाभ्यां जीवनः प्राणो वर्षाधिपतिश्च बृहस्पतिर्देव ऋक्वभिर्विविधगुणवतीभिः कृत्रिमस्वाभाविकवाग्भिः विरवैः स्तनयित्नुभिर्गर्जनशब्दैर्वर्धते वृद्धिं महत्वमाप्नोति । वाग्विरवयोः सम्बन्धश्च बृहस्पतिना सह समीपं दर्शित एव । ऋक्वभिरित्यत्रशब्दश्च सामान्यो धात्वर्थः यथा निरुक्ते "मित्रो जनान्यातयति प्रब्रुवाणः शब्दं कुर्वन्" (निरु० १० । २२) एवं सति (देवा यांश्च वावृधुः) पूर्वोक्ता मातल्यादिनामभिर्व्यवहृता अग्न्यादयो देवा वर्धमानाः सन्तो यांश्च जनान् वावृधुर्वर्धितवन्तस्तथा (ये च देवान्) ये जनाश्च देवान् पूर्वोक्ताग्न्यादीन् वावृधुर्वर्धितवन्तस्ते जनाः (अन्ये स्वधयाऽन्ये स्वाहा मदन्ति) अन्ये केचित् स्वधयाऽन्नादिभोजनैर्मदन्ति तानग्न्यादीन् शरीरदेवान् तर्पयन्ति । 'अत्र मदेस्तृप्त्यर्थः' केचित् स्वाहाऽहुतिप्रदानेन मदन्ति तानग्न्यादीन् भौतिकदेवान् युञ्जतेऽनुतिष्ठन्ति । 'मद तृप्तियोगे' तृप्तिश्च योगश्च । "सर्वो द्वन्द्वो विभाषैकवद् भवति" (महाभाष्य० अ० १ । २ । ६३) ॥ ३ ॥

भाषार्थ—(मातली कव्यैर्यमोऽङ्गिरोभिर्बृहस्पति ऋक्वभिर्वावृधानः) मातली पृथिवीस्थानी अग्नि । वह दो प्रकार की है एक प्राणी के अन्तर्गत जीवनाग्नि कव्य अन्नादि भोजनों से तथा भौतिक अग्नि कव्य पृथिवी से उत्पन्न पार्थिव अन्न-घृत-तैल-काष्ठ आदि ईन्धन द्रव्यों से बढ़ता है । यम मध्यस्थानी देव प्राणी के अन्तर्वर्ती जीवनकाल । दूसरा भौतिक लोकों का अन्तकारी विश्वकाल अङ्गिरों, प्राणों, प्राणक्रियाओं तथा प्राण नामक काल विभागों, सूर्य रश्मियों से निष्पन्न काल गतियों से बढ़ता है । बृहस्पति ऊर्ध्वस्थानी देव । प्राणी के अन्तर्वर्ती जीवन-प्राण और दूसरा भौतिक वर्षा का नियामक देव जो कि मेघमण्डल में वर्तमान जल-वृष्टि से प्रजा को जीवन प्रदान करता है । वह ऋक्वों विविध गुण वाली कृत्रिम और स्वाभाविक वाणियों स्तन्ययित्नुरूप गर्जन शब्दों से वृद्धि को प्राप्त होता है । ऐसा होने पर (देवा यांश्च वावृधुः) पूर्वोक्त वृद्धि को प्राप्त होते हुए अग्नि देवों ने जिन लोगों को बढ़ाया तथा (ये च देवान्) और जिन लोगों ने पूर्वोक्त अग्नि आदि देवों को बढ़ाया वे (अन्ये स्वधया मदन्ति) कुछ एक जन तो अन्नादि भोजनों से उन शरीर के अन्तर्वर्ती अग्नि आदि देवों को तृप्त करते हैं (अन्ये स्वाहा मदन्ति) कतिपय जन आहुति-प्रदान करके भौतिक अग्नि आदि देवों का सेवन करते हैं ॥ ३ ॥

शिक्षा—मनुष्यों को चाहिये कि अपने व्यक्ति-जीवन की उन्नति के लिये निज जीवनाग्नि, जीवनकाल और जीवनप्राण को उत्तमोत्तम भोजनों के सेवन से उपयुक्त बनावें तथा समाज वा सर्व प्राणियों के हितार्थ अग्निहोत्र से भौतिक अग्नि, सामष्टिक काल और मेघमण्डल को होमादि से उपयुक्त करते रहें ॥ ३ ॥

तत्र जीवनकालस्यामन्त्रणम्

इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ ४ ॥

(यमाङ्गिरोभिः पितृभिः संविदान इमं प्रस्तरं ह्यासीद) यम हे जीवनकाल ! अङ्गिरोभिरङ्गानाश्रसैः पितृभिः प्राणैः सह संविदानोऽनुकूलः संस्त्वमिमं प्रस्तरं शरीररूपं यज्ञं जीवनवृद्धिहेतोरवश्यमासीद समन्तात्प्राप्तो भव । "यज्ञो वै प्रस्तरः" (श० १ । ३ । ४ । १०) "पुरुषो वाव यज्ञः" (छान्दोग्यो० ३ । ६ । १) "पुरुषो वै यज्ञस्तस्य शिर एव हविर्धानं मुखमाहवनीयः" (गो० उ० ५ । ४) (कविशस्ता मन्त्रास्त्वाऽऽवहन्तु) कविशस्ता मन्त्रा विद्वत्प्रोक्तानि शरीरविद्यावित्प्रोक्तानि मन्तव्यानि त्वा त्वामावहन्तु—अत्र शरीरे समन्तात् प्रापयन्तु चिरं रक्षन्त्वित्यर्थः । अत एव (राजन् , एना हविषा मादयस्व) राजन् हे राजमान देव ! एना हविषाऽनेन हविर्दानेनादानयोग्येन वस्तुना वा मां मादयस्व युङ्क्ष्व सन्तोषय सजीवनं कुर्वित्यर्थः ॥४॥

भाषार्थ—(यमाङ्गिरोभिः पितृभिः संविदान इमं प्रस्तरं ह्यासीद) हे जीवनकाल ! तू प्राणों के साथ अनुकूल होता हुआ मेरे इस शरीर रूपी यज्ञ को जीवनवृद्धि के हेतु अवश्य भली प्रकार प्राप्त हो । (कविशस्ता मन्त्रास्त्वाऽऽवहन्तु) शरीर विद्यावेत्ता विद्वानों के निर्दिष्ट मन्तव्य तुझ को मेरे शरीर में चिरकाल तक रखें । अत एव (राजन्नेना हविषा मादयस्व) हे राजमान देव ! इस हविर्दान तथा खाने योग्य पदार्थ से मुझको सन्तुष्ट, सजीवन कर ॥ ४ ॥

शिक्षा—प्राणशक्ति के अभ्यास और वैद्यक सिद्धान्तों के अनुसार खानपान हवनादि क्रियायों से मनुष्य दीर्घजीवी और सुखी हो सकता है ॥ ४ ॥

विश्वकालस्यामन्त्रणम्

अङ्गिरोभिरागहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्यानिषद्य ॥ ५ ॥

(यज्ञियेभिर्वैरूपैरङ्गिरोभिर्यमागहीह मादयस्व) यज्ञियेभिर्यज्ञार्हैर्यज्ञयोग्यैर्वैरूपैर्विभिन्नरूपैरङ्गिरोभिः सायम्प्रातरमावस्यापौर्णमास्यादिसन्धिसमप्राणैः काल·

वयवैः सह यम हे समय ! त्वमागह्यागच्छ तथाऽऽगत्येहास्मिन् यज्ञेऽस्मान्मादयस्व तर्पय (यस्ते पिता तं विवस्वन्तमहं बर्हिष्यानिषद्यास्मिन् यज्ञे हुवे) यश्च ते पिता विवस्वान् सूर्योऽस्ति तमहमासनमुपविश्योपविष्टः सन्नस्मिन् क्रियमाणे यज्ञे हुवे, आहुतिप्रदानेनाददे युनज्मि । "अत्र हु धातुरादानार्थः । हु दानादनयोरादाने च" ।

भाषार्थ—(यज्ञियेभिर्वैरूपैरङ्गिरोभिर्यमागहीह मादयस्व) यज्ञ के योग्य नानाविध सायं प्रातः अमावस्या पूर्णिमा आदि सन्धियों के मुहूर्तरूप कालावयवों के साथ हे समय ! तू प्राप्त हो और इस यज्ञ में हमको अपने लाभ से तृप्त कर (यस्ते पिता तं विवस्वन्तमहं बर्हिष्यानिषद्यास्मिन् यज्ञे हुवे) और जो तेरा पिता सूर्यदेव है उसको भी मैं आसनोपविष्ट इस यज्ञ में आहुतिप्रदान द्वारा प्रयोग करता हूँ ॥ ५ ॥

शिक्षा—भिन्न २ पर्व दिवसों में जब कि सूर्यरश्मियां भी यज्ञ में संयुक्त हों ऐसे स्थान पर पार्वण यज्ञ, समय को अनुकूल बनाने के लिये करने चाहियें ॥ ५ ॥

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ६ ॥

(अङ्गिरसः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासो नः) अङ्गिरसो ग्रीष्मर्तुसम्बन्धिसूर्यरश्मयः पितरो वर्षर्तुसम्बन्धिरविकिरणा नवग्वाः शरदृतुसम्बन्धिभानुरश्मयोऽथर्वाणो हेमन्तर्तुसम्बन्ध्यादित्यकिरणा भृगवः शिशिरर्तुसम्बन्धिसूर्यरश्मयः सोम्यासो वसन्तर्तुसम्बन्धिसूर्यकिरणा नोऽस्मभ्यमस्मज्जीवनाय सन्ति । 'पूर्वस्मिन्मन्त्रे विवस्वन्तं हुवे—इतिवचनात् तेन विवस्वता साकमृतवस्तत्सहिताः सूर्यरश्मयश्चापि युज्यन्त इति दर्शयितुमङ्गिरआदीनां वचनम्' । अन्यत्रापि "आयातु मित्र ऋतुभिः कल्पमानः संवेशयन् पृथिवीमुस्रियाभिः" (अथ० ३ । ८ । १) सूर्यः, ऋतुभिरुस्रियाभिश्च सह आयातीति सिद्धान्तः । अत्र तु ते रश्मय ऋतुसहचरिता वर्णिताः सन्ति । एवंवच्च विज्ञानम् । "वीलु चिद् दृढा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण । चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः" (ऋ० १ । १ । २) अत्रापि दर्शितं यदङ्गिरसो ग्रीष्मर्तुसम्बन्धिनः सूर्यरश्मयोऽद्रिं मेघं चक्रुः कृतवन्तस्तमेवाद्रिं मेघं पितरो वर्षर्तुसम्बन्धिरविकिरणा रुजन् भञ्जयन्ति नीचैर्निपातयन्ति पुनश्चोस्रा विविधगुणवासयितारः शारदाः सूर्यकिरणा आदित्यं दिनं पृथिवीं प्राप्नुवन्ति । एवमृतुसाम्यं दर्शितम् । ऋतुत्रयत्वमपि भवति यथा चरके "विकृतास्त्वेनं महता विपर्ययेणोपपादयन्ति, ऋतवस्त्रय इव" (चरके० सू० १२ । १३) तथा-

कृत्वैवात्र पितर इति शब्दो न विशेषणरूपेणापित्वङ्गिर आदिवद्देवतारूपेण स्वतन्त्र एव । सायणेन 'पितरो नवग्वाः सोम्यासः' त्रयोऽप्यङ्गिर आदीनां विशेषणवाचकाः सन्तीति व्याख्यातं परन्तु सूक्तभाष्यावतरणे "अङ्गिरसो नः पितरो नवग्वा इतिषष्ठ्या अङ्गिरःपित्रथर्वभृगुलक्षणा लिङ्गोक्ता देवताः" एवमत्र तु सायणेन 'पितरः' इति शब्दस्य देवतात्वं प्रतिपादितम् । अस्तु । निरुक्तेऽप्यस्मद्वत् पितर इत्यस्य स्वतन्त्रं देवतात्वमेव प्रतिपादितमङ्गिर आदीनामर्थाश्च यथा—

"पिता पाता वा पालयिता वा......पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः" (नि० ४ । २१) इति लक्ष्यीकृत्योक्तमत्र "पितरो व्याख्याताः । अङ्गारेष्वङ्गिराः अर्चिषि भृगुः संबभूव" इतिकृत्वैवोक्तं यास्केन । "अङ्गिरसो व्याख्याताः । भृगवो व्याख्याताः । अथर्वाणोऽथनवन्तः । थर्वतिश्चरतिकर्मा तत्प्रतिषेधः । तेषामेषा साधारणा भवति—"अङ्गिरसो नः पितरो......। अङ्गिरसो नः पितरो नवगतयो नवनीतगतयो वाथर्वाणो भृगवः सोम्याः सोमसम्पादिनः" (निरु० ११ । १९) "रसः सोमः" (श० ७ । ३ । १ । ३) सोम्यासः सोमसम्पादिनो रससम्पादिनो वसन्तर्तुसंबन्धिसूर्यरश्मय इत्यर्थः । एवं नात्राङ्गिर आदयो मृतपितरोऽपि तु सन्ति देवा ऋतुयुक्तसूर्यरश्मयः । उक्तं च निरुक्ते "पितर" इत्याख्यानम् । "माध्यमिको देवगण इति नैरुक्ताः" (निरु० ११।१९) रश्मयो देवाः "उदिता देवाः सूर्यस्य" (तेषां यज्ञियानां सुमतौ भद्रेऽपि सौमनसे वयं स्याम) "तेषां यज्ञियानां सुमतौ कल्याण्यां मतौ भद्रे भन्दनीये भाजनवति वा कल्याणे मनसि स्याम" (निरु० ११ । १९) तेषां पूर्वोक्तानां यज्ञार्हाणां सुमन्तव्ये व्यवहारे भाजनवति कल्याणे मनसि सुखयुक्ते प्रसन्नभावे वर्तेमहि ॥ ६॥

भाषार्थ—([1] अङ्गिरसः पितरो [2] नवग्वा [3] अथर्वाणो [4] भृगवः [5] सोम्यासो [6] नः) [1] ग्रीष्म ऋतु सम्बन्धी सूर्य रश्मियां—[2] वर्षा ऋतु सम्बन्धी सूर्यकिरणें—शरद् ऋतु [3] सम्बन्धी भानुरश्मियां—[4] हेमन्त ऋतु सम्बन्धी आदित्य किरणें—शिशिर ऋतु [5] सम्बन्धी सूर्य रश्मियां—[6] वसन्त ऋतु सम्बन्धी दिवाकर किरणें, हमारे जीवन के लिये हैं । (तेषां यज्ञियानां सुमतौ भद्रेऽपि सौमनसे वयं स्याम) उन यज्ञ योग्य ऋतुयुक्त सूर्य किरणों के विचारणीय विज्ञान व्यवहार में हम कल्याण मन से सुखयुक्त होकर रहें ॥ ६ ॥

शिक्षा—प्रत्येक ऋतु को स्वानुकूल और सुखमय बनाने के लिये पुष्कल ऋतु-याग करनी चाहिये ॥ ६ ॥

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवम् ॥ ७ ॥

(पूर्व्येभिः पथिभिः प्रेहि प्रेहि) पूर्वोत्पन्नवृद्धजनैः कृतैर्मर्यादितैः पथिभिर्जीवनमार्गैरिष्टापूर्त्तादिभिराचरणैर्हे जीव ! त्वं प्रेहि प्रेहि, जीवनान्तं गच्छ गच्छ पुनःपुनर्गच्छ नित्यंगच्छेत्यर्थः । "नित्यवीप्सयोः" (अष्टा० ८ । १ । ४) (यत्रा नः पूर्वे पितरः परेयुः) येषु वर्तमाना नोऽस्माकं पूर्वे पितरः पालकजनाः परेयुः परागता जीवनान्तं प्राप्ताः सन्ति (स्वधया मदन्तोभा राजाना यमं वरुणं च पश्यासि (स्वधया मदन्तोदकेन त्वां मादयन्तौ तर्पयन्तौ "हर वैवस्वतोदकम्" (कठो० १ । ७) इति चोक्तम । 'मदन्ता-इत्यत्रान्तर्गतो णिजर्थः' । 'स्वधेत्युदकनामोक्तं पूर्वम्' । उभा राजानोभौ राजमानौ महत्सत्ताकौ सर्वत्र व्याप्तौ यमं यमनशीलं सर्वान् पदार्थान् स्वायत्तीकर्तारमन्तकालं तथा वरुणं जन्मनोऽधिष्ठातृदेवं नूतनोत्पादाय सर्वपदार्थवरणशीलमाकाशे वर्तमानं मेघस्थं सूक्ष्मजलं देवं पश्यासि पश्येः । "लिङर्थे लेट्" (अष्टा० । ३ । ४ । ७) आपो यच्च वृत्वाऽतिष्ठंस्तद्वरुणोऽभवत्तं वा एतं वरणं सन्तं वरुण इत्याचक्षते परोक्षेण" (गो पथ० पू० १ । ७) ॥ ७ ॥

भाषार्थ—(पूर्व्येभिः पथिभिः प्रेहि प्रेहि) पूर्वोत्पन्न बड़ेलों के बनाये मर्यादित किये हुये जीवन-यात्रा सम्बन्धी इष्टापूर्त्त आदि आचरणरूप मार्गों से हे जीव ! तू जीवनान्त को पुनः २ या नित्य प्राप्त कर (यत्रा नः पूर्वे पितरः परेयुः) जिन मार्गों में वतमान हुए हमारे पालक जन जीवनान्त आयु की पूर्णता को प्राप्त हुए हैं (स्वधया मदन्ताभा राजाना यमं वरुणं च देवं पश्यासि) जल के द्वारा तुझे सन्तुष्ट करते हुए दोनों राजमान बड़ी सत्ता वाले सर्वत्र व्याप्त, सब पदार्थों को स्ववश करने वाले अन्तकारी काल तथा जन्म के अधिष्ठाता नूतन-उत्पत्ति के लिये सब को वरने वाले आकाश में वर्तमान सूक्ष्म जल रूप वरुण देव को तू देख ॥ यह एक आन्तरिक विचार रूप उपदेश है ॥ ७ ॥

शिक्षा—जब का आयु को पूर्ण करके मृत्युरूप अन्तकाल को और फिर पुनर्जन्म के लिये मेघ के सूक्ष्म जल रूप वरुण का प्राप्त करना अनिवार्य है । अतः जीवन की अस्थिरता का ध्यान मे रखते हुए उत्तम कर्म-मार्गों पर चलना चाहिये ॥ ७ ॥

सङ्गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि संगच्छस्व तन्वा सुवर्चाः ॥ ८ ॥

(परमे व्योमन् पितृभिः सङ्गच्छस्व यमेनेष्टापूर्तेन सम्-) परमे व्योमन् हृदाकाशे वतमानस्त्वं हे जीव ! पितृभिः प्राणैः सह सङ्गच्छस्व सङ्गतो भव पुनर्जन्मप्राप्तय इत्यर्थः । "यो वेद निहितं गुहायां परमे व्योमन्" (तैत्तिरीयो० २ । १ । १) "व्योमन्यात्मा प्रतिष्ठितः" (मुण्डको० २ । २ । ७) तत्रैव च यमेन जीवनकालेन सह सङ्गतो भव । इष्टापूर्तेनानुष्ठितेन यज्ञादिशुभकर्मरूपेण धर्मेण सह संगतो भव "एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः" (मनुः ८ । १७) इति चोक्तम् (अवद्यं हित्वाय पुनरस्तमेहि सुवर्चास्तन्वा सङ्गच्छस्व) अवद्यं गर्ह्यमिदं शरीरं हित्वाय त्यक्त्वा पुनरस्तं पुनर्गृहं पुनर्योनिं पुनर्जन्मेत्यर्थः । "अस्तं गृहनाम" (नि० ३ । ४) एहि प्राप्नुहि । तत्र च पुनर्जन्मनि सुवर्चास्तन्वा सुन्दरेण शरीरेण सह सङ्गतो भव। 'सुर्वचाः' इत्यत्र 'सुपां सुपो भवन्तीति वचनात्तृतीयैकवचने प्रथमा बहुवचनम्' ॥ ६ ॥

भाषार्थ—(परमे व्योमन पितृभिः संगच्छस्व यमेनेष्टापूर्तेन सम्) हृदयाकाश में वर्तमान हुए हे जीव ! तू प्राणों के साथ सङ्गत होजा और वहीं जीवनकाल के साथ भी संगत हो, इष्टापूर्त यज्ञादि रूप सञ्चित किये धर्म-धन के साथ सङ्गति कर जो तेरा सच्चा मित्र मरने पर साथ जाता है (अवद्यं हित्वाय पुनरस्तमेहि सुवर्चास्तन्वा सङ्गच्छस्व) गर्ह्य यानि म्रियमाण या मरणधर्मी शरीर को छोड़ कर पुनर्जन्म को प्राप्त हो और उस पुनर्जन्म में सुन्दर शरीर के साथ युक्त होजा ॥ ८॥

शिक्षा—प्रत्येक जीव वर्तमान देहपात के अनन्तर पुनः प्राणों और जीवनकाल से सङ्गत होता है और कर्मों के अनुसार नूतन नाड़ी आदि से युक्त पुनः शरीर को धारण करता है ॥ ८ ॥

अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥ ९ ॥

(पितरोऽस्मा एतं लोकमक्रन्) ये पितरः सूर्यरश्मयोऽस्माच्छरीराज्जीवं नीत्वास्मा एतं लोकमिमं पृथिवीलोकं पुनर्जन्मार्थमक्रन् कुर्वन्ति । "छन्दसि लुङ्लङ्लिटः" (अष्टा० ३ । ४ । ६) सामान्ये काले लुङ् । "सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु । तस्मै युज्यन्तामुस्रियाः" (यजुः ३५ । २) (अतोऽपेत वीत विसर्पत च) अस्मात् स्थानात्तोऽपेतापगच्छन्तु वीत वियन्तु विसर्पत विसर्पन्तु । 'अत्र सर्वत्र पुरुषव्यत्ययः' । अस्माच्छरीराज्जीवमादाय सूर्यरश्मयः क्रमेण पृथिव्यामपगच्छन्ति प्रसरन्ति, अन्तरिक्षे वियन्ति विस्तरेण गच्छन्ति, दिवि विसर्पन्ति सौक्ष्म्येन सर्पन्तीति सिद्धान्तितम् । यतो हि सूर्यस्त्रिधा स्वरश्मीन् प्रेरयति । उक्तं च वेदे "इदं विष्णुर्विचक्रमे

त्रिधा निदधे पदम्" (ऋ० १ । २२ । १७) तथा च निरुक्तमत्र "यदिदं किञ्च तद्विक्रमते विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति" (निरु० १२ । १६) (यमो अस्मा अहोभिरद्भिरक्तुभिर्व्यक्तमवसानं ददाति) यमो विश्वकालोऽस्मै जीवायाहोभि-रहर्गणेनाद्भिरुषोगणेनाक्तुभी रात्रिगणेनार्थात्कतिपयैरहरुषोरात्रिभिः प्रकटीकृतमवसानं विरामं ददाति पृथिव्यन्तरिक्षद्युस्थानगमनक्रमैः पुनर्जन्मप्राप्तये स्थिरीकरोतीत्यर्थः । "तिस्रो रात्रीर्यदवात्सीर्गृहे मे" इति चोक्तं कठेऽपि ॥ ६ ॥

भाषार्थ—(पितरोऽस्मा एतं लोकमक्रन्) जो ये सूर्य की रश्मियां हैं इस जीव के लिये इस पृथिवी लोक को पुनर्जन्मार्थ तय्यार करती हैं (अतोऽपेत वीत-विसर्पत च) अत एव इस स्थान से वे सूर्य की किरणें जीव को साथ लेकर अपगमन, विगमन और विसर्पण करती हैं अर्थात् प्रथम पृथिवी पर फैलती हैं पश्चात् ऊपर अन्तरिक्ष में पक्षों के तुल्य उड़ती हुई विस्तृत हो ले जाती हैं पुनः द्युलोक में अति-सूक्ष्मता से पहुँचती हैं (यमोऽस्मा अहोभिरद्भिरक्तुभिर्व्यक्तमवसानं ददाति) सूर्य इस जीव के लिये अहर्गण–उषोगण--रात्रिगण से अर्थात् कुछ दिनों उषाओं और रात्रियों से प्रकटीभूत विराम को देता है । जैसे कठोपनिषद् में यम के यहां जीवात्मा के तीन दिन रात के रहने को चर्चा है । एवं जो कि पृथिवी-अन्तरिक्ष-द्युस्थान के गमन क्रम से सम्बन्ध रखता है, इस प्रकार पुनर्जन्म प्राप्ति के लिये स्थित करता है ॥ ६ ॥

शिक्षा—शरीरपात हो जाने के बाद जीव सूर्य की पृथिवी सम्बन्धी रश्मियों को प्राप्त होता है पुनः अन्तरिक्ष सम्बन्धी किरणों को और पश्चात् द्युस्थान सम्बन्धी रश्मियों तक पहुँचता है एवं स्थूल शरीर के विना ही कुछ दिन, उषा और रात्रियों तक विराम में रह कर पुनर्जन्म में आता है ॥ ६ ॥

अतिद्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन् सुविदत्राँ उपेहि यमेन ये सधमादं मदन्ति ॥ १० ॥

(साधुना पथा चतुरक्षौ शबलौ सारमेयौ श्वानावतिद्रव) हे जीव ! त्वं साधुना पथा धर्म्येण मार्गेण चतुरक्षौ चतुष्प्रहरकौ शबलौ चित्रवर्णौ सारमेयौ सरमाया उषायाः पुत्रावहोरात्रौ । "सरमेति शब्दो मध्यस्थानदेवताप्रकरणे पद-नामसु निघण्टौ पठितत्वान्निरुक्ते च सरमा सरणादिति व्याख्यातत्वाददितिशब्देन साकं वर्णनाच्च सरमा शब्दस्यार्थ उषाऽत्र गृह्यते ।" सूर्यचन्द्रप्रकाशाभ्यां चित्रवर्णा-वहोरात्रौ शबलावत्रोच्यते । "शबलावहोरात्राविस्त्यत्र प्रमाणम् "श्यामश्च त्वा मा

शबलश्च प्रेषितौ यमस्य यौ पथिरक्षी श्वानौ । अर्वाङेहि मा विदीध्यो मात्र तिष्ठः पराङ्मनाः" (अथ० ८।१।६) प्रकृते दशममन्त्रे 'श्वानौ' एकादशे च 'पथिरक्षी' एवं द्वावपि शब्दौ पथिरक्षी श्वानौ, अथर्ववेदस्यैकस्मिन्नेव मन्त्रे पठितौ स्तः। तन्मन्त्रे च यत् कौषीतकिब्राह्मणवचनं तदत्र प्रमाणमुद्ध्रियते "अहर्वै शबलो रात्रिः श्यामः" (कौ० २।६) इति प्रामाण्यादृङ्मन्त्रोक्तशबलौ पथिरक्षी श्वानावहोरात्राविति सिद्धम्। तावहोरात्रौ हे जीव ! त्वमतिद्रव सम्यग्याहि (अथा सुविदत्रान् पितॄनुपेहि ये यमेन सधमादं मदन्ति) अथानन्तरं हे जीव सुविदत्रान् सुशोभनान् कल्याणसम्पादकान् पितॄन् पालकान् ऋतुसहचरितान् सूर्यरश्मीनुपेह्यु पागच्छ ये पितरो रश्मयो यमेन कालेन सधमादं सहयोगं युञ्जते भजन्ते ॥ १० ॥

भाषार्थ—(साधुना पथा चतुरक्षौ शबलौ सारमेयौ श्वानावतिद्रव) हे जीव ! तू उचित मार्ग से चार प्रहर रूप चार आंखों वाले, सूर्य तथा चन्द्र प्रकाश से चित्र रंग युक्त उषा-पुत्रों दिन और रात को समीचीन रूप से प्राप्त हो (अथ सुविदत्रान् पितॄनुपेहि ये यमेन सधमादं मदन्ति) इसके बाद कल्याण सम्पादक ऋतुसहचरित सूर्य की रश्मियों को प्राप्त कर जो समय के साथ सदा सहयोग रखती हैं ॥ १० ॥

शिक्षा—देहान्त के पश्चात् जीव शीघ्र २ दिन रातों को सूर्य रश्मियों द्वारा पुनर्जन्मार्थ प्राप्त होता है ॥ १० ॥

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परिदेहि राजन् स्वस्ति चास्मा अनमीवं च धेहि ॥११॥

(यम ते यौ रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ श्वानौ) हे यम ते तव यौ रक्षितारौ रक्षकौ चतुष्प्रहरकौ पथिरक्षी मार्गपालौ नृचक्षसौ नृणां मनुष्याणां द्रष्टारौ श्वानौ श्वानाविव पृष्ठगामिनावहोरात्रौ स्तः (ताभ्यामेनं परिदेहि) ताभ्यामहोरात्राभ्यामेनमेतं जीवं परिदेहि पुनर्जन्मार्थं समर्पय (राजन्नस्मै स्वस्ति चानमीवं च धेहि) हे राजन्! अस्मै जीवाय स्वस्ति चानमीवं च धेहि सम्पादय ॥ ११ ॥

भाषार्थ—(यम ते यौ रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ श्वानौ) हे समय ! तेरे जो रक्षक चारप्रहररूप चार आंखों वाले मार्गपाल प्राणियों के सदा दर्शक श्वान तुल्य प्रत्येक जीव के पीछे २ चलने वाले दिन और रात हैं (ताभ्यामेनं परिदेहि) उन दिन रातों के साथ इस जीव को पुनर्जन्म के लिये छोड़ दे (राजन्नस्मै

स्वस्ति चानमीवं च धेहि) हे राजन् ! इस जीव के लिये सत्तारूप स्वस्ति और नीरोगता का सम्पादन कर ॥ ११ ॥

शिक्षा—जीव का जीवन समय समाप्त हो जाने पर फिर से नया जीवन मिलता है जो कि शुद्ध और स्वस्थ होकर दिन रात के साथ पुनर्वहन करता है ॥११॥

उरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ॥ १२ ॥

(यमस्य दूतावुरूणसावसुतृपा उदुम्बलौ जनाननु चरतः) यमस्य दूतावुरूणसौ महाकुटिलौ । "णस् कौटिल्ये भ्वादिस्ततोऽच्" असुतृपौ प्राणैस्तृप्यन्तावुदुम्बलावुरुबलौ महाबलौ जनान् जायमानानुत्पद्यमानाननु-चरतो गतिं कुरुतः तौ सूर्याय दृशये इहास्मभ्यं भद्रमसुं पुनर्दाताम्) तावहोरात्रौ सूर्याय दृशये पुनः पुनः सूर्यं दर्शयितुमिहास्मिन् लोके ऽस्मभ्यं भद्रं सुखकरमसुं प्राणं पुनर्दातामपरजन्मधारयितुं पुनर्दत्तः ॥ १२ ॥

भाषार्थ—(यमस्य दूतावुरूणसावसुतृपा उदुम्बलौ जनाननु चरतः) वे 'दिन और रात' काल के दूत बने हुए बड़े कुटिल कठोर स्वभाव के, प्राणों से तृप्त होने वाले महाबली, उत्पन्न हुए सभी जीवों के साथ २ चलते हैं (तौ सूर्याय दृशये इहास्मभ्यमसुं पुनर्दाताम्) वे दिन और रात बारंबार सूर्यदर्शन के लिये इस लोक में हमारे वास्ते सुखदायक जीवन, धारण करने को दूसरा जन्म फिर देवें ॥ १२ ॥

शिक्षा—दिन और रात आयुरूप जीवनकाल के दूत बन कर बारंबार सूर्यदर्शन कराते हुए जीव के अन्तिम काल तक ले जाते हैं एवं पुनर्जन्म भी धारण कराते हैं ॥ १२ ॥

यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरङ्कृतः ॥१३॥

(यमाय सोमं सुनुत) यमायायूरूपाय जीवनकालाय विश्वकालाय च तत्सौष्ठ्यसम्पादनायेत्यर्थः । सोममोषधिरसं सुनुत निःसारयत (यमाय हविर्जुहुता) यमाय पूर्वोक्ताय हविर्जुहुत होत्रं कुरुत (अग्निदूतोऽरङ्कृतो यज्ञो यमं ह गच्छति) अग्निर्दूतो यस्य स एवमरङ्कृतोऽलङ्कृतः सम्यक्कृतो यज्ञो यमं कालं गच्छति ॥१३॥

भाषार्थ—(यमाय सोमं सुनुत) समय को अनुकूल बनाने के लिये ओषधि रस निकालना चाहिये पुनः (यमाय हविर्जुहुत) उस ओषधि रस की हवि

को अग्नि में होम करो (अग्निदूतोऽरङ्कृतो यज्ञो यमं ह गच्छति) अग्निदूत के द्वारा यह सम्पादित यज्ञ काल को प्राप्त हो जाता है ॥ १३ ॥

शिक्षा—आयुर्वैदिक ढंग से ओषधि-रस का होम जीवन को चिरकालीन बनाने का हेतु है ॥ १३ ॥

यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत ।
स नो देवेष्वायमद्दीर्घायुः प्रजीवसे ॥१४॥

(यमाय घृतवद्धविर्जुहोत प्रतिष्ठत च) यमाय पूर्वोक्ताय जीवनकालाय विश्वकालाय वा तत्सौष्ठ्यसम्पादनायेत्यर्थः। घृतवद्धविर्घृतयुक्तं हवनं जुहोत कुरुत प्रतिष्ठत च तत्र प्रकृष्टतां च प्राप्नुत (स नो जीवसे देवेषु दीर्घायुः प्रायमत्) स नोऽस्माकं जीवसे जीवनाय देवेष्विन्द्रियेषु दीर्घायुर्दीर्घस्थायित्वं प्रायमद् विस्तारयति ॥ १४ ॥

भाषार्थ—(यमाय घृतवद्धविर्जुहोत प्रतिष्ठत च) पूर्वोक्त जीवन काल और विश्वकाल को अनुकूल बनाने के लिये घृत सहित ओषधि रसरूप हवि आदि का होम करो और जीवन की उच्चता को प्राप्त होवो (स नो जीवसे देवेषु दीर्घमायुः प्रायमत्) एवं वह काल हमारे अधिक और उत्तम जीवन के लिये हमारी इन्द्रियों में दीर्घजीवनी का विस्तार करे ॥ १४ ॥

शिक्षा—हव्य वस्तुओं में घृत मिलाकर या घृत के साथ हवन करने से इन्द्रिय-शक्तियां चिरस्थायी रहती हैं ॥ १४ ॥

यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥ १५ ॥

(यमाय राज्ञे मधुमत्तमं हव्यं जुहोतन) पूर्वोक्ताय सर्वत्र राजमानाय कालाय मधुमत्तमं मधुररसयुक्तं हव्यं होतव्यं वस्तु जुहोतन जुहुत (पथिकृद्भ्यः पूर्वजेभ्यः पूर्वेभ्य ऋषिभ्य इदं नमः) पथिकृद्भ्यो धर्ममार्गसम्पादकेभ्यः पूर्वजेभ्यः पूर्वेभ्यः पूर्वजापेक्षयाऽपि पूर्वेभ्यः प्राक्तनेभ्य ऋषिभ्य इदं मन्त्रत्रयोक्तं सोमघृतमधुमिश्रं हविष्प्रदानं नमो नम्रत्वं शिष्टाचारोऽस्तु, अस्तीत्यर्थः ॥ १५ ॥

भाषार्थ—(यमाय राज्ञे मधुमत्तमं हव्यं जुहोतन) पूर्वोक्त सर्वत्र राजमान समय को अनुकूल बनाने के लिये मधु या मिष्ट से युक्त हवि का होम करना चाहिये (पथिकृद्भ्यः पूर्वजेभ्यः पूर्वेभ्य ऋषिभ्य इदं नमः) धर्ममार्ग सम्पादन करने वाले पूर्वजों की अपेक्षा भी जो पूर्व ऋषि हो चुके हैं उनके लिये यह तीन मन्त्रों में

कहा हुआ सोम-घृत-मधु सहित हविः का होमरूपकर्म नम्रतारूप या शिष्टाचार-रूप हो ॥१५॥

शिक्षा—समय को उपयोगी बनाने के लिये मधु या मिष्ट वस्तु से युक्त हवि का होम करना चाहिये। इस प्रकार सोमादि ओषधि का रस, घृत और मधु से मिश्रित हवियों का हवन करना आदि उत्तम कर्म पुराने ऋषियों के लिये शिष्टाचार का अनुष्ठान भी समझना चाहिये ॥ १५ ॥

त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्‌ बृहत् ।
त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आहिता ॥ १६ ॥

(एकमिद् बृहत् त्रिकद्रुकेभिः षडुर्वीः पतति) एकमिदेक एव स्वाभाविकः स्वातन्त्र्येण विराजमानः कालः त्रिकद्रुकेभिर्भूतवर्तमानभविष्यन्नामकैस्त्रिचक्रैः षडुर्वीः भूमिरूपानृतून् पतति-प्राप्नोति "उर्वी पृथिवीनाम" (नि० १ । १) कद्रुकं चक्रम "कद् वैक्लव्ये" भ्वादिस्तस्मादौणादिको रुः प्रत्ययस्ततश्च कः । त्रिष्टुब्द्युलोकः । "त्रिष्टुबसौ द्यौः" (श० १ । ७ । २ । १५) गायत्री पृथिवीलोकः । "या वै सा गायत्र्यासीदियं वै सा पृथिवी" (श० १ । ४ । १ । ३४) ता सर्वा छन्दांसि दिशोऽन्तरिक्षलोक इत्यर्थः "छन्दांसि वै दिशः" (श० ८ । ३ । १।१२) यमे काले विश्वकाले, आहिता वर्तन्ते ॥ १६ ॥

भाषार्थ—(एकमिद् बृहत्त्रिकद्रुकेभिः षडुर्वीः पतति) स्वभाव तथा निज स्वतन्त्रता में किसी की अपेक्षा न करने वाला एक अकेला काल (Time) 'भूत-वर्तमान-भविष्यत्' इन तीन कालचक्रों से ऋतुरूप छः भूमियों को प्राप्त होता है (त्रिष्टुब्गायत्री ता सर्वा छन्दांसि यम आहिता) द्यावापृथिवी और सारी दिशायें यानि अन्तरिक्ष काल (Time) के अन्दर ही रखे हुये हैं ॥ १६ ॥

शिक्षा—काल 'भूत-वर्तमान और भविष्यत्' रूप तीन चक्रों द्वारा छः ऋतुओं में विभक्त हो जाता है। न केवल प्राणियों के लिये ही यह काल यमन करने वाला है अपि तु पृथिवी, अन्तरिक्ष और द्यौ एवं तीनों लोकों यानि सम्पूर्ण भुवन समय के नियन्त्रण में रहता है अत एव समय का परिज्ञान और उस से उचित लाभ उठाना चाहिये ॥ १६ ॥

समालोचना—

मन्त्र १ में—

बड़े दुःख की बात है कि निरुक्त में इस मन्त्र की व्याख्या उपलब्ध

होते हुए भी किसी २ विद्वान् ने पौराणिकवाद की कल्पना की। हम नहीं कह सकते कि उन्होंने इसकी निरुक्त में व्याख्या देखी या नहीं अथवा देखते हुये भी जानबूझ कर स्वपक्षानुकूल न होने से उस को छोड़ दिया। उनके अर्थों में निम्न दोष प्रतीत होते हैं—

१—(बहुभ्यः पन्थामनुपस्पशानम्) बहुतों के लिये मार्ग को दिखलाते हुए।

दोष—'अनुपस्पशानम्' में 'दृश' के 'पश्य' विकार की कल्पना से 'यमलोक का रास्ता दिखलाते हुए' अर्थ करना ठीक नहीं है, क्योंकि निरुक्तकार के "अनुपस्पाशयमानम्" निर्वचन से इस प्रयोग में 'पश बन्धने' (चुरादि०) या 'स्पश बाधनस्पर्शयोः' (भ्वादि०) इन दो धातुओं का होना ही संभव है अन्य का नहीं। अर्थ की सङ्गति से हमें 'पश बन्धन' से बना हुआ जंचता है।

२—(प्रवतः महीरनु परेयिवांसम्) इसका अभिप्राय यह है कि सब को अपने २ कर्मानुसार उचित स्थान पर जन्म देता है।

दोष—'परेयिवांसम्' यह इण् धातु का क्वसुप्रत्ययान्त प्रयोग है, निरुक्त में यह बात स्पष्ट दिखला दी है। वहां निरुक्तकार ने इसका अर्थ 'पर्यागतवन्तम्' किया है। अतः कर्मानुसार उचित स्थान पर जन्म देता है, यह कल्पना ठीक नहीं है।

मन्त्र २ में—

(जज्ञानाः स्वाः पथ्या अनु) जात प्राणीमात्र अपने २ पथ्यों के अनुसार जाते हैं (कहां जाते हैं, इसका स्पष्टीकरण मर कर यमालय में) कोई विद्वान् ऐसा अर्थ करते हैं।

दोष—'जज्ञानाः' अभी तो उत्पन्न हुए अभी मरने के रास्तों पर चलने का प्रसङ्ग ही क्या ? हां यदि 'जज्ञानाः' की जगह 'म्रियमाणाः' पाठ होता तो 'मर कर यमलोक को जाते हैं।' ऐसा कहना कुछ सम्भव था, पर यहां तो 'जज्ञानाः' है इसका अर्थ जो हमने किया है कि उत्पन्न हुए सभी प्राणी और वनस्पति आदि पदार्थ अपनी अपनी प्रकृति योनि किंवा कर्मानुसार संसार में परिणाम और फल आदि को प्राप्त करते हैं। वही ठीक है। पुराणवादी अर्थ भी करते हैं किन्तु 'जज्ञानाः स्वाः पथ्या अनु' पुराणवाद के अर्थों में घटते हुए न देखकर ऐसा भी लिखते हैं कि 'पथ्याः' का भाव विशेष रूप से स्पष्ट नहीं होता।

मन्त्र ३ में—

१—माली मातलिरिन्द्रस्य सारथिस्तद्वानिन्द्रो मातली (सायण), मातली= इन्द्र (अन्य विद्वान्)

दोष—मातलि इन्द्र का सारथि और उस सारथि से युक्त मातली इन्द्र है। एवं मातली का इन्द्र अर्थ करना सर्वथा अनुपपन्न है क्योंकि प्रथम तो मातलि इन्द्र का सारथि हो इसके लिये निरुक्तादि वैदिक साहित्य में स्थान नहीं, दूसरे इकारान्त शब्द से मत्वर्थीय इन् प्रत्यय हो ही नहीं सकता उसका विधान अकारान्त से है। इस लिये मातली का इन्द्र अर्थ करना अनुचित है।

२—कव्यों, ऋक्वों को पितर माना और साथ में यह भी लिखा कि इस मन्त्र का पूर्वार्द्ध अभी विशेष विचारणीय है। इनका एक दूसरे से बढ़ने का क्या अभिप्राय है यह समझ में नहीं आता।

दोष—सायण की हां में हां करके कव्यों और ऋक्वों को पितर-विशेष मान लिया किन्तु प्रमाण कुछ नहीं और न ही कोई सङ्गति होती है अत एव उस असङ्गति के दुःख को अनुभव किया।

३—'यान् देवा वावृधुः, ये देवान् वावृधुः' में ये, यान् देवों से भिन्नों का सङ्केत है। जो यद् शब्द के आपेक्षिक तद् शब्द से सम्बद्ध करना चाहिये। यथा, यद् शब्द देवों से भिन्न का सूचक है एवं अपेक्षाकृत तद् शब्द देवों से भिन्न में ही होना उचित है। जिसको 'ते ऽन्ये स्वधया स्वाहा मदन्ति' का कर्ता बनाना चाहिये जो हमारे अर्थों में सङ्गत है। यहाँ इस सापेक्ष योजना को तोड़ डाला।

मन्त्र ६ में—

१—"नवग्वाः" नव प्रकार की गति वाले अथवा मक्खन जैसी गति वाले का अभिप्राय व्यक्त नहीं होता (अन्य विद्वान्)

दोष—मन्त्र में दिये हुए सभी 'अङ्गिरसः' आदि का कल्पित पितरों के अर्थ करने में कुछ भी अभिप्राय व्यक्त नहीं होता। न केवल 'नवग्वाः' पर ही यह बात है 'भृगवः' का अर्थ करते हुए भी लिखा "भृगु का अर्थ है जो आग में भुना हुआ हो" क्या इस अर्थ में कुछ स्पष्टता है, क्या आग में भुने हुए भी पितर होते हैं? ऐसा असम्भवार्थ होने पर कैसे सन्तोष हो, स्वयं वादी को इसका गौणार्थ करना पड़ा कि "आग में भुने हुए पितर कौन होसकते हैं कि जिस की शरीर में आस्था न हो" अतः यह अर्थ-कल्पना उचित नहीं है।

मन्त्र ८ में—

१—स्वर्ग में जाने के लिये पितर तथा यम, मृत पुरुष की आत्मा को पृथिवी पर लेने आते हैं (अन्य विद्वान्)

दोष—जब कि वादी के मतानुसार यम प्रथम मरा और प्रथम स्वर्ग गया "यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम्" (अथ० १८ अ० ३ । ३३) पर। तो उस मरे हुए यम को स्वर्ग में ले जाने के लिये कौन आया था ? यदि स्वयं ही चला गया था तो अन्य मृत जन भी स्वयं ही स्वर्ग जा सकते हैं। जब कि यम स्वर्ग का राजा है तो हरेक मृत प्राणी के लेने के लिए पितरों के साथ कुली की तरह दौड़ा २ फिरे यह शोभा नहीं देता, अपि तु संसार में प्राणियों की अनन्तता के कारण उनका मरण भी अनन्त होने से कोई न कोई प्राणी हर वक्त मरता रहता है इस प्रकार यम उस मृत प्राणी को लेने के लिये दौड़ता रहता होगा तो पुनः स्वर्ग या यमलोक का राजा किस प्रकार सिद्ध हो सकता है,वह तो मुर्दे ले जाने वाला कुली ही रहा, राज्य कोई दूसरा करेगा, क्या ? यह बात भी अत्यन्त असम्भव ही रही। स्वर्ग में पहुँच कर पितरों को सुख मिलना चाहिये था किन्तु उनको यह मुर्दा ले जाने का काम तो क्या सुख प्राप्त करने देता होगा। जब राजा ही मारा २ फिरता है तो प्रजा की क्या कथा। प्रतीत होता है कि आपके कल्पित यम राजा के यहां कुली नहीं हैं जो स्वयं तथा बेचारे पुण्यात्मा पितरों को भी मुरदे ले जाने पड़ते हैं।

मन्त्र ६ में—

१—"इस मन्त्र में शव की अन्त्येष्टि क्रिया के लिये स्थान को पितर निर्धारित करते हैं ऐसा उल्लेख है" (कोई विद्वान्)

दोष—हमने बहुतेरे मुर्दे फूंके और लोग फूंकते हैं मगर आजतक किसी ने नहीं देखा कि आपके कल्पित पितर यम लोक से आकर अन्त्येष्टि के स्थान को निर्धारित करते हों। यदि वे यमलोक से आकर यह काम कर दिया करते तो लोगों का कुछ समय ही बच जाता किन्तु पुराने जानने वाले पुरुषों को ही अन्त्येष्टि का स्थान आदि निर्धारित करना पड़ता है। यदि इनको ही आप पितर कह देते तो कुछ बात भी थी। अतः यह सब मिथ्यास्वप्न है।

२—"यमलोक में दिन रात नहीं होते और यहां जल भी नहीं है" (अन्य विद्वान्)

दोष—क्या कोई ऐसा यमलोक हो सकता है ? वस्तुतः होना न होना बराबर है। भला जहां दिन नहीं रात नहीं यानि प्रकाश नहीं अँधेरा नहीं जल नहीं तो वहां हो क्या सकता है ? ऐसे स्थान की कल्पना क्या कोई बुद्धिमान् कर सकता है। नहीं नहीं, यह स्वप्न है और भ्रम है। बड़ा आश्चर्य तो यह है कि निज विचारों या सिद्धान्तों में मतभेद भी मिलता है। यहां पर तो आपने यमलोक स्वर्ग को प्रकाश

आदि से शून्य वर्णन किया परन्तु (अथ० १८ । २ । ४८) पर उसको 'प्रद्यौः' नाम दिया है ।

मन्त्र १६ में—

१—'यमं' नियन्ता परमात्मा में 'आहिता' स्थित हैं (अन्य विद्वान्)

दोष—यहां पर आपकी प्रतिज्ञा में बाधा पड़ी जो यम का अर्थ पितृपति यमलोकवासी न लेकर परमात्मा का अर्थ किया । अस्तु ।

ऋग्वेद मण्डल १० सूक्त १५ ।

इस सूक्त के प्रथम मन्त्र की व्याख्या निरुक्त में की गई है जो नीचे मन्त्र-भाष्य में उद्धृत है । उस में निरुक्तकार ने आधिदैविक विषय को दर्शाया है । तथा "तस्मान्माध्यमिकान् पितॄन् मन्यन्ते" (नि० ११ । १८) इस तत्रस्थ वचन से भी विशेष स्पष्टीकरण हो जाता है । सम्पूर्ण सूक्त के देवता पितर हैं । और इसमें मुख्यरूपेण यज्ञ प्रक्रिया का विधान है जिस में दो प्रकार के पितर उपयुक्त होते हैं । एक जड़ पितर सूर्य की रश्मियां दूसरे चेतन पितर ज्ञानी लोग । लोकप्रत्यक्ष भी यही है । यज्ञ का उत्तमोपयोग विना सूर्यकिरणों और ज्ञानी पुरुषों के नहीं हो सकता, अत एव सूर्योदय के पश्चात् से सूर्यास्त से पूर्व २ यज्ञ करने का याज्ञिक सिद्धान्त है । तथा ब्रह्मा, अध्वर्यु, उद्गाता, होता आदि ज्ञानी जनों के द्वारा यज्ञ करने का आदेश भी है । अत एव इस सूक्त में संक्षेप से यज्ञप्रक्रियाविज्ञान है, साथ साथ पितृपरिचय, ज्ञानीजनों का यज्ञ में कर्तव्य और सूर्यरश्मियों का उपयोग-विज्ञान दर्शाया है । यज्ञ के तीन सवन, पृथिवीभ्रमण से अहोरात्रवृत में सूर्यरश्मियों के मुख्य स्थान या केन्द्र, यज्ञ के योग से किरणों का पोषक और बलदायक बनना, बुद्धि का विकसित करना, उदित, तप्त और शान्त रश्मियों का वर्तन, उत्तरायण और दक्षिणायन में सूर्यरश्मियों का यज्ञ में लाभ और यज्ञाहुति का रश्मियों द्वारा प्रसार, ज्ञानी जनों के द्वारा यज्ञ का सेवन और उनका सत्कार, निज सन्देहों या प्रश्नों का उनसे समाधान तथा उपदेश प्राप्त करना आदि २ उपयोगी बातों का वर्णन है—

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्तेनोऽवन्तु पितरो हवेषु ॥ १ ॥

(उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः) "उदीरतामवर उदीरतां पर उदीरतां मध्यमाः पितरः सोम्याः सोमसम्पादिनस्ते" (नि० ११ । १८) अवरे प्रातःसवनीयाः सोमसम्पादिन उत्पद्यमानेषु रससम्पादिनःसूर्यरश्मयो रसयुक्तान् पदार्था-

नुदीरतामुन्नयन्तु मध्यमा माध्यन्दिनसवनीयाः पूर्ववद्रससम्पादिनो रविकिरणा उदीरता-मुन्नयन्तु तानेव पदार्थान्। परासस्तृतीयसवनिकाः सूर्यरश्मय उदीरतामुन्नयन्तु तानेव। एवं त्रीणि सवनानि यज्ञस्य भवन्ति तत्सम्बद्धाः सर्वे हि सूर्यरश्मय उन्नयन्तु (असुं य ईयुरवृका ऋतज्ञास्ते पितरो नो हवेष्ववन्तु) "असुं ये प्राणमन्वीयुरवृका अनमित्राः सत्यज्ञा वा यज्ञज्ञा वा ते न आगच्छन्तु पितरो हवेषु" (निरु० ११ । १८) ये पितरः सूर्यरश्मयो-ऽसुं प्राणं प्राणवन्तं जीवमात्रमीयुः प्राप्ताः सन्ति तेऽवृका अनमित्रा अस्माभिः सह संश्लिष्टा ऋतज्ञा यज्ञज्ञा वा यज्ञस्य ज्ञानसाधकाः । 'कृतो बहुलमित्यपि करणे कः' अस्माकं ह्वानेषु विचारस्पर्द्धासूत्नेतुमागच्छन्त्वागच्छन्ति ॥ १ ॥

भाषार्थ—(अवरे पितरः सोम्यास उदीरतामुन्मध्यमा उत्परासः) उत्पन्न हुए जगत् पदार्थों में रस को सम्पादन करने वाली प्रातः सवनीय सूर्यरश्मियां उन जगत्पदार्थों को उन्नत करती हैं एवं मध्यसवन और तृतीयसवन की रश्मियां भी उनको उन्नत करती हैं, जब कि यज्ञ से संयुक्त हुई रश्मियां फैलती हैं (असुं य ईयुर-वृका ऋतज्ञास्ते पितरो नो हवेष्ववन्तु) और वह सूर्यरश्मियां जीवमात्र में संगत होती हैं अत एव हम से संश्लिष्ट होकर यज्ञ के उपयुक्त ज्ञान की साधक बन हमारे आन्तरिक विकासों में उन्नति के लिये प्राप्त होती हैं ॥ १ ॥

शिक्षा—यज्ञ के योग से सूर्य की रश्मियां जड़ चेतन प्राणीमात्र के जीवन-रस को उन्नत करने वाली बनती हैं। अत एव हम यज्ञ के उपयोग-ज्ञान से उन रश्मियों को अपने जीवन के लिये उन्नायक बनावें ॥ १ ॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥ २ ॥

(पितृभ्य इदं नमोऽस्तु) पितृभ्यः सूर्यरश्मिभ्य इदं नमोऽयं यज्ञोऽस्तु। "यज्ञो वै नमः" (श० । २ । ४ । २ । २४) कतमेभ्यः (अद्य ये पूर्वासो य उपरास ईयु र्ये पार्थिवे रजस्यानिषत्ता ये वा नूनं सुवृजनासु विक्षु) अद्यास्मिन्दिनेऽद्यतने ये पूर्वासः पूर्वदिशासम्बन्धिनः सूर्यरश्मय ईयुः प्राप्ताः सन्ति य उपरासः पश्चिमदिशामीयुः प्रतिगताः सूर्यरश्मयो ये पार्थिवे रजसि पृथिवीलोके पृथिवीतले वा सम्प्रविष्टा रश्मयः । "लोका रजांस्युच्यन्ते" (निरु० ४ । १६) ये वा सुवृजनासु सु स्पष्टं निर्मलं वृजनमन्तरिक्षमाकाशं यासां तासु अन्तरिक्षवासिनीषु विक्षु प्रजासु समन्तात्प्रविष्टाः सन्ति तेभ्यः सूर्यरश्मिभ्यः पूर्वोक्तो यज्ञोऽस्तु ॥ "वृजन-मन्तरिक्षम्" उणादि० दयानन्दः ॥ "वृजनम् Sky" आपटे ॥ २ ॥

भाषार्थ—(पितृभ्य इदन्नमोऽस्तु) सूर्य रश्मियों के लिये यज्ञ हो (अद्य ये पूर्वासो य उपरास ईयुर्ये पार्थिवे रजस्यानिषत्ता ये वा नूनं सुवृजनासु विक्षु) आज जो पूर्व दिशा सम्बन्धी सूर्य रश्मियां प्राप्त होती हैं तथा जो पश्चिम दिशा में वर्तमान हैं या जो किरणें पृथिवी के अन्दर और जो आकाश में रहने वाले लोकों या प्राणीवर्ग में वर्तमान हैं उन सभी किरणों को उपयोगी बनाने के लिये यज्ञ है ॥ २ ॥

शिक्षा—सूर्य के पूर्व पश्चिम रूप उदयास्त मार्ग से प्राप्त किरणों तथा पृथिवी के अन्दर पार्थिव वस्तुओं और आकाशस्थ पदार्थों को प्राप्त रश्मियों को यज्ञक्रिया से उपयोगी बनाना चाहिये।

२—सूर्य की किरणों के वैज्ञानिक ४ केन्द्र (Centre) बनते हैं जो उदय, अस्त, मध्य-दिन और मध्य-रात्रि के विभाग से अपना कार्य करते हैं ॥ २ ॥

आहं पितॄन् सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ ३ ॥

(अहं सुविदत्रान् पितॄनावित्सि विष्णोर्नपातं विक्रमणं च) अहं सुविदत्रान् कल्याणविद्यान् पितॄन् पालकजनान् तथा विष्णोर्यज्ञस्य नपातं स्थिरत्वं व्याप्तित्वं विक्रमणं चान्तरिक्षे सञ्चारविशेषं चावित्सि-आस्मरामि मनसि धारयामि "यज्ञो वै विष्णुः" (श० १३ । १ । ८ । ८) आवित्सि 'विद् विचारणे' लुङि रूपम् । (ये बर्हिषदः सुतस्य पित्वः स्वधया भजन्त त इहागमिष्ठाः) ये बर्हिषदो यज्ञासने सीदन्ति ते सुतस्य सम्पादितस्य पक्वस्य पित्वोऽन्नस्य । "पितुरन्ननाम" (नि० २ । ७) स्वधया स्वधारणया स्वेच्छया भजन्त भजत सेवेध्वम् । 'अत्र नकारोपजनश्छान्दसः'। अत एव यूयमत्रागमिष्ठा आगच्छत । स्वधा=स्वधारणा 'मुख्यशब्दार्थसमन्वये पश्यत' ॥ ३ ॥

भाषार्थ—(अहं सुविदत्रान् पितॄनावित्सि विष्णोर्नपातं विक्रमणं च) मैं शुभ विद्या सम्पन्न पालक जनों, विद्वानों तथा यज्ञ की प्रसाररूप व्याप्ति को भली प्रकार जानता हूँ (ये बर्हिषदः सुतस्य पित्वः स्वधया भजन्त त इहागमिष्ठाः) इस यज्ञावसर पर तुम सब विद्वानों शुभासन पर विराजित हुए स्वेच्छा से भोजन खाओ अत एव यहां आकर विराजो ॥ ३ ॥

शिक्षा—यज्ञ क्रिया का फल बहुत दूर तक व्यापता है। और उस यज्ञ का अनुष्ठान परिचित शुभविद्यासम्पन्न विद्वानों के द्वारा करना चाहिये । पुनः उन विद्वानों को उनकी इच्छानुसार भोजन खिलाना चाहिये ॥ ३ ॥

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आगतावसा शन्तमेनाथा नः शंयोररपो दधात ॥ ४ ॥

(बर्हिषदः पितर ऊत्यर्वाग्व इमा हव्या चकृमा जुषध्वम्) बर्हिषदो यज्ञासन उपविष्टार ऊती-ऊत्यै-अस्मद्रक्षायै । "सुपां सुपो भवन्ति" (वार्तिक० अष्टा० ७ । १ । ३९) विभक्तिव्यत्ययः । अर्वागत्र यज्ञे वो युष्मभ्यमिमानि हव्या हव्यानि चकृमा कुर्मः सम्पादयामः सज्जीकुर्मो यूयं जुषध्वमग्नौ प्रक्षेपार्थं प्रयुङ्ध्वम् (ते शन्तमेनावसाऽऽगत नो ऽरपः शंयोर्दधात) ते यूयं विद्वांसः शन्तमेन सुखमयेनावसा रक्षणेन सदैवागत प्राप्नुत नोऽस्मभ्यमरपः पापरहितंभावं शंयो रोगाणां शमनं यावनं च भयानां धारयत तथा च निरुक्तम् (४ । ११) ॥ ४ ॥

भाषार्थ—(बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्) यज्ञासन पर बैठे हुए हे विद्वानो ! हम अपनी रक्षा के लिये तुम्हारे वास्ते होम की वस्तुओं को तैयार करते हैं इनको तुम अग्नि में डालकर काम में लाओ (ते शन्तमेनावसाऽऽगत नो ऽरपः शंयोर्दधात) वे तुम विद्वानो ! सुखमय रक्षण के कारण सदा प्राप्त हुआ करो और हमारे लिये शुद्धभाव, रोगनिवृत्ति और भय के दूरीकरण का उपाय करते रहो ॥ ४ ॥

शिक्षा—यज्ञ में विद्वानों को निमन्त्रित करके उनसे अपने रोगनिवृत्ति और आपत्तियों से बचने के लिये कुछ न कुछ ज्ञान प्राप्त करना चाहिये ॥ ४ ॥

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आगमन्तु त इह श्रुवन्त्वधिब्रुवन्तु तेऽवन्त्वस्मान् ॥ ५ ॥

(बर्हिष्येषु प्रियेषु निधिषूपहूताः सोम्यासः पितरः) बर्हिष्येषु यज्ञसंबन्धिषु प्रियेषु स्वानुकूलेषु निधिषु दक्षिणारूपगवादिधनेषूपहूता निमन्त्रिताः सोम्यासः सोमसम्पादिनः सोमवन्तः सोमौषधिरससम्पादनादिक्रियाकुशलाः पितरो ज्ञानिजनाः सन्ति "तद्ये सोमेनेजानास्ते पितरः सोमवन्तः" (श० २ । ६ । १ । ७) (त आगमन्तु त इह श्रुवन्तु तेऽधिब्रुवन्त्वस्मानवन्तु) पूर्वोक्तास्ते विद्वांस इहात्रागमन्त्वागच्छन्तु श्रुवन्त्वस्मत्प्रश्नान् शृण्वन्त्वधिब्रुवन्तु पश्चादुपदिशन्त्वित्थं श्रवणोपदेशाभ्यां नोऽस्मान् रक्षन्तु ॥ ५ ॥

भाषार्थ—(बर्हिष्येषु प्रियेषु निधिषूपहूताः सोम्यासः पितरः) यज्ञसम्बन्धी स्वानुकूल दक्षिणारूप गौ आदि धनों के निमित्त निमन्त्रित जो सोमवान् सोमौषधिरस

सम्पादन आदि क्रिया में कुशल विद्वान् ज्ञानिजन हैं (त आगमन्तु त इह श्रुवन्तु तेऽधिब्रुवन्त्वस्मानवन्तु) वे विद्वान यहां आवें, हमारे प्रश्नों को सुनें उपदेश दें या समाधान करें इस प्रकार श्रवण और उपदेश से हमारी रक्षा करें ॥ ५ ॥

शिक्षा—यज्ञ में क्रिया कुशल विद्वानों को निमन्त्रित करना तथा उनसे अपने विविध प्रश्नों का समाधान और उपदेश सुनना सत्कारार्थ इच्छानुकूल गौ आदि पदार्थ दक्षिणा में देने चाहियें ॥ ५ ॥

आच्या जानु दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे ।
मा हिंसिष्ट पितरः केनचिन्नो यद्व आगः पुरुषता कराम ॥ ६ ॥

(पितरो जान्वाच्य विश्वे दक्षिणतो निषद्येमं यज्ञमभिगृणीत) हे पितरो विद्वांसो जान्वाच्योभे जानुनी प्रसार्यासनं विधायेत्यर्थः । जानु 'सुपां सुलुक्पूर्वसवर्ण०' (अष्टा० ७ । १ । ३९) अनेन द्विवचनप्रत्ययस्य लुक् । यूयं विश्वे सर्वे दक्षिणतो दक्षिणायां दिशि दक्षिणपार्श्वे वा निषद्य स्थित्वेमं यज्ञमभिगृणीत स्वीकुरुत 'विदुषां वामपार्श्वे स्थेयमिति शिष्टाचारः । ब्रह्मासनं च दक्षिणायां कल्प्यते' (यद्व आगः पुरुषता कराम केनचिन्नो मा हिंसिष्ट) यद्वो युष्माकमागोऽपराधं सत्कारे दक्षिणायां वा पुरुषतया कराम कुर्मः । अत्र सामान्ये काले लोट् शप् च विकरणव्यत्ययेन । केनचिदप्यपराधेन नोऽस्मान् मा हिंसिष्ट न हिंस्थेति वयं जानीमः ॥६॥

भावार्थ—(पितरो जान्वाच्य दक्षिणतो निषद्येमं यज्ञं विश्वेऽभिगृणीत) हे विद्वान् लोगो ! दोनों जानुओं को आसन की विधि से फैला कर तुम सब दक्षिण दिशा या दक्षिण भाग में बैठ कर इस यज्ञ को स्वीकार करो क्योंकि विद्वानों के वामपार्श्व में बैठने का शिष्टाचार है अथवा यज्ञ में ब्रह्मा का आसन दक्षिण में होता है (यद्व आगः पुरुषता कराम केनचिन्नो मा हिंसिष्ट) और जो तुम्हारे प्रति हम कोई शिष्टाचार या दक्षिणा आदि में मनुष्य होने से गलती करें तो उस किसी भी गलती के कारण तुम लोग हिंसा नहीं करते हो यह हम जानते हैं ॥७॥

शिक्षा—विद्वानों को दक्षिण भाग में आसन पर बिठला कर यज्ञ का आरम्भ करना चाहिये । अपनी भूल के सम्भव होने से उनसे नम्रता पूर्वक गलती को स्वीकार करना और क्षमा मांगना चाहिये ॥६॥

आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत त इहोर्जं दधात ॥ ७ ॥

(अरुणीनामुपस्थ आसीनासः पितरो दाशुषे मर्त्याय रयिं धत्त तस्य पुत्रेभ्यो वस्वः प्रयच्छत त इहोर्जं दधात) "अरुण्यो गाव उषसाम्" (नि० २ । २८) इति प्रामाण्यात् । अरुणीनामुषोऽन्तर्गतप्रकाशधाराणामुपस्थ उपस्थाने उपरिभाग आसीनासः संलग्नाः संश्रिताः पितरः सूर्यरश्मयो दाशुषे यजमानाय मर्त्याय मनुष्याय रयिं वीर्यं बलमित्यर्थः । "वीर्यं वै रयिः" (श० १३ । ४ । २ । १३) धत्त धारयन्तु । पुरुषव्यत्ययः । तस्य पुत्रेभ्यः सन्तानेभ्यो वस्वः प्राणान् प्रयच्छत प्रयच्छन्तु ददतु । "प्राणा वाव वसवः" (छान्दो० अ० ३।१६।१) पूर्वोक्तास्त उषःकालसम्बद्धाः सूर्यरश्मय इहोभयत्र यजमाने तत्पुत्रेषु चोर्जं रसं दधात धारयन्तु । "ऊर्ग्रसः" (निरु० ६ । ४३) "ऊर्ग्वै रसः" (श० ५ । १ । २ । ८) अन्यत्रापि वेदेऽरुणीशब्दस्योषःशब्देन सह सम्बन्धस्तथा पितरः सूर्यरश्मय इति विज्ञानं प्रतीयते "आवहन्त्यरुणी ज्योतिषागान्मही चित्रा रश्मिभिश्चेकिताना । प्रबोधयन्ती सुविताय देव्युषा ईयते सुयुजा रथेन" (ऋ० ४।१४।३) "अधा यथा नः पितरः परासोऽग्न ऋतमासुषाणाः । शुचीदयन्दीधितिमुक्थशासः क्षामाभिन्दन्तो अरुणीरपव्रन्" (ऋ० ४ । २ । १६) ॥७॥

(जातवेदस्ते या रंहयः शोचयो याभिरन्तरिक्षं दिवमापृणासि) जातवेदः सर्वत्र विद्यमानो योऽग्निरस्ति ते तस्य "पदार्थविद्यासामर्थ्यात् प्रथमपुरुष-परिणामः" या रंहयो गन्त्र्यो गतिस्वभावाः शोचयो ज्वाला दीप्तयः 'शोचतिर्ज्वलतिकर्मा' (नि० १।१७) याभिर्ज्वालाभिर्दीप्तिभिर्वा विद्युद्रूपाभिरन्तरिक्षं तथा च रश्मिरूपाभिर्दि-

वमापृणास्यासमन्तात्पूरयति । 'पृ पालनपूरणयोः' (ता अजं यन्तमनु समृण्वताम्) ता उभयविधा दीप्तयो विद्युद्रूपा रश्मिरूपाश्चाजं जीवात्मानं यन्तं पुनर्जन्मप्राप्त्यर्थं गच्छन्तमनु समृण्वतां सम्प्राप्नुवन्तु सम्प्राप्नुवन्तीति सिद्धान्तः । 'ऋणु गतौ' तनादि । (अथेतराभिः शिवतमाभिः शृतं कृधि) अथानन्तर्ये । जीवनिर्गमनानन्तरमितराभिः पार्थिवरूपाभिः शिवतमाभिः शमनस्वभावाभिर्दीप्तिभिः शृतं पक्वं हविः कृधि कुरु करोति ॥ ६ ॥

भाषार्थ—(जातवेदस्ते या रंहयः शोचयो याभिरन्तरिक्षं दिवमापृणासि) सर्वत्र विद्यमान अग्नि की जो गतिशील ज्वालायें या दीप्तियां हैं जिन विद्युद् रूप दीप्तियों से अन्तरिक्ष तथा रश्मिरूप दीप्तियों से द्युलोक को पूरण करती है (ता अजं यन्तमनु समृण्वताम्) वे दोनों दीप्तियां पुनर्जन्म में जाते हुए अजन्मा जीवात्मा से सङ्गत होती हैं (अथेतराभिः शिवतमाभिः शृतं कृधि) जीव के निकल जाने के अनन्तर तीसरी पार्थिव दीप्तियों द्वारा जो पृथिवी पर हैं उनसे इसको हवि बनाती है ॥६॥

शिक्षा—पार्थिव, वैद्युत, सौररूप अग्नि की तीनों दीप्तियां पुनर्जन्म और दाहक्रिया में उपयोगी बनती हैं । द्युलोक की रशिरूप दीप्तियां तथा अन्तरिक्ष की विद्युत् रूप दीप्तियां अजन्मा जीव के पुनर्जन्म की सहायक बनती हैं और पृथिवी लोक की ज्वालाएं प्रेत-शरीर को जला देती हैं ॥ ६ ॥

अवसृज पुन····॥१०॥	(देखो सूक्तसमन्वय)	ऋग्वेद १०।१६।५	(पृष्ठ २६)
अति द्रव श्वा····॥११॥	,,	ऋग्वेद १०।१४।१०	(पृष्ठ ३३)
यौ ते श्वानौ····॥१२॥	,,	ऋग्वेद १०।१४।११	(पृष्ठ ३४)
उरुणसावसु तृ····॥१३॥	,,	ऋग्वेद १०।१४।१२	(पृष्ठ ३५)
सोम एकेभ्यः····॥१४॥	,,	ऋग्वेद १०।१५४।१	(पृष्ठ ७०)
ये चित्पूर्व ऋ····॥१५॥	,,	ऋग्वेद १०।१५४।४	(पृष्ठ ७२)
तपसा ये अना····॥१६॥	,,	ऋग्वेद १०.१५४।२	(पृष्ठ ७१)
ये युध्यन्ते प्रध····॥१७॥	,,	ऋग्वेद १०।१५४।३	(पृष्ठ ७२)
सहस्रणीथाःक····॥१८॥	,,	ऋग्वेद १०।१५४।५	(पृष्ठ ७३)

तात्पर्य—निम्न पांच मन्त्रों (१४-१८) में यह दर्शाया है कि ब्रह्मचारी गृहस्थ, वानप्रस्थ और संन्यासी तथा ब्राह्मण, क्षत्रिय आदि वर्ण या किसी भी

अवस्था में कोई भी मनुष्य हो, उसके मर जाने पर धर्म ही साथ जाता है या सहायक बनता है ॥

(ऋतसाताः = ऋतं सत्यं न्यायः सातः सम्भक्तो यैस्ते ऋतसाताः = न्यायशील क्षत्रिय जन । ऋतजाताः = ऋतेन विद्यया ज्ञानेन जाताः प्रसिद्धास्ते ऋतजाताः = ब्राह्मण) ।

स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी ।
यच्छास्मै शर्म सप्रथाः ॥ १९ ॥

(अस्मै पृथिवी निवेशन्यनृक्षरा स्योना भव) अस्मै मरणासन्नाय जीवाय पृथिव्येषा पृथिवी निवेशनी पुनर्जन्मनि स्थानदात्री, अनृक्षराऽकण्टका स्योना सुखा-भव भवतु भवति । पुरुषव्यत्ययः (अस्मै सप्रथाः शर्म यच्छ) पूर्वोक्ताय जीवाय सप्रथाः सर्वतः पृथु शर्म शरणं यच्छ यच्छतु यच्छति वा । "अनृक्षरा अकण्टका स्योना सुखा शर्म शरणं यच्छ यच्छतु" (निरु० ९ । ३२) ॥ १९ ॥

भाषार्थ—(अस्मै पृथिवी निवेशन्यनृक्षरा स्योना भव) इस मरणासन्न जीव के लिये यह पृथिवी पुनर्जन्म में स्थान देती है और नये ढङ्ग से कटङ्करहित सुखदायक होती है (अस्मै सप्रथाः शर्म यच्छ) पूर्वोक्त जीव के लिये सर्वतः फैली हुई शरण देती है ॥ १९ ॥

शिक्षा—देहान्त के अनन्तर पुनर्जन्म में पृथिवी सब प्रकार से अनुकूल सुख का हेतु बनती है ॥ १९ ॥

असंबाधे पृथिव्या उरौ लोके निधीयस्व ।
स्वधा याश्चकृषे जीवन् तास्ते सन्तु मधुश्चुतः ॥२०॥

(पृथिव्या असंबाध उरौ लोके निधीयस्व) अत एव पुनर्जन्मन्ययं जीवः पृथिव्या भूमेरसंबाधे संबाधारहिते शुद्धे नूतने, उरौ विस्तृते लोके स्थाने निधीयस्व निधत्तां निधत्ते स्थिरीभवतीत्यर्थः (जीवन् याः स्वधाश्चकृषे) जीवन् सन् याः स्वधा यान् स्वधारणधर्मान् चकृषे कृतवान् (ता मधुश्चुतस्ते सन्तु) हे जीव ! तास्ते धर्मा मधुश्चुतस्ते तुभ्यमुत्तमफलश्च्यावयितारः सन्तु सन्ति ॥ २० ॥

भाषार्थ—(पृथिव्या असंबाध उरौ लोके निधीयस्व) इसलिये पुनर्जन्म में यह जीव भूमि के विस्तृत स्थान में कहीं बाधारहित नूतन शरीर में स्थिर होता है (जीवन् याः स्वधाश्चकृषे) जीते हुये स्वजीवन सम्बन्धी जो २ कर्म किये हैं (ता मधुश्चुतस्ते सन्तु) हे जीव ! वे सब तेरे लिये उचित फल के देने वाले हैं ॥ २० ॥

शिक्षा—पुनर्जन्म में जीव नये शरीर में पैदा होता है और स्वकृतकर्म फलों को प्राप्त करता है ॥ २० ॥

ह्वयामि ते मनसा मन इहेमान् गृहाँ उप जुजुषाण एहि ।

सं गच्छस्व पितृभिः सं यमेन स्योनास्त्वा वाता उपवान्तु शग्माः ॥२१॥

(मनसा ते मन इह ह्वयामि) मरणासन्नो जीवो यदा मृत्योरतिदुःखमसहमानोऽन्तस्तिष्ठति तदान्तर्यामी जगदीशस्तं म्रियमाणमाश्वासयतीव यद् हे म्रियमाणजीव ! मनसा कारणाख्येन समष्टिरूपेण मनसा ते तव मनः शरीरधारणस्यनिमित्तम् "मनः कृतेनायात्यस्मिन् शरीरे" (प्रश्नो० ३ । ३) इहास्मिन् काले ह्वयाम्याकर्षामि तस्मान्मा शोचीस्त्वम् (जुजुषाण इमान् गृहानुपेहि) अत एव जुजुषाणोऽत्यन्तं प्रीयमाणः सन्निमान् गृहान् पृथिव्यन्तरिक्षद्युस्थानान्युपेह्युपगच्छ "वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्" (कठो० १ । १ । ७) (पितृभिः सङ्गच्छस्व यमेन सम्) तस्मात्त्वं पितृभिर्निजरक्षकैः सूर्यरश्मिभिः सह सङ्गच्छस्व सङ्गतो भव पुनर्यमेन सूर्येण सह सङ्गतो भव (शग्माः स्योना वातास्त्वोपवान्तु) शग्माः शक्तिप्रदास्तथा स्योनाः सुखदाश्च वाता वायवस्त्वोपवान्तु त्वामुपगच्छन्तु प्राप्नुवन्तु प्राप्ता भवन्तीत्यर्थः ॥ २१ ॥

भाषार्थ—(मनसा ते मन इह ह्वयामि) मरणासन्न जीव जब मृत्यु के अतिदुःख को सहन न करता हुआ अन्दर रह जाता है तब अन्तर्यामी जगदीश देव उस मरते हुये जीव को आश्वासन देता है कि हे जीव ! कारण नामक समष्टिरूप मन से मैं तेरा मन जो कि शरीरधारण का निमित्त है उस को इस समय आकर्षित करता हूँ खींचता हूँ जो तेरे सुख दुःख का साधन है । अतः तू शोक मत कर (जुजुषाण इमान् गृहानुपेहि) इस लिये तू अत्यन्त प्रसन्न होता हुआ इन पृथिवी, अन्तरिक्ष और द्युस्थान के यमगृहों यानि वायुपटलों को प्राप्त हो (पितृभिः संगच्छस्व यमेन सम्) वहां तू सूर्य की किरणों के साथ संगत हो पुनः सूर्य के साथ संगत हो (शग्माः स्योना वातास्त्वोपवान्तु) शक्तिप्रद तथा सुखकारक हवाऐं तुझे प्राप्त हों या पुनर्जन्मार्थ शक्ति और सुख के निमित्त बन कर तुझे प्राप्त होती हैं ॥ २१ ॥

शिक्षा—मृत्यु के अन्तिम अतिदुःख में परमात्मा जीव को आश्वासन देता है, उस के सुखदुःख अनुभव के साधन मन को खींच लेता है पुनः जीव वायु के पटलों में से गुज़रता हुआ सूर्यकिरणों तथा सूर्यसे सहयोग तथा जीवन काल को प्राप्त हो पुनर्जन्म के लिये शक्ति तथा सुख के निमित्त हवायें उसको प्राप्त होती हैं ॥ २१ ॥

उत् त्वा वहन्तु मरुता उदवाहा उदप्रुतः ।

अजेन कृण्वन्तः शीतं वर्षेणोक्षन्तु बालिति ॥२२॥

(उदवाहा उदप्रुतो मरुतस्त्वोद्वहन्तु) उदवाहा उदकवाहा जलवाहका उदप्रुत उदकप्रेरका मरुतो वायवस्त्वामुद्वहन्तूर्ध्वं नयन्तु तव शान्त्यर्थं पुनर्जन्मार्थञ्च मेघपर्यन्तं प्रापयन्तु–प्रापयन्ति वा (अजेन वर्षेण शीतं कृण्वन्तो बालित्युक्षन्तु) अजेन गतिशीलेन 'अज गतौ' वर्षेण जलवर्षणेन शीतं त्वां शान्तं तापरहितं शुद्धं गतदुःखस्मृतिकं कृण्वन्तः सम्पादयन्तो बालित्युक्षन्तु बालित्येवं धाराप्रपातध्वनिं कृत्वा पृथिव्यां सिञ्चन्तु ॥ २२ ॥

भाषार्थ—(उदवाहा उदप्रुतो मरुतस्त्वोद्वहन्तु) हे जीव ! जलवाहक तथा जलप्रेरक हवायें तुझे ऊपर ले जावें, मेघ पर्यन्त पहुँचावें या पहुँचाती हैं (अजेन वर्षेण शीतं कृण्वन्तो बालित्युक्षन्तु) गतिशील जलवर्षण से तुझको ठण्डा, शान्त, दुःखस्मृतिरहित करती हुई धाराध्वनि के साथ पृथिवी पर सिञ्चन करती हैं ॥२२॥

शिक्षा—जलवाहक और जलप्रेरक हवाओं के द्वारा मेघमण्डल तक पहुँच कर जीव पुनः वर्षा द्वारा मरणदुःख के ताप से शान्त हुआ पुनर्जन्मार्थ नीचे आता है ॥ २२ ॥

उदह्वमायुरायुषे क्रत्वे दक्षाय जीवसे ।
स्वान् गच्छतु ते मनो अधा पितॄँरुपद्रव ॥२३॥

(आयुरुदह्वमायुषे) हे म्रियमाण जीव ! अहमीश्वरस्तवायुरुदह्वमुदकर्षयमायुषे पुनरायुषे पुनर्जन्मने । तस्मात् (जीवसे दक्षाय क्रत्वे ते मनः स्वान् गच्छतु) जीवसे जीवितुमपरजन्महेतुभूतं जीवनं धारयितुं दक्षाय प्राणाय क्रत्वेऽपानाय ते मनः स्वान् धर्मान् गच्छतु । 'जीवसे' इत्यत्र "तुमर्थे सेसेनसेऽसेन्" (अष्टा० ३।४।६) इति तुमर्थेऽसे प्रत्ययः । अत एव प्रत्ययस्वरेण मध्योदात्तः । "प्राणो वै दक्षः, अपान क्रतुः" (तै० सं० २ । ५ । २ । ४) (अधा पितॄँरुपद्रव) देहपातानन्तरं पितॄन् सूर्यरश्मिसहितानृतूनुपद्रवोपगच्छ ॥२३॥

भाषार्थ—(आयुरुदह्वमायुषे) हे म्रियमाण जीव ! मैं ईश्वर तेरी आयु को फिर आयु देने अर्थात् पुनर्जन्म के लिये खींचता हूँ । अतः (जीवसे दक्षाय क्रत्वे ते मनः स्वान् गच्छतु) जीवन यानि दूसरा जन्म प्राप्त करने के लिये प्राण और अपान के लिये तेरा मन निज धर्मों को प्राप्त हो (अधा पितॄँरुपद्रव) पुनः सूर्यरश्मिसहित ऋतुओं को तू प्राप्त हो ॥२३॥

शिक्षा—जीव पुनर्जन्मार्थ पूर्व आयु को छोड़ दूसरी आयु को प्राप्त होता है और उसके लिये जीवनशक्ति के प्राण अपान के व्यवहार को धारण करता है एवं

मन स्वधर्मों कार्यों के अनुसार काम करने लगता है और जीव सूर्यरश्मियों के सहित ऋतुओं को प्राप्त हो जाता है ॥२३॥

मा ते मनो मासोर्माङ्गानां मा रसस्य ते ।
मा ते हास्त तन्वः किं चनेह ॥ २४ ॥

(मा ते मनो मा तेसोर्माङ्गानां मा रसस्य मा ते तन्वः किञ्च नेह हास्त) हे म्रियमाण जीव ! ते मन इह मा हास्त तव मन इह सम्मुखोपस्थिते पौनर्जन्मिके देहे त्वां मा हास्त न त्यजति तथा तेऽसोः प्राणस्य, अङ्गानां रसस्य, तन्वः शरीरस्य किञ्चनापि वस्तु त्वां न त्यजति प्रत्युत प्राप्यमाणदेहे सर्वं लप्स्यसीत्यभिप्रायः ॥ २४ ॥

भाषार्थ—(मा ते मनो तेसो र्माङ्गानां मा रसस्य मा ते तन्वः किञ्चनेह हास्त) हे म्रियमाण जीव तेरा मन इस सम्मुख उपस्थित पुनर्जन्म की देह से तुझ को नहीं त्याग सकता और न ही तेरा प्राण तेरे अङ्ग तेरे शरीर की रसधारण शक्ति या तेरे शरीर की कोई भी वस्तु तुझे त्याग सकती है ॥ २४ ॥

शिक्षा—देहान्त के पश्चात् दूसरे शरीर में पूर्व शरीर के समान मन, प्राण और अङ्ग आदि सभी देह के पदार्थ मिलते हैं ॥ २४ ॥

मा त्वा वृक्षः संबाधिष्ट मा देवी पृथिवी मही ।
लोकं पितृषु वित्त्वैधस्व यमराजसु ॥ २५ ॥

(वृक्षस्त्वा मा संबाधिष्ट) वृक्षो वृक्षयो जीवनिवासः संसारः "पश्यतात्र ग्रन्थे सूक्तसमन्वये ऋ० १०।१३५ सूक्तम्" त्वा त्वां मा संबाधिष्ट न बाधते न पीडयत्यनुकूलो भवतीत्यर्थः (देवी पृथिवी मही मा) देवी दिव्यगुणा सत्येषा पृथिवी प्रथिता विस्तीर्णाऽपि मही भूमिस्त्वां मा संबाधिष्ट न बाधते ऽनुकूलैव भवतीति मन्तव्यम् (यमराजसु पितृषु लोकं वित्त्वैधस्व) यमः सूर्यो राजा स्वामी येषां तेषु पितृष्वृतुसहचरिततद्रश्मिषु वर्तमानः सन् लोकमपरं शरीरं वित्त्वैधस्व गर्भशरीरं प्राप्य तद्वर्धय। "यस्मिन् वृक्षे सुपलाशे······यमो रश्मिभिरादित्यः (निरु० १२ । २९) ॥ २५ ॥

भाषार्थ—(वृक्षस्त्वा मा संबाधिष्ट) हे जीव ! यह जीवों का निवास स्थान जो संसार है वह तुझे कुछ पीड़ा नहीं देता अपि तु तेरे अनुकूल है (देवी पृथिवी मही मा) और यह दिव्यगुण युक्त विस्तृत भूमि भी तेरे अनुकूल है (यमराजसु पितृषु लोकं वित्त्वैधस्व) सूर्य जिन का राजा स्वामी या अधिष्ठाता है उन ऋतु सहचरित किरणों में वर्तमान होकर शरीर को प्राप्त कर के उस के अन्दर बढ़ और उस को बढ़ा ॥ २५ ॥

शिक्षा—जन्म धारण करने के लिये संसार और पृथिवी सब प्रकार से अनुकूल बनते हैं अत एव जीव एक देह को छोड़कर सूर्य की किरणों के साथ ऋतु नियम से दूसरे शरीर को प्राप्त करता है पुनः उस के साथ बढ़ता है ॥ २५ ॥

यत्ते अङ्गमतिहितं पराचैरपानः प्राणो य उ वा ते परेतः ।
तत्ते सङ्गत्य पितरः सनीडा घासाद्घासं पुनरावेशयन्तु ॥ २६ ॥

(प्राणोऽपानो य उ वा ते परेतः पराचैर्यत्तेऽङ्गमतिहितम्) हे जीव ! य उ ते प्राणोऽपानः प्रेतस्तव शरीरात्पृथग्गतस्तस्मादेव कारणाच्च पराचैरिन्द्रियैः सह ते तव यदङ्गं शरीरमतिहितमतिगतमतीतं त्वत्तः पृथग्भूतम् "पराञ्चि खानि व्यतृणत्स्वयम्भूः" (कठ० २ । १ । १) इति प्रामाण्यादत्र पराचैरिन्द्रियैरिति बोध्यम् (सनीडाः पितरः सङ्गत्य घासाद् घासं ते तत्पुनरावेशयन्तु) सनीडाः समानस्थानाः परस्परं सङ्गच्छमानास्ते ह्यृतुसहचरितरश्मयः सङ्गत्य त्वया सङ्गत्य घासाद् घासं यथैकस्मात्पक्वाद् घासशरीराद् बीजमपरं घासशरीरमावेशयन्ति तद्वत्त्वां ते तदपरं शरीरमावेशयन्त्वावेशयन्तीत्यर्थः ॥ २६ ॥

भाषार्थ—(प्राणोऽपानो य उ वा ते परेतः पराचैर्यत्तेऽङ्गमतिहितम्) हे जीव ! यह जो तेरा प्राण और अपान तेरे शरीरसे निकल गया है इसी कारण इन्द्रियोंसे युक्त तेरा शरीर तुझसे पृथक् हो गया है (सनीडाः पितरः सङ्गत्य घासाद् घासं ते पुनरावेशयन्तु) इकट्ठी होकर वे ऋतुसहचरित सूर्यकिरणें तुझसे संगत होकर जैसे एक पक घाससे बीजकी शक्ति लेकर दूसरे घासमें पहुँचाते हैं, उसी तरह तुझको दूसरे शरीर तक पहुँचाते हैं ॥ २६ ॥

शिक्षा—प्राण-अपान शक्ति के निकल जाने से देह और आत्मा का वियोग हो जाता है । पुनः वह आत्मा बीजशक्तिके रूपमें होकर दूसरे शरीर में प्रविष्ट होकर शरीर धारण करता है ॥ २६ ॥

अपेमं जीवा अरुधन् गृहेभ्यस्तं निर्वहत परिग्रामादितः ।
मृत्युर्यमस्यासीद्दूतः प्रचेता असून् पितृभ्यो गमयाञ्चकार ॥२७॥

(जीवा इममपारुधन्) जीवा रोगजन्तव इमं शवमपारुधन्नाक्रामन्नित्यर्थः । स्तस्मात् (तं गृहेभ्यो निर्वहत) तं शवं गृहेभ्यो यूयं निर्वहत निर्गमयत (इतो ग्रामात्परि) इतोऽस्माद् ग्रामान्नगरात् परिवहत दूरं नयत (मृत्युर्यमस्य दूत आसीत् पितृभ्योऽसून् गमयाञ्चकार) हे प्रेतबन्धुजनाः ! यूयं मा शोचत न च

विचारयत एष मृत्युस्तु यमस्य स्वायत्तीकर्तुः सूर्यस्य प्रचेताः प्राणापहरणायाति-सावधानो दूत आसीदस्ति । 'सामान्यकाले लङ् यमो रश्मिभिरादित्य इत्युक्तमेव पूर्वम्' यश्च पितृभ्य सूर्यरश्मिभ्योऽस्य मृतजनस्यासून् प्राणान् गमयाञ्चकार प्रेषयमास ॥२७

भाषार्थ—(जीवा इममपारुधन्) रोगजन्तुओं ने इस शव को घेर लिया है इस लिये (तं गृहेभ्यो निर्वहत) उसको घरों से तुम बाहर निकालो (इतो ग्रामात्परि) इस ग्राम या नगर से दूर ले जाओ (मृत्युर्यमस्य दूत आसीत् पितृभ्योऽसून् गमयाञ्चकार) हे प्रेतबन्धुओ ! तुम शोच विचार मत करो, यह मृत्यु तो सब को स्वाधिकार में करने वाले सूर्यका अतिसावधान दूत था जो इसके प्राणों को किरणों के अन्दर लीन कर गया ॥२७॥

शिक्षा—शरीर से आत्मा के निकलते ही रोगजन्तुओं का उस पर आक्रमण हो जाता है। अतः उसको जल्दी घरसे निकाल कर नगरसे बाहर ले जाना चाहिये। घरके लोगोंको सान्त्वना देनी चाहिये कि यह तो अनिवार्य क्रम है। सविता सूर्यदेव जिसको उत्पन्न करता है उसे मृत्युके मुखमें भी पहुँचाता है ॥ २७ ॥

ये दस्यवः पितृषु प्रविष्टा ज्ञातिमुखा अहुतादश्चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्टानस्मात् प्रधमाति यज्ञात् ॥२८॥

(ये दस्यवो ज्ञातिमुखाः पितृषु प्रविष्टाः) ये दस्यव उपक्षयकारिणः पूर्वोक्ता रोगजन्तवो ज्ञातिमुखा बन्धुकारणाः पितृषु रुग्णस्य पालकजनेषु प्रविष्टाः (अहुतादश्चरन्ति) अथ च येऽहुतादोऽहुतस्यापक्वशवमांसस्यात्तारश्चरन्ति (ये परापुरो निपुरो भरन्ति) ये परापुरः शवस्य बहिश्छिद्रान् निपुरोऽन्तश्छिद्रान् भरन्ति धारयन्ति निवसन्ति (अग्निष्टानस्माद् यज्ञात्प्रधमाति) अग्निस्तान् दस्यूनस्मात् क्रियमाणाद् यज्ञात्प्रधमाति प्रधर्षयति ॥ २८ ॥

भाषार्थ—(ये दस्यवो ज्ञातिमुखाः पितृषु प्रविष्टाः) जो स्वास्थ्यनाशक रोगजन्तु प्रेतके बन्धुत्व निमित्तसे उसके पालक, सेवा आदि कर्म करने वाले महानुभावों में घुस गये हैं (अहुतादश्चरन्ति) और जो अभी अन्त्येष्टि-पाक से पूर्व कच्चे शवमांस को खाने वाले घूमते हैं (ये परापरो निपुरो भरन्ति) जो शवमांस के बाहरी छिन्द्रों तथा भीतरी स्थानों में आश्रय लेते हैं (अग्निष्टानस्मात् यज्ञात् प्रधमाति) अग्नि उन रोगजन्तुओं को इस सुगन्ध के साथ होने वाले यज्ञ से भगाता या नष्ट करता ह ॥ २८ ॥

शिक्षा—मृत पुरुषके पालक जनोंमें सहयोग द्वारा जो स्वास्थ्यनाशक

कृमि घुस गये हैं और जो कृमि शवके बाहर भीतर चक्कर लगाते रहते हैं, यज्ञ द्वारा अग्नि उन कृमियोंको अस्त व्यस्त कर देती है ॥ २८ ॥

संविशन्त्विह पितरः स्वा नः स्योनं कृण्वन्तः प्रतिरन्त आयुः।
तेभ्यः शकेम हविषा नक्षमाणा ज्योग् जीवन्तः शरदः पुरूचीः ॥ २९ ॥

(स्वाः पितरो नः स्योनं कृण्वन्त आयुः प्रतिरन्त इह संविशन्तु) स्वा निजाः पितरः प्राणा नोऽस्मभ्यं स्योनं सुखं कृण्वन्तः कुर्वन्त आयुः प्रतिरन्तो विस्तारयन्त इहास्मिन् शरीरे संविशन्तु सन्तिष्ठन्ताम् (तेभ्यो हविषा नक्षमाणाः पुरूचीः शरदो ज्योग् जीवन्तः शकेम) तेभ्यस्तान्। 'विभक्तिव्यत्ययः'। हविषा हविर्दानेनाहुत्या नक्षमाणाः प्राप्नुवन्तः पुरूचीर्बह्वीः शरदो बहूनि वर्षाणीत्यर्थः, ज्योक् चिरञ्जीवन्तः शकेम शक्नुयाम ॥ २९ ॥

भाषार्थ—(स्वाः पितरो नः स्योनं कृण्वन्त आयुः प्रतिरन्त इह संविशन्तु) हमारे अपने प्राण हमारे लिये सुख देते हुए, आयु का विस्तार करते हुए इस शरीर में स्थिर रहें (तेभ्यो हविषा नक्षमाणाः पुरूचीः शरदो ज्योग् जीवन्तः शकेम) उन को हम हविर्दान से संगत होते हुए बहुत वर्षों तक चिरजीवन को सम्पादन कर सकें ॥ २९ ॥

शिक्षा—उत्तम सुगन्धियुक्त पदार्थों के होम से जीवनवृद्धि होती है ॥ २९ ॥

यां ते धेनुं निपृणामि यमु ते क्षीर ओदनम्।
तेना जनस्यासो भर्ता योऽत्रासदजीवनः ॥ ३० ॥

(यां ते धेनुं निपृणामि) 'अत आरभ्य कतिपयमन्त्रपर्यन्तं विलापो विधीयते' यां ते तव धेनुं दुग्धदात्रीं गां निपृणामि वयं निपृणामो निपूरयामो दुह्मः। 'पृ पालनपूरणयोः, अतो निपूरणमत्र दोहनम्—दुह प्रपूरणे यथा'। दुग्ध्वा च (क्षीरे यमु त ओदनम्) यस्या धेन्वाः क्षीरे दुग्धे यमु ते तुभ्यमोदनं स्थापयामः। प्रायेण वृद्धो वा युवादीरुग्णीभूत्वा वा म्रियते तादृशाय म्रियमाणाय केवलं दुग्धमोदनसहितं वा दीयत इति चिकित्सामतमत एव विलापेन स्मर्यते (तेना जनस्य भर्ताऽसो योऽत्राजीवनोऽसत्) तेना तया धेन्वा दुग्धदात्र्या गवा त्वं हे म्रियमाण प्रेष्ठ! जनस्य मनुष्यस्य भर्ता पोषकाऽसो भवसि योऽत्राजीवनो जीविकारहितोऽसदस्ति ॥ ३० ॥

भाषार्थ—(यां ते धेनुं निपृणामि) 'इस मन्त्र से लेकर कुछ मन्त्रों तक

विलाप है। हे मेरे म्रियमाण प्रेत ! जिस तेरी दूध देने वाली गायको हम प्रतिदिन दुहते हैं और दुहकर (क्षीरं यमु त ओदनम्) जिसके दूध में चावल, सागूदाना आदि डालते हैं। प्रायः बूढ़ा वा रोगी होकर जवान आदि मरता है उसके लिये केवल दूध या चावलसहित दूध दिया जाता है यह चिकित्सा शास्त्रका नियम है सागूदाना भी चावल की जाति है' (तेना जनस्य भर्ताऽसो योऽत्राजीवनोऽसत्) उस दूध देने वाली गाय से हे मेरे प्यारे ! तू उस मनुष्यका पोषक बना है जो यहां जीवन रहित है ॥ ३० ॥

शिक्षा—सम्बन्धी लोगों को चाहिये कि मृत व्यक्तिकी जो दूध वाली गाय घर में है उस गायको किसी गरीब आदमीको दे दे। न केवल गाय ही अपितु यह एक उदाहरणमात्र है। जो मृतक पुरुषकी प्रिय वस्तु प्रति दिन सामने आने वाली हो उसको भी किसी गरीबको दे देना चाहिये क्योंकि सामने रहने से मृतककी याद विलापके रूपमें बारम्बार न सता सके ॥ ३० ॥

अश्वावतीं प्र तर या सुशेवार्क्षाकं वा प्रतरं नवीयः ।
यस्त्वा जघान वध्यः सोऽस्तु मा सो अन्यद्विदत भागधेयम् ॥३१॥

(अश्वावतीं प्रतर या सुशेवा) हे मम प्रिय प्रेत ! त्वमश्वावतीमश्वयुक्तां गन्त्रीं प्रतर प्रप्लवस्वारोहेत्यर्थः। याऽश्वावती गन्त्री सुशेवा सुसुखाऽस्ति। "शेवं सुखनाम" (नि० । ३ । ६) (ऋक्षाकं वा नवीयः प्रतरम्) 'क्वचिदृक्षाकामिति पाठः' ऋषगतावस्माद् धातोरौणादिकः सः प्रत्ययः किच्च' "स्नुवृश्चिकृत्यृषिभ्यः कित्" (उणादि० ३ । ६६) ऋक्षाकमश्वैर्विना सचक्रं हस्तयानम्, नवीयःप्र तरं वा सद्योनिर्मितं शय्यावदारोहणस्थानं लोकेऽरथीनाम्ना प्रसिद्धं वाऽऽरोह (यस्त्वा जघान स वध्योऽस्तु) हे प्राणप्रिय प्रेत ! यस्त्वां हतवान् स वध्यो वधयोग्यो भवतु (सोऽन्यद् भागधेयं मा विदत) स जनोऽन्यद् भागधेयं शुभफलं मा विदत न लभताम् ॥ ३१॥

भाषार्थ—(अश्वावतीं प्रतर या सुशेवा) हे मेरे प्यार प्रेत ! तू अश्वयान पर चढ़ जो कि सुन्दर सुखदायक है (ऋक्षाकं वा नवीयः प्रतरम्) बग़ैर घोड़े के पहिये की हाथगाड़ी पर या अभी बनाई शय्या जैसी आरोहण गद्दी 'अरथी=रथी' पर चढ़ (यस्त्वा जघान स वध्यो ऽस्तु) हे प्राणप्रिय प्रेत ! हा, जिस ने तुझे मारा हो वह अवश्य वध करने योग्य होगा (सोऽन्यद्भागधेयं मा विदत) वह किसी भी शुभ फल को प्राप्त न कर सकेगा ॥ ३१ ॥

शिक्षा—देहान्त के पश्चात् प्रेत को घोड़ागाड़ी, हाथ से चलने वाली चक्र-

गाड़ी या तत्काल बनाई हाथों पर उठाई जाने वाली शय्या के समान गद्दी (जिसे आज कल अरथी कहते हैं) तीनों में से किसी एक पर शव को रखकर शव स्थान में ले जाना चाहिये। कदाचित् किसी उस के शत्रु ने शस्त्र या विष आदि से उसे मार दिया हो तो उस मारने वाले को ईश्वर की ओर से अवश्य दण्ड मिलेगा। तथा यहां पर भी न्यायालय में दण्ड मिलना चाहिये ॥ ३१ ॥

यमः परोवरो विवस्वान् ततः परं नातिपश्यामि किंचन।
यमे अध्वरो अधिमे निविष्टो भुवो विवस्वानन्वाततान ॥ ३२ ॥

(यमः परो विवस्वानवरः) यमो विश्वकालः परोऽस्ति यतो हि सर्वमपि भुवनमस्य वशे वर्त्ततेऽयं च विवस्वान्सूर्यो यस्माद्यमस्याभिव्यक्तिर्जाता सोऽवरोऽस्ति पृथिव्यादिलोकस्यैकस्मिन् पार्श्वे विद्यते (ततः परं किञ्चन नातिपश्यामि) ततो यमात्परमग्रे नातिपश्याम्यतिक्रम्य न किञ्चन पश्यामि (यमे मेऽध्वरोऽधिनिविष्टः) यमे विश्वकाले ममाध्वरः शरीरयज्ञोऽधिनिविष्टो वश्यं प्राप्यावस्थितः (विवस्वान् भुवोऽन्वाततान) विवस्वान् सूर्यस्तु भुवो भूलोकानन्वाततान स्वरश्मिभिराततो विद्यते ॥ ३२ ॥

भाषार्थ—(यमः परो विवस्वानवरः) विश्वकाल बहुत दूर तक फैला हुआ है और यह सूर्य केवल दृश्यमात्र ही है क्योंकि प्रत्येक पृथिवी आदि लोक के सम्मुख ही दिखाई देता है, सर्वत्र नहीं (ततः परं किञ्चन नातिपश्यामि) उस विश्वकाल से परे कुछ भी उल्लाङ्घ कर नहीं देखता हूँ (यमे मेऽध्वरोऽधिनिविष्टः) उसी विश्वकाल के अन्दर मेरा शरीर रूप यज्ञ वश्य हो कर अवस्थित है (विवस्वान् भुवोऽन्वाततान) और सूर्य तो केवल भूमिलोकों के सम्मुख स्वकिरणों से डटा हुआ है ॥३२॥

शिक्षा—विश्वकाल सारे भुवनमें व्याप्त है और सूर्य एक देश में ही। यद्यपि सूर्य से वह काल प्रकट होता है किन्तु प्रकटताके साथ ही व्याप जाता है जिस प्रकार जलाशयमें ढेला फेंकनेसे प्रकट चक्र-क्रिया सारे जलाशयमें व्याप्त हो जाती है और ढेला केवल एक देश में ही रहता है। तथा काल चक्रके अन्दर प्रत्येक प्राणी आदि की स्थिति है ॥ ३२ ॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णामदधुर्विवस्वते।
उताश्विनावभरद्य यत् तदासीदजहादु द्वा मिथुना सरण्यूः ॥३३॥

(मर्त्येभ्योऽमृतामपागूहन्) मर्त्येभ्यो मनुष्येभ्यो मनुष्याणां प्रयोजनायेत्यर्थः। अमृतां सूर्येण सह सदा वर्तमानां सरण्यूमपागूहन् सूर्यरश्मयस्तिरोहिताम-

कुर्वन् (विवस्वते सवर्णां कृत्वाऽदधुः) विवस्वत आदित्याय सवर्णां समानवर्णां प्रभां कृत्वा ते हि रश्मयः स्वाश्रयेऽदधुर्धारितवन्तः (सरण्यूरश्विनावभरद् यत्तदासीद् द्वा मिथुनाजहात्) सरण्यूरुषाऽश्विनावहोरात्रौ गर्भरूपेणाधारयद् यत्तद् गर्भरूपमासीत् तौ द्वौ मिथुनावजहात् त्यक्तवती ॥ ३३ ॥

भाषार्थ—(मर्त्येभ्योऽमृतामपागूहन्) प्राणियोंके लिये सूर्यके साथ सदा वर्तमान उषाको किरणों ने हटा दिया (विवस्वते सवर्णां कृत्वाऽदधुः) आदित्य के लिये समान रूपकी प्रभा बनाकर उन किरणों ने स्वाश्रय में धारण करी (सरण्यूरश्विनावभरद् यत्तदासीत् द्वा मिथुनाजहात्) उषा ने अश्वियों दिन रात को गर्भरूप से धारण किया, वह जो गर्भरूप था वह दो मिथुन के रूप में था जिसे उषा ने त्यागा था ॥ ३३ ॥

शिक्षा—सूर्यकिरणें प्रभात की उषा को हटाती हैं पुनः एक प्रभा का प्राणिमात्रके लिये प्रकाश करती हैं और इसीसे दिन रात की प्रकटता होती है ॥३३॥

ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः ।
सर्वांस्तानग्न आवह पितॄन् हविषे अत्तवे ॥३४॥

(ये निखाता ये परोप्ता ये दग्धा ये चाद्धितास्तान् सर्वान् पितॄन् हविषेऽत्तवेऽग्न आवह) 'पूर्वमन्त्रे सूर्यरश्मीनां प्राधान्यं प्रदर्शितमत्र मन्त्रे तेषामुपयोगा अथ च भेदा वर्ण्यन्ते' यत्-ये पितरः सूर्यरश्मयो निखाताः पृथिव्यां ध्रुवीकृताः स्थिरीकृता यै रश्मिभिरियं पृथिवी नियन्त्रिताऽऽकाशे तिष्ठति, ये च रश्मयः पृथिव्यामन्तर्हिताः सन्तः सुवर्णादिधातूनोषधिबीजं च सम्पादयन्ति । ये परोप्ताः । ये सूर्यरश्मयोऽप्सु प्रसरिता यै रश्मिभिरेता आपः प्रसरणशीलाः सन्ति । 'निर्वपनं नीचैः स्थापनं यथा भवति तथा परावपनं प्रसरणमुच्यते "निर्वपेद् भुवि" (मनु० ३ । ६२) भोजनांशं नीचैः स्थापयेदित्यर्थः ।' ये दग्धाः । ये सूर्यरश्मयोऽग्नौ दीप्ताः । यै रश्मिभिरयमग्निर्दीपनधर्मः । 'दह धातुरत्र दीप्तौ । उक्तं च मुख्यशब्दार्थसमन्वये' "दहिक् दीप्तौ" (कविकल्पद्रुमः) ये चोद्धिताः । ये च सूर्यरश्मयो वायावुदीरिता यैरश्मिभिर्वायुरुच्चलनस्वभावः । तथाभूतान् तान् सर्वानपि पितॄन् सूर्यरश्मीनग्ने हविषेऽत्तवे मृतदेहरूपं हविरत्तुं ग्रहीतुमावह समन्तात्प्रापय प्रापयति वा । अग्नौ दहनक्रिययाऽस्मिन् मृतदेहे ये पृथिवीजलाग्निवायूनामंशास्तान् तत्र तत्र नियुक्ताः सूर्यरश्मयो नीत्वा यथास्थानं करिष्यन्ति । इति वैज्ञानिको विलापः ॥३४॥

भाषार्थ—(ये निखाता ये परोप्ता ये दग्धा ये चाद्धितास्तान् सर्वान् पितॄन्

हविषेऽत्तवेऽग्न आवह) पूर्व मन्त्र मेंसूर्य किरणों की प्रधानता दिखाई गई है इस मन्त्र में उन के उपयोगों और भेदों का वर्णन है कि निखात=जो सूर्य की किरणें पृथिवी में स्थिर की गई हैं जिन किरणों के द्वारा यह पृथिवी नियन्त्रित हुई आकाश में वर्तमान है तथा पृथिवी में घुसकर सुवर्णादि धातुओं और ओषधियों के बीजों का सम्पादन करती हैं। परोप्त=जो सूर्य किरणें जल में फैली हुई हैं जिनके द्वारा जल फैलने का स्वभाव रखता है। दग्ध=जो सूर्यकिरणें अग्नि में दीप्त हैं जिनके द्वारा अग्नि दीप्ति-धर्म रखती है। उद्धित=और जो सूर्य किरणें वायु में गमन करती हैं जिन के द्वारा वायु गति करती है। ऐसी उन सब किरणों को अग्नि मृतदेहरूप हवि के ग्रहण करने के लिये आकर्षण करती हैं। अग्निदहनक्रिया से मृत देह में जो पृथिवी, जल, अग्नि और वायु के अंश हैं उन को वहां २ नियुक्त हुई सूर्यकिरणें ले जाकर यथास्थान कर देती हैं। यह एक वैज्ञानिक विलाप है॥ ३४॥

शिक्षा—अन्त्येष्टि-क्रियासे मृत देहमें जो पृथिवी, जल, अग्नि और वायुके अंश होते हैं उन सबको सूर्य किरणें यथास्थान पहुँचा देती हैं॥ ३४॥

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते।
त्वं तान् वेत्थ यदि ते जातवेदः स्वधया यज्ञं स्वधितिं जुषन्ताम्॥३५॥

(ये अग्निदग्धा ये अनग्निदग्धा दिवो मध्ये स्वधया मादयन्ते) येऽग्निदग्धा अग्निरिव दीप्ता विद्युत्वन्तःसूर्यरश्मयो ये अनग्निदग्धास्तद्विपरीता मेघवन्तः सूर्यरश्मयो दिवो मध्ये द्युलोकस्य मेघवत आकाशस्य मध्ये। "द्यौर्वा अपां सदनं दिवि ह्यापः सन्नाः" (श० ७।५।२।२६) तथा च मन्त्रः "दिवो वृष्टिमीरयत" स्वधयोदकेनोदकवृष्ट्या "स्वधेत्युदकनाम" (नि० १।१२) मादयन्ते प्राणिनो मादयन्ते तर्पयन्ति जीवयन्तीत्यर्थः। मद तृप्तियोगे चुरादिः (जातवेदस्त्वं तान् वेत्थ यदि ते स्वधया स्वधितिं यज्ञं जुषन्ताम्) जातवदस्त्वमग्निरेषः। 'पुरुषव्यत्ययः'। तान् सूर्यरश्मीन् वेत्थ लभते यदि यस्मात्ते स्वधयोदकेन वृष्टिजलसम्पादनहेतुना स्वधितिं यज्ञं दुःखनिमित्तं वज्ररूपं प्रेतदहनयज्ञमन्त्येष्टिं जुषन्तां सेवन्ते। "स्वधितिर्वज्रनाम" (नि० २।२०)॥ ३५॥

भाषार्थ—(ये अग्निदग्धा ये अनग्निदग्धा दिवो मध्ये स्वधया मादयन्ते) जो अग्नि के तुल्य दीप्त बिजलीके अन्दर सूर्य किरणें हैं और जो उनसे विपरीत मेघ के अन्दर रहने वाली रश्मियां हैं एवं ये दोनों प्रकारकी किरणें मेघ वाले आकाश के मध्य उदक-वृष्टिसे प्राणियोंको जीवनदेती हैं (जातवेदस्त्वं तान् वेत्थ यदि ते स्वधया स्वधितिं यज्ञं जुषन्ताम्) यह अग्नि उन सूर्य रश्मियोंको प्राप्त करती है इस

लिये वे सूर्य किरणें जलवृष्टि सम्पादनके हेतु इस वज्ररूप यज्ञ यानि दुःख से की जाती हुई अन्त्येष्टि-यज्ञ का सेवन करते हैं ॥ ३५ ॥

शिक्षा—अग्नि द्वारा जितना भी होम किया जाता है वह सब मेघमण्डल में सूर्य की उन किरणों के वश हो जाता है जो मेघ और बिजली में वर्तमान होती है अतः अन्त्येष्टि में सुगन्धित द्रव्य का होम करना आवश्यक है ॥ ३५ ॥

शं तप मातितपो अग्ने मा तन्वं तपः ।
वनेषु शुष्मो अस्तु ते पृथिव्यामस्तु यद्धरः ॥ ३६ ॥

(अग्ने शं तप मातितपो मा तन्वं तपः) हे अग्ने ! एतं प्रेतदेहं शं तप शान्तं तप घनीभूय दह वर्णव्यत्ययेन वा सन्तप सम्यग्दह मातितपोऽतिक्रम्योल्लंघ्य वायुवेगादिना प्रेतदेहात्पृथग्भूय न दह तन्वं मा तपो न कस्यापि तन्वं शरीरं दह- 'तथा च सायणस्तन्वः शरीराणि अस्मत्सम्बन्धीनि मा तप मा धाक्षीः' (वनेषु ते शुष्मोऽस्तु) वनेषु पूर्वक्तेषु सूर्यरश्मिषु ते तव जाज्वल्यमानस्य शुष्मः शोषणबलमस्तु गच्छत्वित्यर्थः । "वनं रश्मिनाम" (नि० १ । ५) यद्वा वनेषु काष्ठेषु तद्धितवद्व्या- पारो यथा "अथापि चर्म च श्लेष्मा च । गोभिः सन्नद्धो असि वीलयस्व" (निरु० २ । ५) शुष्मो बलं दहनबलमस्तु भवतु । "शुष्मेति बलनाम" (निरु० २ । ६) (यद्धरः पृथि- व्यामस्तु) हे अग्ने ! यच्च ते हरो ज्वलनं ज्वलनचिह्नं वा तत्पृथिव्यामस्तु तिष्ठत्वि- त्यर्थः । यतो हि पार्थिवस्त्वम् । "हरो ज्वलतो नामधेयम्" (नि० १ । १७) ॥ ३६ ॥

भाषार्थ—(अग्ने शं तप मातितपो मा तन्वं तपः) हे अग्नि ! इस प्रेत देह को तू घनी होकर भली भांति जला । वायु के वेग आदि से विचलित होकर मत जला और न ही किसी के शरीर को जला (वनेषु ते शुष्मो अस्तु) तेरा वस्तु- सुखाने का सारा बल पूर्वमन्त्र में कही हुई सूर्यकिरणों को प्राप्त हो या तेरा बल काष्ठों के अन्दर रहे (यद्धरः पृथिव्यामस्तु) और जो तेरा ज्वलन या ज्वलनचिह्न पृथिवी पर रहे ॥ ३६ ॥

शिक्षा—अन्त्येष्टि की अग्नि इस प्रकार जलनी चाहिये कि वह एक दम न जल जावे किन्तु शव को धीरे २ भली प्रकार जला सके और वायु के वेग से अग्नि तिरछी लपट से न उड़ जावे । इसके लिये उचित चिता बनानी चाहिये । अग्नि का बल लकड़ियों में खूब रहे और काष्ठ इतना अधिक हो कि भूमि पर जले का चिह्न भी खूब हो जावे ॥ ३६ ॥

ददाम्यस्मा अवसानमेतद्य एष आगन् मम चेदभूदिह ।
यमश्चिकित्वान् प्रत्येदाह ममैष राय उपतिष्ठतामिह ॥ ३७ ॥

(य एष इहागन्मम चेदभूदस्मा एतदवसानं ददामि) य एष मृतजीव इहान्तरिक्ष आगन्नागतः सन् मम चेद्यतोऽभूदस्मै जीवाय पुनर्जन्मतः पूर्वमेतत्कतिपयदिनपर्यन्तमवसानं ददामि (यमश्चिकित्वानेतत्प्रत्याहैष इह मम राय उपतिष्ठताम्) यमः कालो जानन् सन्नेतद्वचनं प्रत्याह प्रतिवदतीव स्पष्टं घोषयतीव यदेष जीव इहात्र मम राय उत्पत्तिसम्बन्धिबीजराशिधन उपतिष्ठतामुपस्थितो भवतु ॥ ३७ ॥

भाषार्थ—(य एष इहागन् मम चेदभूदस्मा एतदवसानं ददामि) जो यह मृत पुरुषका जीवात्मा इस अन्तरिक्षमें आया और जिससे यह मेरा बन गया है अतः इसके लिये पुनर्जन्मसे पूर्व कुछ दिनोंका विश्राम देता हूँ (यमश्चिकित्वानेतत्प्रत्याहैष इह मम राय उपतिष्ठताम्) काल सचमुच सावधान सा हुआ ऐसी घोषणा करता है कि यह आत्मा यहां मेरे उत्पत्तिसम्बन्धी बीजराशिरूप धनोंमें ठहर जावे ॥ ३७ ॥

शिक्षा—आत्मा शरीरसे निकल कर फिर दूसरे जन्ममें जाने से पहले कुछ कालतक अन्तरिक्षमें विश्राम करता है और उत्पत्ति के नियमरूप बीजधर्म को प्राप्त करता है ॥ ३७ ॥

इमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥३८॥

(इमां मात्रां मिमीमहे यथापरं न मासातै) इमां मात्रां मीयते कालेन या तां स्वजीवनमात्रां जीवनावयवमिति यावत् । यावानप्यवशिष्यते तावन्तमेव स्वजीवनावयवं मिमीमह एवं कालेन निर्गमयेम यथाऽपरं किन्चन बाधनं पापं वा जीवनस्य शेषावयवे न मासातै समाविशेत् । अत आरभ्य निर्बाधनं निष्पापं वा स्वजीवनावयवं निर्वर्तयामः । तच्च (शते शरत्सु पुरा नो) अथ च शते शरत्सु शतवर्षेभ्यः पुरा पूर्वं नो नैव मरणं स्यादित्यर्थः ॥ ३८ ॥

भाषार्थ—(इमां मात्रां मिमीमहे यथापरं न मासातै) इस जीवन की मात्रा को, जोकि सौ वर्ष होनेमें शेष है, हम इस समयसे ऐसी गुजारें जिससे कोई दूसरा विघ्न या पाप न आसके (शते शरत्सु नो पुरा) और सौ वर्षोंके मध्यमें हमारी मृत्यु न हो सके ॥ ३८ ॥

शिक्षा—मनुष्योंको इस प्रकार अपने जीवनमें व्यवहार करना चाहिये कि

जिससे सौ वर्ष की आयु के बीच में मृत्यु न होसके तथा पूर्ण सुखपूर्वक रहसकें ॥ ३८ ॥

प्रेमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥३९॥

अपेमां मात्रां " " ॥४०॥

वीमां मात्रां " " ॥४१॥

निरिमां मात्रां " " ॥४२॥

उदिमां मात्रां " " ॥४३॥

समिमां मात्रां " " ॥४४॥

(प्र–अप–वि–निर्–उद्–सम्) एषामुपसर्गाणां मिमीमह इत्यनेन क्रियापदेन सह सम्बन्धः । तस्मात् । प्रमिमीमहे तमेव जीवनावयवं प्रमाणीकृत्य व्यतीतं कुर्म आदर्शं संस्थाप्य वर्तामहे । अपमिमीमहे संसारप्रपञ्चेभ्यः पृथक् कृत्वा व्यतीतं कुर्मः । विमिमीमहे विशेषेण वर्तामहे । निर्मिमीमहे निश्चित्याश्रयामः । उन्मिमीमह उत्कर्षेण नयामः । सम्मिमीमहे सम्यगाचरामः ॥ ३९–४४ ॥

भाषार्थ—(प्र–अप–वि–निर्–उद्–सम् 'मिमीमहे') हम अपनी सौ वर्ष की आयु को, प्रमाणित या आदर्शरूप बनाकर व्यतीत करें । संसार के प्रपञ्चों से पृथक् रख कर बितायें । विशेष बनाकर बरतें । उद्देश्य का निश्चय करके जीवें । उच्च लाभ उठाते हुये ले जावें । सम्यक् आचरण से वर्तें जिससे सौ वर्ष के अन्दर कोई विघ्न या मृत्यु न सता सके यह भाव प्रत्येक मन्त्र में पहले के समान है ॥ ३९–४४ ॥

शिक्षा—मनुष्य को अपनी सौ वर्ष की जीवनयात्रा अपने और दूसरों के लिये अत्युत्तम और सुखमय बनानी चाहिये ॥ ३९–४४ ॥

अमासि मात्रां स्वरगामायुष्मान् भूयासम् ।

यथापरं न मासातै शते शरत्सु नो पुरा ॥ ४५ ॥

(मात्राममासि स्वरगामायुष्मान् भूयासम्) निजजीवनयात्राममासि नियमितवान्, अत एव स्वः सुखमगां प्राप्तवान्, एवं संश्चायुष्मान् भूयासम् 'अग्रे पूर्ववत् ' ॥ ४५ ॥

भाषार्थ—(मात्राममासि स्वरगामायुष्मान् भूयासम्) स्वजीवन की शेष आयु को मैंने नियमित कर लिया है इसी लिये मैं सुख को प्राप्त हुआ हूँ और आयु को धारण कर सका हूँ । 'आगे पहले के समान जानो' ॥ ४५ ॥

शिक्षा—जब मनुष्य अपनी जीवन यात्राकी उपयोगिता विविध प्रकारों से बना लेता है तभी उसको सुखी और जीवित समझना चाहिये ॥ ४५ ॥

प्राणो अपानो व्यान आयुश्चक्षुर्दृशये सूर्याय ।
अपरिपरेण पथा यमराज्ञः पितॄन् गच्छ ॥ ४६ ॥

(प्राणो अपानो व्यान आयुश्चक्षुरपरिपरेण पथा दृशये सूर्याय यमराज्ञः पितॄन् गच्छ) प्राणोऽपानो व्यान आयुश्चक्षुरपरिपरेण निष्पापेन सरलेन पथा मार्गेण दृशये दर्शकाय सूर्याय । 'दृशेः किप्रत्ययः' । यमराज्ञो यमः सूर्यो राजा येषां तान् सूर्यरश्मीन् गच्छ गच्छतु ॥ ४६ ॥

भाषार्थ—(प्राणो अपानो व्यान आयुश्चक्षुरपरिपरेण पथा दृशये सूर्याय यमराज्ञः पितॄन् गच्छ) प्राण, अपान, व्यान, आयु और आंख ये सब पाप रहित सरल मार्गसे दर्शक सूर्यके लिये, तथा सूर्य जिन का स्वामी है उन सूर्य किरणों को प्राप्त होवें ॥ ४६ ॥

शिक्षा—ठीक २ नियम से रहते हुये पुनर्जन्म में प्राण आदि उत्तमावस्था में रश्मियों द्वारा प्राप्त होते हैं ॥ ४६ ॥

ये अग्रवः शशमानाः परेयुर्हित्वा द्वेषांस्यनपत्यवन्तः ।
ते द्यामुदित्याविन्दत लोकं नाकस्य पृष्ठे अधि दीध्यानाः ॥४७॥

(ये अग्रवोऽनपत्यवन्तो द्वेषांसि हित्वा शशमानाः परेयुः) येऽग्रवोगन्तारोऽनपत्यवन्तोऽगृहस्था ब्रह्मचारिणो द्वेषांसि वैराणि हित्वा त्यक्त्वा शशमाना अन्तर्यामिणमीश्वरं शंसमानाः परेयुर्म्रियन्ते (ते दीध्याना द्यामुदित्य नाकस्य पृष्ठे अधि लोकमविन्दत) ते दीध्याना ध्यानवन्तो योगिनो द्यामुदित्य द्योतमानमाकाशमुल्लङ्घ्य नाकस्य पृष्ठेऽधि सूर्यस्य पृष्ठोपरि लोकं ब्रह्मलोकमविन्दत प्राप्नुवन्ति । तथा चोक्तम्—"सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा" (मुण्डक०२।११) "नाक आदित्यो भवति नेता रसानां नेता भासां ज्योतिषाम्" (निरु० २ । १४) ॥ ४७ ॥

भाषार्थ—(ये अग्रवोऽनपत्यवन्तो द्वेषांसि हित्वा शशमानाः परेयुः) यह जो प्रगतिशील ब्रह्मचारी जन वैरभाव को त्यागकर केवल परब्रह्म की स्तुति करते हुए मर जाते हैं (ते दीध्याना द्यामुदित्य नाकस्य पृष्ठे अधिलोकमविन्दत) वे योगी महानुभाव प्रकाशमय आकाश को उल्लांघ कर सूर्यके ऊपर ब्रह्मलोकको प्राप्त होते हैं ॥ ४७ ॥

शिक्षा—ब्रह्मचर्यपूर्वक जीवनयात्रा करते हुए प्राण त्यागने से ब्रह्मप्राप्ति होती है ॥ ४७ ॥

उदन्वती द्यौरवमा पीलुमतीति मध्यमा ।
तृतीया ह प्रद्युरिति यस्यां पितर आसते ॥४८॥

(उदन्वती द्यौरवमा) या-उदन्वत्युदकवती मेघवती द्यौर्द्युतिरस्ति सा अवमा । "द्योतमाना द्यौः" (निरु० २ । २०) "दिवो वृष्टिमीरयत" इति प्रामाण्यात् (पीलुमतीति मध्यमा) पीलुमती परमाणुमती द्यौर्द्युतिर्मध्यमा तदग्रे । 'पीलुः परमाणुरिति मेदनी ।' (तृतीया ह प्रद्यौरिति यस्यां पितर उपासते) तृतीया ह प्रद्यौः प्रकृष्टा द्युतिरस्ति यस्यां पितरो रश्मय उपासते, उपतिष्ठन्ते 'पितरो रश्मय इत्युक्तम्' एवं सूर्यदीप्तयस्त्रिधा सन्ति ॥ ४८ ॥

भाषार्थ—(उदन्वती द्यौरवमा) मेघवाली द्युति ज्योति सबसे पहली है (पीलुमतीति मध्यमा) परमाणुवाली ज्योति उससे आगे है (तृतीया ह प्रद्यौरिति यस्यां पितर उपासते) तीसरी अत्युच्च ज्योति है जिसमें किरणें रहती हैं । एवं सूर्य की ज्योति तीन प्रकार से विभक्त होती है ॥ ४८ ॥

शिक्षा—पृथिवी से लेकर मेघमण्डल तक सूर्य की एक दीप्ति है । मेघमण्डल से ऊपर परमाणुमण्डल में दूसरी है और इससे भी आगे अत्यन्त प्रकाशमान स्वयं दीप्ति तीसरी है । वह सूर्यरूप दीप्ति किरणों का आश्रय है ॥ ४८ ॥

ये नः पितुः पितरो ये पितामहा य आविविशुरुर्वन्तरिक्षम् ।
य आक्षियन्ति पृथिवीमुत द्यां तेभ्यः पितृभ्यो नमसा विधेम ॥४९॥

(ये नः पितुः पितरो ये पितामहाः) ये नोऽस्माकं पितुः सूर्यस्य "एष वै पिता य एष सूर्यस्तपति" (श० १४ । १ । ४ । १५) पितरो मासा ये पितामहा ऋतव सन्ति । तथा चादित्यपुराणे "मासाश्च पितरो ज्ञेया ऋतवश्च पितामहाः" (य उर्वन्तरिक्षमाविविशुः) ये पूर्वोक्ता मासा ऋतवश्चोर्वन्तरिक्षे विस्तृतमन्तरिक्षमाविशन्ति (ये पृथिवीमुत द्यामाक्षियन्ति) ये पृथिवीं द्यां चाधितिष्ठन्ति (तेभ्यः पितृभ्यो नमसा विधेम) तेभ्यः पूर्वोक्तेभ्यो मासेभ्य ऋतुभ्यश्च नमसा यज्ञेन विधेमाचरेम । "यज्ञो वै नमः" (श० ७ । ४ । १ । ३) " ॥ ४६ ॥

भाषार्थ—(ये नः पितुः पितरो ये पितामहाः) जो हमारे पितृतुल्य सूर्य के मास और ऋतुएं हैं (य उर्वन्तरिक्षमाविविशुः) जो पूर्वोक्त मास और ऋतुएं विस्तृत आकाश में अपने प्रभाव वर्तमान हैं (ये पृथिवीमुत द्यौमाक्षियन्ति) जो

पृथिवी और द्यौ में भी वर्तमान होते हैं (तेभ्यः पितृभ्यो नमसा विधेम) उन मासों और ऋतुओं के लिये यज्ञ से आचरण करते हैं ॥ ४६ ॥

शिक्षा—मासों तथा ऋतुओं का प्रभाव पृथिवी अन्तरिक्ष और द्यौ पर पड़ता है उनको यज्ञ द्वारा अनुकूल बनाया जा सकता है ॥ ४६ ॥

इदमिद् वा उ नापरं दिवि पश्यसि सूर्यम् ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥५०॥

(भूम इदमिद् वा उ नापरम्) भूमे हे चयनभूमे चिते ! इदमिद् वा उ इदमेव हि मरणं यच्च सर्वेषामनिवार्यं यतोऽपरं न परिणामरूपं किञ्चित् (दिवि सूर्यं पश्यसि) त्वमेतत्प्रेतशरीरं दिवीव सूर्यं पश्यसि । अत्र लुप्तोपमालङ्कारः । अदित्यामिव स्थितं सूर्यं पश्येः । "अदितिर्द्यौरदितिरन्तरिक्षम्" (यजुः २५ । २३) इति प्रसिद्धश्रुतेः । पश्यतीत्यत्र लिङर्थे लेट् (सिचा माता पुत्रं यथा) सिचा दुग्धसेचनपार्श्वेन माता पुत्रमिवाचरन्ती (एनमभ्यूर्णुहि) एनं शवमभ्यूर्णुह्यभ्याच्छादय । चितामध्ये पूर्णतया शवस्थापनसिद्धान्तः ॥ ५० ॥

भावार्थ—(भूमे इममिद् वा उ नापरम) हे चयनभूमे चिता ! यह ही मरण सब जीवोंके लिये अनिवार्य है इससे आगे और कोई परिणामका रूप नहीं है यही जीवनका अन्तिम परिणाम है (दिवि सूर्यं पश्यसि) तू इस प्रेत शरीर को उषा में स्थित सूर्य के तुल्य अपने अन्दर देख (सिचा माता पुत्रं यथा) दूधसीञ्चने के पार्श्व से माता पुत्रको जिस प्रकार आश्रय देती है वैसे तू भी (एनमभ्यूर्णुहि) इसको आच्छादन कर । चिता में पूर्णतया शव को स्थापन करनेका सिद्धान्त है ॥ ५० ॥

शिक्षा—मौत से आगे और कोई परिणाम प्राणिदेहका नहीं है, यही अन्तिम परिणाम है । मृत देहको चितामें इस प्रकार छिपा देना चाहिये जिस प्रकार उषा में सूर्य या करवटमें माता पुत्र को छिपाये रखती है ॥ ५० ॥

इदमिद्व वा उ नापरं जरस्यन्यदितोपरम् ।
जाया पतिमिव वाससाभ्येनं भूम ऊर्णुहि ॥५१॥

(भूम इदमिद् वा उ नापरं जरस्यन्यदितोऽपरम्) हे चयनभूमे चिते ! अस्य प्रेतस्येदमेव हि मरणं जरसि जरायां हीनावस्थायां वृद्धावस्थायां वाऽस्ति, इतोऽतोऽपरमन्यन्न भवति (जाया पतिमिव वाससाऽभ्येनं भूम ऊर्णुहि) जाया पतिमिव वाससा त्वमाच्छादय ॥ ५१ ॥

भाषार्थ—(भूम इदमिद् वा उ नापरं जरस्यन्यदितोऽपरम्) हे चयनभूमि चिता ! यही मरण सब जीवोंके लिये अनिवार्य हैं इससे आगे और कोई परिणाम का रूप नहीं है। जो कि वृद्धावस्था के अन्तमें भी यही है इससे भिन्न नहीं है। (जाया पतिमिव वाससाभ्येनं भूम ऊर्णुहि) पत्नी जिस प्रकार पति को वस्त्र से छिपा लेती है एवं तू इस शवको आच्छादित कर ॥ ५१ ॥

शिक्षा—प्राणीकी वृद्धावस्था या जीर्णावस्था दूर होने पर उक्त मरणरूप परिणाम होता है। चितामें शवको छिपानेका प्रकार वस्त्र ढांपनेके तुल्य होना चाहिये ॥ ५१ ॥

विशेष—ऊपर दिये ५० और ५१ इन दोनों मन्त्रोंमें एक अलङ्कारका रूपक है। उषा जिस प्रकार सूर्यकी प्रकटताके कारण उसकी माता तथा उषासे दिन का आविर्भाव होने से सूर्य की पत्नी है। एवं उषा के तुल्य प्रकाशमान चिता मानो जीव के पुनर्जन्मके हेतु माता और वर्तमान जन्मकी समाप्तिमें आश्रय देनेसे पत्नी कही गयी है ॥ ५१ ॥

अभित्वोर्णोमि पृथिव्या मातुर्वस्त्रेण भद्रया ।
जीवेषु भद्रं तन्मयि स्वधा पितृषु सा त्वयि ॥५२॥

(भद्रया पृथिव्या मातुर्वस्त्रेण त्वाऽभ्यूर्णोमि) भद्रया भद्रायाः सुखप्रदायाः। 'विभक्ति व्यत्ययः' पृथिव्या मातुर्मातृतुल्याया वस्त्रेण काष्ठरूपेण वाससा त्वामूर्णोम्याच्छादयामि (जीवेषु भद्रं तन्मयि पितृषु स्वधा सा त्वयि) जीवेषु जीवलोकेषु पृथिव्यामित्यर्थः। यद्भद्रं भोगः स मय्यस्तु, पितृषु सूर्यरश्मिषु स्वधा जलरूपः सूक्ष्मो भागः स त्वय्यस्तु ॥ ५२ ॥

भाषार्थ—(भद्रया पृथिव्या मातुर्वस्त्रेण त्वाऽभ्यूर्णोमि) सुखप्रदा पृथिवी माता के काष्ठरूप वस्त्र से मैं तुझको छिपाता हूँ (जीवेषु भद्रं तन्मयि पितृषु स्वधा सा त्वयि) जीवलोक पृथिवी में जो भद्र है वह मुझमें हो और सूर्य किरणों में जो जलरूप सूक्ष्म भाग है वह तेरे निमित्त हो ॥ ५२ ॥

शिक्षा—चिता में प्रेतदहन हो जानेसे इसका और जीवित सम्बन्धियों का वियोग हो जाता है। जीवित सम्बन्धी पार्थिवभोग भोगने वाला होता है और मृतजन सूर्य किरणोंमें सूक्ष्म जलके भोग भोगता है ॥ ५२ ॥

अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्विलोकम् ।
उपप्रेष्यन्तं पूषणं यो वहात्यञ्जोयानैः पथिभिस्तत्र गच्छतम् ॥५३॥

(अग्नीषोमा पथिकृता देवेभ्यः स्योनं रत्नं लोकं विदधथुः) अग्नीषोमौ यमवरुणौ पथिकृतौ जन्ममरणकर्तारौ सन्तौ देवेभ्यो विद्वद्भ्यो ब्राह्मणेभ्यः स्योनं सुखं रत्नं रमणीयं लोकमन्तरिक्षलोकं विदधथुर्विधत्ताम् (यः पूषणमुपप्रेष्यन्तं तत्राञ्जोयानैः पथिभिर्गच्छतम्) यश्च लोकोऽन्तरिक्षलोकः पूषणमुप सूर्यमुप सूर्यस्यसमीपं प्रेष्यन्तं मृतजीवं प्रेरयन्तं प्रवृत्तस्तत्राञ्जोयानैः सुगमयानैर्गच्छतं गमयताम ॥ ५३ ॥

भाषार्थ—(अग्नीषोमा पथिकृता देवेभ्य स्योनं रत्नं लोकं विदधथुः) यम और वरुण प्राणीके अन्त और जन्मके करने वाले बनकर विद्वान् ब्राह्मणोंके लिये सुखकारी और रमणीय अन्तरिक्ष लोकका सम्पादन करते हैं (यः पूषणमुपप्रेष्यन्तं तत्राञ्जोयानैः पथिभिर्गच्छतम्) यह जो अन्तरिक्ष लोक सूर्यके समीप मृत जीवको भेजते हुए मध्य में पड़ता है, वहां सुगम गतियों से ले जावें ॥ ५३ ॥

शिक्षा—प्रत्येक प्राणी को यम और वरुण अथवा आग्नेय और सौम्य तत्व मरण-जन्मके हेतु होकर संसार में घुमाते हैं परन्तु धार्मिकों के लिये वे सुख की यात्राका सम्पादन करते हैं ॥ ५३ ॥

पूषा त्वेतश्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परिददत् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥५४॥

(अनष्टपशुर्भुवनस्य गोपा पूषा त्वा विद्वानितः प्रच्यावयतु) अनष्टपशुरनष्टा पशवो दर्शनहेतवो रश्मयो यस्य स भुवनस्य ब्रह्माण्डस्य गोपा रक्षकः पूषा सूर्यः । "अथ यद्रश्मिपोषं पुष्यति तत्पूषा भवति" (निरु० १२ । १७) त्वां विद्वान् लब्धवान् सन् । 'विद्लृ लाभे' । इतः स्थानात् प्रच्यावयतु पुनर्जन्मप्राप्तये प्रेरयति (सोऽग्निस्त्वैतेभ्यो देवेभ्यः सुविदत्रियेभ्यः पितृभ्यः परिददत्) स एव सूर्योऽग्निरितरेभ्यो दिव्यगुणेभ्यः सुविदत्रियेभ्यः सुज्ञाननिमित्तेभ्यः प्रकाशधर्मेभ्यः पितृभ्यो रश्मिभ्यः परिददत् परिददातु ॥ ५४ ॥

भाषार्थ—(अनष्टपशुर्भुवनस्य गोपाः पूषा त्वा विद्वानितः प्रच्यावयतु) निरन्तर और सदा वर्तमान दर्शनहेतु किरणों वाला, ब्रह्माण्डका रक्षक सूर्य तुझको प्राप्त करते ही इस स्थानसे पुनर्जन्मके लिये प्रेरित करता है (सोऽग्निस्त्वैतेभ्यो देवेभ्यः सुविदत्रियेभ्यः परिददत्) वह सूर्य-अग्नि इन दिव्य गुण युक्त सुविज्ञानसाधक रश्मियों के लिये सुपुर्द करता है ॥ ५४ ॥

शिक्षा—सदा किरणों से वर्तमान सूर्य ब्रह्माण्डका रक्षक है । वही जीवों को स्वकिरणों द्वारा एक जन्मसे दूसरे जन्ममें पहुँचाता है ॥ ५४ ॥

आयुर्विश्वायुः परिपातु त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र त ईयुस्तत्र त्वा देवः सविता दधातु ॥५५॥

(विश्वायुरायुस्त्वा परिपातु) तत्र पुनर्जन्मनि विश्वायुः सम्पूर्णायुष्मदायुर्जीवनन्त्वां परिपातु सर्वतो रक्षतु (पूषा त्वा पुरस्तात् प्रपथे पातु) पूषा सूर्यस्त्वां पुरस्ताद् पूर्वदिशातः प्रपथे प्रारम्भिकमार्गाय जन्मजीवनाय पातु रक्षतु (यत्र सुकृत आसते यत्र त ईयुस्तत्र सविता देवस्त्वा दधातु) जन्मप्राप्त्यनन्तरं यत्र पृथिवीलोके सुकृतः पुण्यकृत आसतेऽथ च यत्र पुण्यशरीरे त ईयुर्गताः सन्ति तत्र सविता देवस्त्वा दधातु धारयतु स्थापयतु ॥ ५५ ॥

भाषार्थ—(विश्वायुरायुस्त्वा परिपातु) उस पुनर्जन्म में सम्पूर्ण आयु वाला जीवन तुझको सब ओरसे रक्षित रखे (पूषा त्वा पुरस्तात् प्रपथे पातु) सूर्य तेरी पूर्व दिशासे प्रारम्भिक मार्गरूप जन्म या जन्मोत्तर जीवनके लिये रक्षा करे (यत्र सुकृत आसते यत्र त ईयुस्तत्र सविता देवस्त्वा दधातु) जन्मप्राप्ति के अनन्तर जिस पृथिवीलोक में पुण्यकर्मी स्थिर होते हैं और जिस पुण्यशरीर में वे जाते हैं वहां सविता देव ! तुझ को भेज दे ॥ ५५ ॥

शिक्षा—पुनर्जन्म में जीवको पूर्णायुका फिर से अवसर मिलता है। सूर्य जन्मसे ही उसकी सारी रचनाओं में निमित्त है। पुण्यकर्मी अच्छी योनियों में जाते हैं ॥ ५५ ॥

इमौ युनज्मि ते वह्नी असुनीताय वोढवे ।
ताभ्यां यमस्य सादनं समितीश्चावगच्छतात् ॥५६॥

(असुनीताय ते वोढव इमौ वह्नी युनज्मि) असुनीतायासुनीतं गतप्राणं ते त्वां वाढवे वोढुमिमौ वह्नी अश्वौ । "वह्निरश्वनाम" (नि० १ । १४) युनज्मि योजयामि (ताभ्यां यमस्य सादनं समितीश्चावगच्छतात्) ताभ्यामश्वाभ्यां यमस्य सादनं श्मशानस्थानं समितीश्च समितिर्बान्धवजनसङ्घः "अन्येषामपिदृश्यते" अष्टा० ३ । १३७ दीर्घः । त्वं चावगच्छताद् गच्छसि । लडर्थे लोट् ॥५६॥

भाषार्थ—(असुनीताय ते वोढव इमौ वह्नी युनज्मि) हे मेरे प्रिय प्रेत ! तुझ मरे हुये को ले जाने के लिये मैं इन घोड़ों को जोड़ता हूँ (ताभ्यां यमस्य सादनं समितीश्चावगच्छतात्) उनके द्वारा श्मशान स्थान को तू जाता है और तुझे पहुँचाने के लिये बान्धवसङ्घ भी जाता है ॥ ५६ ॥

शिक्षा—प्रेत को श्मशान पहुँचाते समय बन्धु बान्धवों को भी जाना चाहिये ॥ ५६ ॥

एतत् त्वा वासः प्रथमं न्वागन्नपैतदूह यदिहाविभः पुरा ।
इष्टापूर्तमनुसंक्राम विद्वान् यत्र ते दत्तं बहुधा विबन्धुषु ॥ ५७ ॥

(एतत्प्रथमं वासस्त्वा न्वागन्) एतत्प्रथमं वासः शरीरम् । 'त्वग्वि वासः" (श० ४ । ३ । ४ । २६) त्वा त्वां न्वागन् प्राप्तम् (यदिहाविभः पुरैतदपोह) यच्छरीर-रूपं वासस्त्वमिहात्र परिवारे पूरा पूर्वमबिभो धारितवान् । 'भृ धारणपोषणयोः' । तदपोह तच्छरीररूपं वासस्त्यज त्यजसि वा (यत्र विबन्धुषु बहुधा दत्तम्) यत्र विबन्धुषु, अपरजनेषु ममत्वरहितेषु बहुधा प्रायो यद् दत्तं तत् (इष्टापूर्तं ते विद्वाननुसंक्राम) इष्टापूर्तं ते त्वदीयं स्वकीयं विद्वान् जानन् सन्ननुसंक्रामानुगच्छ ॥ ५७ ॥

भाषार्थ—(एतत्प्रथमं वासस्त्वान्वागन्) यह पूर्व शरीर जो तुझ को प्राप्त हुआ था (यदिहाबिभः पुरैतदपोह) जिस शरीर को तूने इस परिवारमें प्रथम धारण किया है उसको तू त्यागता है । अच्छा (यत्र विबन्धुषु बहुधा दत्तम्) जिन अपर जनों ममतारहित लोगोंमें परोपकार भावसे प्रायः जो तूने दान किया है। उस (इष्टापूर्तं ते विद्वाननुसंक्राम) इष्टापूर्तरूप दानको जो वस्तुतः तेरा धन है समझता हुआ उसके अनुसार आगे जन्मों वा फलोंको प्राप्त हो ॥ ५७ ॥

शिक्षा—शरीरको मनुष्य पुराने वस्त्रके तुल्य त्याग देता है और दूसरा शरीर अपने किये दान धर्मादिके अनुसार प्राप्त करता है ॥ ५७ ॥

अग्नेर्वर्म परि ···॥ ५८ ॥ (देखो सूक्तसमन्वय) ऋग्वेद १०।१६।७ (पृष्ठ २७)

दण्डं हस्तादाददानो गतासोः सह श्रोत्रेण वर्चसा बलेन ।
अत्रैव त्वमिह वयं सुवीरा विश्वा मृधो अभिमातीर्जयेम ॥ ५९ ॥

(गतासोर्हस्ताद्दण्डमाददानः श्रोत्रेण वर्चसा बलेन सह त्वमत्रैव वयं सुवीरा विश्वा अभिमातीरिह जयेम) गतासोर्गता असवः प्राणा यस्य तस्य पुरुषस्य हस्ताद्दण्डं दण्डनीतिं भूम्यादिशासनाधिकारमाददानः स्वीकुर्वन् । अथ च । श्रोत्रेणो-पदेशेन वर्चसा योग्यत्वेन बलेन धारणशक्त्या सह स्वीकुर्वन् त्वमत्रैव परिवारे राष्ट्रे संसारे वा हे प्रेतसम्बन्धिजन ! अधितिष्ठ । वयं चेहात्र त्वया सह सुवीरा विश्वा अभिमातीः सर्वानभिमन्यमानान् शत्रून् जयेम । इत्याश्वासनं सहयोगिजनानाम् ॥५९॥

भाषार्थ—(गतासोर्हस्ताद्दण्डमाददानः श्रोत्रेण वर्चसा बलेन सह त्वमत्रैव वयं सुवीरा विश्वा अभिमातीरिह जयेम) प्रेतपुरुष के हाथ से दण्डनीति शासन या

भूमि आदि का अधिकार लेता हुआ और फिर उस अधिकार को स्वाश्रय दाता प्रेत पुरुष के मरते समय के उपदेश सुनने, अपनी योग्यता और धारणशक्ति से स्वीकार करता हुआ तू हे प्रेत के सम्बन्धिजन ! इसी परिवार या राष्ट्र या संसार में स्थिर रह और हम तेरे सहयोगी जन अच्छे वीर होते हुए तेरे विरुद्ध सारे अभिमानी शत्रुओं को जीतते हैं। यह एक आश्वासन सहयोगी जनों की ओर से है ॥ ५६ ॥

शिक्षा—पिता आदिसे मरते समय उत्तराधिकारी को स्वाधिकार सम्भालने के लिये उपदेश लेना चाहिये। तथा अपनी योग्यता और शक्ति से उस अधिकार की रक्षा करनी चाहिये। अन्य सम्बन्धीजन तथा सहयोगी पुरुष उस उत्तराधिकारी को आश्वासन दें कि हम आपत्ति में तेरा साथ देंगे ॥ ५६ ॥

धनुर्हस्तादाददानो मृतस्य सह क्षत्रेण वर्चसा बलेन।
समागृभाय वसु भूरि पुष्टमर्वाङ् त्वमेह्युप जीवलोकम् ॥६०॥

(मृतस्यहस्ताद्धनुराददानः क्षत्रेण वर्चसा बलेन त्वमर्वाङ् भूरि पुष्टं वसु समागृभाय जीवलोकमुपेहि) मृतस्य योऽयं मृतस्तस्य जनस्य हस्ताद् धनुः सैन्य-बलमाददानः स्वीकुर्वन्। अथ च। क्षत्रेण क्षात्रधर्मेण क्षत्रभावेन योग्यत्वेन धारण-शक्त्या च स्वीकुर्वन् त्वं हे प्रेतसम्बन्धिजन ! अर्वाङवरस्थाने परिवारे राष्ट्रे संसारे वा बहु पुष्टं पर्याप्तं वसु धनं समागृभाय समादाय सङ्गृह्य स्वाधिकारे सम्पाद्य जीवलोकं जीवस्थानं प्रजावर्गमुपेहि प्राप्तो भव ॥ ६० ॥

भाषार्थ—(मृतस्य हस्ताद् धनुराददानः क्षत्रेण वर्चसा बलेन त्वमर्वाङ् भूरि पुष्टं वसु समागृभाय जीवलोकमुपेहि) जो यह मर चुका है उस पुरुषके हाथसे शस्त्रास्त्र सैन्य बलको स्वीकार करता हुआ और फिर क्षात्रधर्म या क्षात्रभाव, योग्यता और शक्तिसे धारण करता हुआ तू हे प्रेतसम्बन्धिजन ! अत्यन्त पर्याप्त धन को स्ववशमें करके प्रजावर्गको प्राप्त हो ॥ ६० ॥

शिक्षा—उत्तराधिकारी को चाहिये कि अपने पिता आदिसे शस्त्रास्त्र सैन्य बलका नियन्त्रण वीरता योग्यता और शक्तिके साथ सम्भाल लेवे। सहयोगी और सम्बन्धीजन इस उत्तराधिकारी को प्रजामण्डल में अधिकारी पद पर प्रसिद्ध करदें ॥ ६० ॥

समालोचना—

इस अनुवाक में विशेष समालोचनीय स्थल "ये निखाता..." मन्त्र ही है। इसके विषय में हम "प्रकीर्ण समन्वय" में चार प्रकारकी अन्त्येष्टिकी समालोचना

के समय विचार करेंगे । वहाँ से देख लेना । हां अर्थभेद तो मन्त्रों में बहुत है परन्तु समयाभाव और ग्रन्थविस्तार भय से उसके ऊपर कुछ लिखना उचित नहीं समझते ।

अथर्ववेद का० १८ अनु० ३ ।

इस अनुवाक में मृतपुरुष की युवति स्त्रीको दूसरे पुरुषके साथ नियोगका आदेश तथा श्मशान भूमिके सम्बन्धमें कुछ व्यवस्था और प्रेतदाह तथा मृत पुरुषके प्रियजनको आश्वासन निज स्वास्थ्यकी स्थिरताका ध्यान रखते हुए स्व कर्तव्य कर्मों में लगनेका आदेश तथा शरीर की परिस्थितिका विज्ञान जीवका सृष्टिक्रमके अनुसार जन्मधारण तथा जीवोंकी आरम्भ सृष्टिका प्रकार और यज्ञ की महिमा आदि २ विषयोंका वर्णन है ।

इयं नारी पतिलोकं वृणाना निपद्यत उप त्वा मर्त्य प्रेतम् ।
धर्मं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ॥ १ ॥

(इयं नारी) इयं विधवा नारी (प्रेतम्) मृतं पतिं विहाय (पतिलोकं वृणाना) पतिलोकं गृहस्थरूपं पतिसुखं स्वीकुर्वती सती (मर्त्य) हे मनुष्य ! (त्वोपनिपद्यते) त्वामुपगच्छति त्वां प्रति पत्नीभावेन प्राप्नोति (पुराणं धर्ममनुपालयन्ती) पुराणं वेदप्रतिपाद्यं सनातनं धर्ममनुपालयन्ती—उपनिपद्यत इति शेषः (तस्यै) विधवायै (इह प्रजां द्रविणञ्च धेहि) इहात्र गृहस्थधर्मे लोके वा सन्तानं धनं च धारय ॥ १ ॥

भाषार्थ—(इयं नारी) यह विधवा नारी (प्रेतम्) मृत पति को छोड़कर (पतिलोकं वृणाना) गृहस्थरूप पतिसुखको स्वीकार करती हुई (मर्त्य) हे मनुष्य ! (त्वोपनिपद्यते) तुझको प्राप्त होती है (पुराणं धर्ममनुपालयन्ती) वेदोक्त सनातन धर्मका आचरण करती हुई (तस्यै) उस इस विधवाके लिये (इह प्रजां द्रविणं च धेहि) इस गृहस्थधर्म या इस लोकमें सन्तान और धन को अर्पित कर ॥ १ ॥

शिक्षा—पति के देहान्त के पश्चात् यदि विधवा स्त्री सन्तानकी इच्छुका हो तो उसको दूसरे पुरुषको पति बनाकर सन्तान प्राप्त करलेनी चाहिये ॥ १ ॥

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुपशेष एहि ।
हस्तग्राभस्य दधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥२॥

(नारि) हे नारि ! (एतं गतासुम्) एतं गतासुं गतप्राणं मृतं त्यक्त्वा (जीवलोकमभ्येहि) जीवलोकं जीवन्तं तं द्वितीयं पतिं प्राप्नुहि (हस्तग्राभस्य दधिषोः

पत्युस्तवेदं जनित्वमुदीर्ष्व) विवाहे गृहीतहस्तस्य धारयितुः पत्युस्तव चेदं जनित्वं सन्तानमुदीर्ष्वोत्पादय (अभिसंबभूथ) एवं त्वं सुखसम्पन्ना भव ॥ २ ॥

भाषार्थ—(नारि) हे विधवा नारि ! तू (एतं गतासुम्) इस मृत को छोड़कर (जीवलोकमभ्येहि) जीवित पतिको प्राप्त हो (हस्तग्राभस्य दधिषोः पत्युस्तवेदं जनित्वमुदीर्ष्व) विवाहमें हाथ जिसने तेरा पकड़ा था उस पतिकी और अपनी सन्तानको उत्पन्न कर (अभि संबभूथ) तू इस प्रकार सुखसम्पन्न हो ॥ २ ॥

शिक्षा—विधवा अपने पूर्वपति की सम्पत्ति आदिके अधिकार भोगने तथा उसके प्रतिनिधि और अपनी सन्तानको उत्पन्न कर सकती है ॥ २ ॥

अपश्यं युवतिं नीयमानां जीवां मृतेभ्यः परिणीयमानाम् ।
अन्धेन यत्तमसा प्रावृतासीत् प्राक्तो अपाचीमनयं तदेनाम् ॥ ३ ॥

(जीवां युवतिं मृतेभ्यः परिणीयमानामपश्यम्) कन्याया विवाहसंस्कारस्य विधाता पिता जनसमुदाये सभामध्ये वा ब्रवीत्येवं यदहं कन्यायाः पिता जीवितामेतां युवतिं मृतेभ्यो मृताय योऽयं मृतस्तस्मै पुरुषाय परिणीयमानां परिणयं विवावं प्राप्यमाणामपश्यं दृष्टवान् । 'मृतेभ्य इति वचनव्यत्ययः' (नीयमानाम्) इदानीं चानेन नियुक्तपतिना नीयमानां नियुज्यमानामेतामेव जीवितां युवतिं स्वकन्यामपश्यं दृष्टवान् । अतः (अन्धेन तमसा प्रावृतासीत्) यतो हीयं युवतिरन्धेन तमसा शोकरूपेण घनान्धकारेण प्रावृताऽऽच्छादिता विमूढाऽऽसीत् (तदेनां प्राक्तोऽपाचीमनयम्) तस्मादेनां युवतिं प्राक्तः पूर्वदेशाद् विवाहितपतिस्थानादपाचीमपरदिशां साम्प्रतिकसभामनयमानीतवान् नियोगसम्बन्धं विधातुम् ॥ ३ ॥

भाषार्थ—(जीवां युवतिं मृतेभ्यः परिणीयमानामपश्यम्) कन्याका विवाह संस्कार करने वाला पिता सभाके बीचमें कहता है कि मैंने इस जीवित युवतिको जो यह मर चुका है उसके लिये विवाहती हुई देखी (नीयमानाम्) और इस समय इस नियुक्त पतिके साथ नियोग करती हुई को देखा । क्योंकि (अन्धेन तमसा प्रावृताऽऽसीत्) यह युवति शोकरूप घनान्धकारसे विमूढ़ होचुकी थी (तदेनां प्राक्तोऽपाचीमनयम्) अत एव इस युवति को पूर्वस्थान विवाहित पतिके घरसे यहां सभामें नियोग सम्बन्धके लिये लाया हूँ ॥ ३ ॥

शिक्षा—युवति कन्या जब विधवा होजावे तो उसके पिताको चाहिये कि वह उसको उसके श्वसुरगृह से लाकर जनसमुदाय में किसी दूसरे पुरुषके साथ उसका सम्बन्ध करदे ॥ ३ ॥

प्रजानत्यघ्न्ये जीवलोकं देवानां पन्थामनुसंचरन्ती ।
अयं ते गोपतिस्तं जुषस्व स्वर्गं लोकमधि रोहयैनम् ॥ ४ ॥

(अघ्न्येजीवलोकं प्रजानती देवानां पन्थामनुसञ्चरन्ती) हेऽघ्न्ये दयनीये मे कन्ये ! जीवलोकसपत्यफलं प्रजानती लक्ष्यी कुर्वती देवानां विदुषां पन्थां पन्थानं मर्यादामनुसञ्चरन्त्यनुपालयन्ती सती (अयं ते गोपतिस्तं जुषस्व) अयं सम्मुखं स्थितस्ते तव गोपतिरिन्द्रियपतिः शरीरपतिरित्यर्थः। तं नियुक्तपतिं जुषस्व कामयस्वेच्छ "जुषते कान्तिकर्मा (नि० २ । ६) (एनं स्वर्गं लोकमधि रोहय) एनं नियुक्तपतिं स्वर्गं सुखमयं लोकं काममधिरोहय प्रापय ॥ ४ ॥

भाषार्थ—(अघ्न्ये जीवलोकं प्रजानती देवानां पन्थामनुसञ्चरन्ती) हे दयनीय मेरी पुत्रि ! सन्तानरूप फलको लक्ष्यमें रखती हुई तथा विद्वानोंकी बतलाई मर्यादा का पालन करती हुई (अयं ते गोपयति तं जुषस्व) यह सम्मुख स्थित तेरा नियुक्त स्वामी तू उसको चाह (एनं स्वर्गं लोकमधिरोहय) इस नियुक्त पति को सुखमय गृहस्थ धर्मको प्राप्त करा ॥ ४ ॥

शिक्षा—विवाह के अनन्तर दूसरे नियुक्त पति का नाम 'गोपति' है। उस के साथ सन्तान की इच्छुक-विधवा का नियोग करना चाहिये ॥ ४ ॥

उपद्यामुपवेतसमवत्तरो नदीनाम् । अग्ने पित्तमपामसि ॥५॥

(अग्ने नदीनां द्यां वेतसमुपावत्तरोऽसि) अग्ने हेऽग्ने त्वं नदीनां द्या न्यक्करणीं शराख्ययष्टिजातिम् । 'द्यै न्यक्करणे भ्वादिस्ततोऽच्' । वेतसं दीर्घपत्रक-लतामुपावत्तरः सम्यग्रक्षकोऽसि स्याः 'लिङर्थे लेट्' । अथ च (अपां पित्तम्-'उपाव-त्तरोऽसि') अपां पित्तमुपावत्तरोऽसीति वाक्यपूर्तिः। अपां तडागादीनां पित्तमा-वरकतटम् । 'अपिपूर्वकदेङः क्तप्रत्ययः' । जलरक्षकसुनिर्मिततटमुपावत्तारो रक्षकोऽसि स्याः । अर्थादेषां वस्तूनां शवदहनाग्निना हानिर्न जायेत, इत्येवं जनैर्दहनकृत्यं विधेयम् ॥ ५ ॥

भाषार्थ—(अग्ने नदीनां द्यां वेतसमुपावत्तारोऽसि) हे अग्ने ! तू नदियों की शरयष्टिजाति और लम्बे पत्तेवाली लताओंको जलानेसे अत्यन्त बचा तथा (अपां पित्तम्—'उपावत्तारोऽसि) तडाग आदि जलाशयोंके सुनिर्मित जलरक्षक किनारे को भी बचा ॥ ५ ॥

शिक्षा—शवदहन नदी या तालाब आदि जलाशयके किनारेपर करना चाहिये तथा इस बातका पूरा ध्यान होना चाहिये कि नदीपर लगी हुई शरयष्टियों

और खेतोंको आग न लग जावे तथा तालाब आदि जलाशयका जलरक्षक किनारा या बान्ध भी आगसे दूषित न हो जावे ॥५॥

यं त्वमग्ने समद....॥६॥ (देखो सूक्तसमन्वय) ऋग्वेद १०।१६।१३ (पृष्ठ ६१)

भाषार्थ—जिस स्थान पर शव दहन किया है उस स्थान पर जल छिड़कना चाहिये और इतना अधिक छिड़कना चाहिये कि जिससे वहां विशिष्ट समर्थ शाखा वाला (शाण्डदूर्वा) उत्तम दूव उत्पन्न हो सके ॥६॥

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व ।
संवेशने तन्वा चारुरेधि प्रियो देवानां परमे सधस्थे ॥ ७ ॥

(इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संवेशने संविशस्व) हे शवदहन कर्तः ! मृतस्य शोकं मा कार्षीः । यतः । इदमुपस्थितं ते तवैकमपत्यं परः परस्तादन्यत्र प्रान्ते नगरे ग्रामे गृहे वा, एकमपत्यं मित्रं वा तृतीयेन ज्योतिषा तृतीयेन च मित्ररूपेणाकृतेन ब्रह्मणा सह तत्स्मरणेन वा । "स नो बन्धुर्जनिता" इति चोक्तम्। संवेशने स्वगृहे संविशस्व प्रविश (परमे सधस्थे तन्वा देवानां चारुः प्रिय एधि) परमे सधस्थे क्वचिदुत्तमसत्सङ्गे तन्वा शरीरेण शरीरकर्मणा देवानां विदुषां चारुः शोभनः प्रिय एधि भव एवं तव शान्तिनिमित्तायान्ये ते बन्धवः परमात्मस्मरणं विद्वत्सङ्गश्च सन्तीति निश्चेतव्यम् ॥ ७ ॥

भाषार्थ—(इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संवेशने संविशस्व) हे शवदहनकरने वाले मृतक के प्रिय जन ! तू मृतकका शोक मत कर । क्योंकि तुझे कमी क्या है । एक यह तेरी सन्तान है । अमुक प्रान्त, नगर, ग्राम या घर में एक यह सन्तान या मित्र है । और तीसरा तेरा ईश्वर सच्चा मित्र तथा बन्धु है । उसका तू स्मरण कर सब तेरा सहाय करेगा । अतः अपने घरमें आनन्द से रह (परमे सधस्थे तन्वा देवानां चारुः प्रिय एधि) उत्तम सत्सङ्ग में जाकर अच्छा काम करके विद्वानों का प्रिय बन ॥ ७ ॥

शिक्षा—जिसका प्रिय जन मर गया है उसको अनेक प्रकार से सान्त्वना देनी चाहिये । कहना चाहिये कि भाई तुमको फिकर क्या, तेरा यह एक सन्तान है दूसरा सन्तान या मित्र बन्धु वहां है और सबका सच्चा मित्र ईश्वर सदा तेरे साथ है उसका स्मरण कर वह तेरी मदद करेगा और कहीं धर्मसत्सङ्ग में जाना चाहिये या वहीं पर धर्मसत्सङ्ग, कथा आदि में पूरा भाग दिलाना चाहिये जिससे उसका शोक या चिन्ता दूर हो जावे ॥ ७ ॥

उत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व सलिले सधस्थे।
तत्र त्वं पितृभिः संविदानः संसोमेन मदस्व संस्वधाभिः ॥८॥

(उत्तिष्ठ, प्रेहि, ओकः प्रद्रव) हे शवदहनकर्तः! प्रेतस्य प्रियजन! वा, त्वमुत्तिष्ठ, प्रेहि चल, ओकः स्वगृहं प्रद्रव प्रकृष्टं सावधनतया गच्छ। (सधस्थे सलिले कृणुष्व) सधस्थे सह तिष्ठन्ति यत्रेति तत्र सर्वैः सह सलिले जलाशये कृणुष्व स्नानादिकं शौचं कुरु (तत्र त्वं पितृभिः संविदानः सोमेन संमदस्व स्वधाभिः सम्) तत्र निजगृहे स्वपितृभिः पूज्यजनैः सह संविदान ऐकमत्यं गतः सोमेन सोमौषध्या समदस्व प्रसीद स्वधाभी रत्नादिपदार्थैः संमदस्व तृप्तो भव॥ ८॥

भाषार्थ—(उत्तिष्ठ, प्रेहि, ओकः प्रद्रव) हे प्रेत के प्रिय जन! तू उठ, चल, अपने घर सावधानता से चल। अत एव (सधस्थे सलिले कृणुष्व) सब के साथ जलाशय पर स्नान आदि शुद्धि कर (तत्र त्वं पितृभिः संविदानः सोमेन संमदस्व स्वधाभिः सम्) वहां तू पूज्य पुरुषोंकी सलाह मान उनके उपदेश और विचार सुन सोम ओषधिके सेवनसे प्रसन्न हो, और अन्नादि पदार्थों से तृप्त हो॥ ८॥

शिक्षा—शवदहनके पश्चात् मृतक के प्रिय जनको अन्य लोग धीरज देते हुए श्मशानसे उठाकर, उसके घर जाने को कहें और नदी तड़ाग आदि जलाशय पर सबके साथ स्नान आदि शुद्धि करावें पुनः पूज्य जनोंके उपदेश और सान्त्वना पूर्ण विचारोंको सुना सोम ओषधिका सेवन* तथा भोजनसे तृप्त करावें ॥८॥

प्रच्यवस्व तन्वं संभरस्व मा ते गात्रा विहायि मो शरीरम्।
मनोनिविष्टमनु संविशस्व यत्र भूमेर्जुषसे तत्र गच्छ॥ ९॥

(प्रच्यवस्व) हे भद्र जन! प्रच्यवस्व मृतस्य शोकं त्यज (तन्वं संभरस्व) शरीरं सन्धारय संरक्ष (गात्रा ते मा विहायि) गात्रा ते तव गात्राण्यङ्गानि मा विहायि न विकृतानि स्युः (मो शरीरम्) शरीरं च ते न विकृतं स्यात् (मनोनिविष्टमनुसंविशस्व) मनोनिविष्टं मनाधृतं जीविकादिकृत्यमनु संविशस्वाचर (यत्र भूमेर्जुषसे तत्र गच्छ) यत्र भूमेर्भूम्यां जुषसे स्वकार्यं विदधासि तत्र त्वं गच्छ ॥९॥

भाषार्थ—(प्रच्यवस्व) हे मृत के प्रियजन! तू अब शोक को त्याग दे (तन्वं संभरस्व) अपने शरीर को संभाल (गात्रा ते मा विहायि) तेरे नेत्रादि अङ्ग पीडित न हो जावें (मा शरीरम्) तेरा शरीर अस्वस्थ न हो जावे (मनोनिष्टमनु

* संयुक्तप्रान्त में शवदहन करके स्नानादि के बाद निम्ब चबाने की प्रथा सम्भवतः इस सोमसेवन का अपभ्रंश हो।

'विशस्व) मनोऽभीष्ट आजीविकादि जो तेरा कृत्य है उसको सेवन कर (यत्र भूमे र्जुषसे तत्र गच्छ) जिस भूमिस्थान में तू रहता है वहां जा ॥ ६ ॥

शिक्षा—मृतकके प्रियजन के साथ सहानुभूति रखने वाले लोगों को चाहिये कि वे उसको कुछ दिन देखभाल में रक्खें ऐसा न हो कि वह रोगी हो जावे अत एव उसको वारम्वार चेतावनी भी देते रहें और परम्परा से या वर्तमान आजीविका आदि का जो काम किया करता हो उसको शुरू करादें तथा जहां वह रहता हो वहां पहुँचा दें ॥ ६ ॥

वर्चसा मां पितरः सोम्यासो अञ्जन्तु देवा मधुना घृतेन ।
चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धन्तु ॥ १० ॥

(सोम्यासो देवाः पितरो वर्चसा मधुना घृतेन मामञ्जन्तु) पूर्ववर्तनानन्तरं मृतस्य प्रियजनः प्रार्थयते यद् हे परमात्मन् ! सोम्यासः सोमसम्पादिनोऽन्नसम्पादिनः शरीरसम्पादिन इत्यर्थः "अन्नं सोमः" (कौ० ६ । ६) देवाः पितर ऋतवः । "ऋतवः खलु वै देवाः पितरः" (तै० १ । ३ । १० । ५) वर्चसा शरीरकान्त्या मधुना प्राणेन । "प्राणो वै मधु" (श० १४ । १ । ३ । ३०) घृतेनोदकेन शरीरान्तर्गतजलेन रक्तेनेति यावत् । मामञ्जन्तु व्यक्तीकुर्वन्तु पोषयन्तु (चक्षुषे मा प्रतरं तारयन्तः) चक्षुषे दर्शनाय यथार्थदर्शनाय मां प्रतरं नावमिव तारयन्तः (जरसे मा जरदष्टिं वर्धन्तु) जरसे जरायै वृद्धावस्थापर्यन्तं मां जरदष्टिर्जरति-अष्टिर्व्याप-नशक्तिर्यस्य तमेवं वर्धन्तु सम्पादयन्तु ॥ १० ॥

भाषार्थ—(सोम्यासो देवाः पितरो वर्चसा मधुना घृतेन मामञ्जन्तु) पूर्ववर्तनानन्तर मृत का प्रियजन ईश्वर से प्रार्थना करता है कि हे परमात्मन् ! प्राणिमात्र के शरीर को सम्पादन करने वाली ऋतुएं शरीर कान्ति से, प्राण से, रक्त से मुझे पुष्ट करें (चक्षुषे मां प्रतरं तारयन्तः) यथार्थ दर्शन के लिये मुझे नौका की भांति तराते हुए (जरसे मा जरदष्टिं वर्धन्तु) बुढ़ापे के लिये मुझे बुढ़ापे की शक्ति वाला बनावें ॥ १० ॥

शिक्षा—मृत के प्रियजनको मृतका शोक त्याग कर अपने शरीर को ऋतुओंके अनुकूल रखकर पुष्ट तथा स्वस्थ बनानेका यत्न करते रहना चाहिये ॥१०॥

वर्चसा मां समनक्त्वग्निर्मेधां मे विष्णुर्न्यनक्त्वासन् ।
रयिं मे विश्वे नियच्छन्तु देवाः स्योना मापाः पवनैः पुनन्तु ॥११॥

(अग्निर्वर्चसा मां समनक्तु) अग्निर्मां वर्चसा तेजसा समनक्तु संयोजयतु (विष्णु र्म आसन् मेधां न्यनक्तु) विष्णुर्यज्ञः। "यज्ञो वै विष्णुः" (श० १।१।२।१३) ममासन् मस्तिष्के मेधां बुद्धिं न्यनक्तूत्पादयतु (विश्वेदेवा मे रयिं नियच्छन्तु) विश्वेदेवाः सर्वे दिव्यपदार्था मे मह्यं रयिं वीर्यं बलं नियच्छन्तु निरन्तरं ददतु (आपः स्योनाः पवनैर्मा पुनन्तु) आपः स्योनाः सुखरूपाः सत्यः पवनैः सह मां पुनन्तु पवित्री कुर्वन्तु नीरोगं स्थापयन्तु ॥ ११ ॥

भाषार्थ—(अग्निर्वर्चसा मां समनक्तु) अग्नि मुझे तेज से संयुक्त करे। (विष्णुर्म आसन् मेधां न्यनक्तु) यज्ञ मेरे मस्तिष्क में बुद्धिको उत्पन्न करे (विश्वे देवा मे रयिं नियच्छन्तु) एवं सारे दिव्यगुण पदार्थ मेरे लिये बल का निरन्तर दान करें (आपः स्योनाः पवनैर्मा पुनन्तु) वायुधाराओंसे सुखरूप होकर जल मुझे नीरोग रखें ॥ ११ ॥

शिक्षा—मृतक के प्रियजन को घर में प्रतिदिन यज्ञ भी करना चाहिये क्योंकि यज्ञकी अग्नि उसके अन्दर तेज उत्पन्न करेगी और यज्ञकी सुगन्धि मस्तिष्क में बुद्धि शक्तिका विकास तथा आकाशमें वर्तमान सूर्य चन्द्र आदि दिव्य पदार्थ अपनी किरणोंसे बल प्रदान करेंगे, यज्ञमें वायुके उत्क्रमणसे घर का तथा वर्षा आदिका जल रोगनाशक बनेंगे ॥ ११ ॥

मित्रावरुणा परि मामधातामादित्या मा स्वरवो वर्धयन्तु ।
वर्चो म इन्द्रो न्यनक्तु हस्तयोर्जरदष्टिं मा सविता कृणोतु ॥१२॥

(मित्रावरुणा मां पर्यधाताम्) मित्रावरुणा प्राणापानौ 'प्राणापानौ मित्रावरुणौ' (तै० ३ । ३ । ६ । ६) मां पर्यधातां परितः सर्वतोऽधत्ताम् (आदित्या स्वरवो वर्धयन्तु) आदित्या मासाः स्वरवः सुगतयः सन्तो मां वर्धयन्तु (इन्द्रो मे हस्तयो र्वर्चो न्यनक्तु) इन्द्रो विद्युन्मे मम हस्तयोर्वर्चः स्फुर्तिबलं न्यनक्तु नियोजयतु (सविता मा जरदष्टिं कृणोतु) सविता उत्पादयिता परमात्मदेवो मां जरदष्टिं जरावस्थापर्यन्तं शक्तिमन्तं कृणोतु करोतु ॥ १२ ॥

भाषार्थ—(मित्रावरुणा मां पर्यधाताम्) प्राण और अपान मुझे सब तरफ से धारण करे रखें (आदित्याः स्वरवो वर्धयन्तु) महीने सुन्दर गति से मुझे बढावें (इन्द्रा मे हस्तयोर्वर्चो न्यनक्तु) विद्युत् मेरे हाथों में स्फूर्तिबल को नियुक्त करे (सविता मां जरदष्टिं कृणोतु) उत्पादक परमात्मदेव मुझे वृद्धावस्था तक जीने की शक्ति वाला बनावे ॥ १२ ॥

शिक्षा—पुनः उसी जनको अपने जीवनकी ओर विशेष ध्यान देना चाहिये प्राण अपान ठीक २ स्वस्थता के साथ आते जाते रहें। मास २ में जीवन वृद्धि होती रहे। पुरुषार्थसे विद्युत्-शक्ति हाथों में स्फूर्तिबल का प्रवेश कराबे और परमात्मदेव पूर्णायु भोगने की शक्ति दे ॥ १२ ॥

यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम्।
वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा सपर्यत ॥१३॥

(मर्त्यानां प्रथमो यो ममार) मर्त्यानां मरणधर्मिणां पदार्थानां मध्ये प्रथमः सन् यो ममार म्रियते नष्टो भवति (प्रथमो य एतं लोकं प्रेयाय) प्रथमः सन् य एतं लोकं मरणविषयकं प्रेयाय प्राप्नोति (जनानां सङ्गमनं वैवस्वतं यमं राजानं हविषा सपर्यत) जनानां जायमानानामुत्पद्यमनानां सङ्गमनं सङ्गमं वैवस्वतं विवस्वतः सूर्यस्य पुत्रं यमं कालं हविषा हविर्दानेन यज्ञेन सपर्यतानुतिष्ठत। अन्तपरम्परया पूर्वं काल एव नाशं प्राप्नोति पश्चादेव वस्तुपातो भवतीति सृष्टिक्रमः ॥१३॥

भाषार्थ—(मर्त्यानां प्रथमो यो ममार) मरणधर्मीवस्तुओं में प्रथम ही जो मरता है, नष्ट होता है (प्रथमो य एतं लोकं प्रेयाय) प्रथम ही जो इस मरणरूप स्थिति को प्राप्त होता है (जनानां सङ्गमनं वैवस्वतं यमं राजानं हविषा सपर्यत) उत्पन्न होने वाली वस्तुओंके सहयोगी, सूर्यके पुत्र काल यानि समयको यज्ञाहुति से उपयोगी बनाओ। अन्तपरम्परा से प्रथम काल ही नाशको प्राप्त होता है पुनः वस्तुनाश होता है यह सृष्टिक्रम है ॥ १३ ॥

शिक्षा—वस्तु नाश में प्रथम समयका अन्त होता है अतः समयका उचित उपयोग करना चाहिये ॥ १३ ॥

परा यात पितर आ च यातायं वो यज्ञो मधुना समक्तः।
दत्तो अस्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं दधात ॥१४॥

(पितरः परायातायात च) पितरो हे मच्छरीरवर्तिनः पालकप्राणाः! यूयं परायातास्मिन् मद्देहे पराक्रम्य गच्छतायात च तथा समन्ताद्गच्छत (अयं वो यज्ञो मधुना समक्तः) एष वो युष्माकं यज्ञः शरीररूपो यज्ञो मधुना मधुनेव रसेन समक्तः सम्यगक्तः पुष्टश्चिरं स्थातुं योग्यः स्यादिति शेषः (इहास्मभ्यं द्रविणा दत्तो) अस्मिन् शरीरेऽस्मभ्यं द्रविणा नानाविधबलानि "द्रविणं बलनाम" (नि० २। ६) उ इत्यवश्यं दत्त प्रयच्छत (भद्रं सर्ववीरं च रयिं नो दधात) भद्रं सुखं सर्ववीरमक्षय्यपुत्रं रयिं वीर्यं नोऽस्मभ्यंदधात धारयत 'सर्वं वा अक्षय्यम्' (श० १।६।१।१६) 'पुत्रो वै वीरः' (श० ३। ३। १। १२) 'वीर्यं वै रयिः' (श० २। ३। ४। १३) ॥१४॥

भाषार्थ—(पितरः परायातायात च) हे मेरे शरीरपालक प्राणो ! तुम इस देहमें स्वाधिकार से सर्वत्र जाओ और आओ (अयं वो यज्ञो मधुना समक्तः) यह तुम्हारा शरीर-यज्ञ मधुर रस के समान शरीररस से सम्यक् पुष्ट हो, देर तक ठहरने के योग्य बने (इहास्मभ्यं द्रविणा दत्तो) इस शरीर में हमारे लिये नानाविध बल प्रदान करो (भद्रं सर्ववीरं रयिं च नो दधात) उस सुख को जो अक्षय्यपुत्रसम्बन्धी वीर्यरूप है हमारे में धारण कराओ ॥ १४ ॥

शिक्षा—मनुष्यको अपने प्राणोंकी उत्तम गति तथा वीर्यशक्तिके सम्पादानसे स्वजीवन कालको प्रशस्तरूपमें बढ़ाते रहना चाहिये ॥ १४ ॥

कण्वः कक्षीवान् पुरुमीढो अगस्त्यः श्यावाश्वः सोभर्यर्चनानाः ।
विश्वामित्रोयं जमदग्निरत्रिरवन्तु नः कश्यपो वामदेवः ॥१५॥

(अयं कण्वः कक्षीवान् पुरुमीढो अगस्त्यः श्यावाश्वः सोभर्यर्चनाना विश्वामित्रो जमदग्निरत्रिः कश्यपो वामदेवो नोऽवन्तु) पूर्वोक्तान् प्राणानेवात्रैकैकं कण्वादिनामभिर्विशिष्य 'तेऽवन्तु' इति प्रार्थ्यते । अत्र विवरणम्—

(अयं कण्वः) 'मार्जनवत् स्पृष्ट्वा' एष कण्वः कणयति निमीलयतीति कण्वः 'कण् निमीलने' । नेत्रच्छदिरन्तर्वर्ती प्राणः (अयं कक्षीवान्) एष कक्षीवान् कक्षवान्, उभयकक्षसम्बद्धः प्राणः । "कक्षीवान्···अपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्" (नि० ६ । १०) (अयं पुरुमीढः) एष पुरुमीढः पुरु बहुविधं मीढं मेहनं सेचनं वीर्यमूत्रादिनिःसारणं यस्यास्ति स उपस्थगुदावर्ती प्राणः (अयमगस्त्यः) अयमगं पर्वतं मेरुं पृष्ठदण्डं स्त्यायति स्तभ्नातीत्यगस्त्यः । मेरुदण्डपर्वसङ्घातवर्ती प्राणः । अगस्त्य इत्यत्र "आतोऽनुपसर्गे कः" (अष्टा० ३ । २ । ३) (अयं श्यावाश्वः) श्यावाः कृष्णपीतमिश्रितवर्णा नीला अश्वा रक्तवाहिन्यो नाड्यो यस्य स तत्रस्थः प्राणः (अयं सोभरी) सुभरं सुपोषकं रक्तं यस्यास्ति स एष सोभरी प्राणो वक्षोवर्ती फुफ्फुसप्राणः (अयमर्चनानाः) एषोऽर्चनानाः, अर्चनमनो यानं चलनयन्त्रं यत्राधिष्ठितं स मस्तिष्कस्थः प्राणः (अयं विश्वामित्रः) एष विश्वामित्रः सर्वमित्रो यश्च सर्वेषां हिताय शृणोति स एष श्रोत्रवर्ती प्राणः । "श्रोत्रं वै विश्वामित्र ऋषिर्यदनेन सर्वतः शृणोति" (श० ८ । १ । २ । ६) (अयं जमदग्निः) एष जमन्प्रकाशमानोऽग्निर्यस्य स नेत्रवर्ती-प्राणो यश्च सर्वं प्रकाशयति "चक्षुर्वै जमदग्निर्यदनेन जगत्पश्यति" (श०८ । १ । २ । ३) (अयमत्रिः) एषोऽत्तीत्यत्रिर्मुखवर्ती प्राणः "वागेवात्रिर्वाचा ह्यन्नमद्यते" (श० १४।५।२।२) (अयं कश्यपः) एष कश्यपः कूर्मो नाभिस्थः प्राणः "स यत्कूर्मो नाम प्रजापतिः प्रजा असृजताकरोत्तदकरोत्तस्मात्कूर्मः कश्यपो वै कूर्मस्तस्मादाहुः सर्वाः प्रजाः काश्यप्याः" (श० ७ ।

५।१।५) (अयं वामदेवः) एष वामश्चासौ देवश्च स शरीरस्य वामभागे स्थितोऽथ च वननीयो हृदयस्थप्राणः। इत्येवं सर्वे मामवन्तु रक्षन्तु॥ १५॥

भाषार्थ—(अयं कण्व……वामदेवोऽवन्तु) पूर्वोक्त प्राणों को यहां एकैक कण्वादि नाम से वर्णित करके प्रार्थना है कि यह सब हमारी रक्षा करें। उनका विवरण निम्न है—

(अयं कण्वः) मार्जन के समान स्पर्श कर करके कथन है कि यह नेत्रच्छदिः यानि पलकमें रहने वाला प्राण (अयं कक्षीवान्) यह कक्षाओं में रहने वाला प्राण (अयं पुरुमीढः) यह बहुत प्रकारसे वीर्यमूत्रादिका निकालने वाला उपस्थ और गुदा का प्राण (अयमगस्त्यः) यह मेरुदण्डको स्तम्भन करने वाला प्राण (अयं श्यावाश्वः) काले पीलेरंगयुक्त नीली रक्तवाहिनी नाड़ियोंमें रहने वाला प्राण (अयमर्चनानाः) यह पूजायोग्य यन्त्रमें रहने वाला मस्तिष्कप्राण (अयं विश्वामित्रः) यह श्रोत्रमें रहने वाला प्राण (अयं जमदग्निः) यह सबका प्रकाशक नेत्रोंमें रहनेवाला प्राण (अयमत्रिः) यह खानेमें सहायक मुखवर्ती प्राण (अयं कश्यपः) यह कूर्म नाभि में रहने वाला प्राण (अयं वामदेवः) यह वाम भाग में रहने वाला हृदयस्थ प्राण। ये सब (अवन्तु) मेरी रक्षा करें॥ १५॥

शिक्षा—स्वरक्षार्थ नेत्रपलक, कक्ष, उपस्थ गुद, पृष्ठ दण्ड, रक्तवाहिनी नाड़ी, मस्तिष्क, श्रोत्र, नेत्रतिल, मुख, नाभि, हृदयमें रहने वाले प्राणों की स्थिरता का विशेष ध्यान रखना चाहिये। जरा भी खराबी न हो सके वा खराबी होने पर तत्काल चिकित्सा करानी चाहिये॥ १५॥

विश्वामित्र जमदग्ने वसिष्ठ भरद्वाज गोतम वामदेव।
शर्दिर्नो अत्रिरग्रभीन्नमोभिः सुसंशासः पितरो मृडता नः॥ १६॥

(विश्वामित्र जमदग्ने वसिष्ठ भरद्वाज गोतम वामदेव) हे श्रोत्रसम्बन्धिन्! चक्षुर्द्योतक! वाणीप्रकाशक! भरद्वाज मनोधारकप्राण! "मनो वै भरद्वाज ऋषिः" (श० ८।१।१।९) गच्छतीति गौः स चातिशयितो गोतमः, एवं गोतम! सर्वत्र प्राप्तवृत्ते व्यानप्राण! वामदेव हृदयप्राण! (शर्दिर्नो नमोभिरत्रिरग्रभीन्नः पितरः सुसंशासो मृडता) यथा नोऽस्माकं शर्दिःशरीरम्। "शृ धातोर्बाहुलकादौणादिको दिच् प्रत्ययो वर्णव्यत्ययेन वा शर्दिश्छर्दिर्गृहनाम" (नि० ३।४) शरीररूपं गृहं नमोभिरन्नैरन्नभक्षणैरत्रिर्वक्त्रप्राणः। "वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरि (श० १४।५।२।२) अग्रभीद् गृहीतवान् धृतवान्। तथा यूयं सर्वे नोऽस्माकं पितरो रक्षकप्राणाः सुसंशासस्तच्छरीरमतिसमीचीनं शासमानाः सुमार्गे रक्षन्तो मृडता सुखयत। वक्त्रप्राणोऽन्न-

भक्षणचर्वणग्रहणैः शरीरं धारयति तथैव श्रोत्रचक्षुजिह्वामनस्त्वङ्नासिकान्तर्वर्तिहृच्छक्तिरूपाः प्राणाः मनःसहितपञ्चज्ञानेन्द्रियवर्तिनः प्राणाः शरीरं सुमार्गे गन्तुं शासतीति विज्ञानम् ॥ १६ ॥

भाषार्थ—(विश्वामित्र जमदग्ने वसिष्ठ भारद्वाज गोतम वामदेव) हे श्रोत्रसम्बन्धी ! चक्षुर्द्योतक ! वाणीप्रकाशक ! प्राणों तथा हे मन के प्राण ! सर्वत्र प्राप्त व्यान प्राण ! हृद्‌यप्राण ! तुम सब (शर्दि र्नो नमोभिरत्रिरग्रभीन्नः पितरः सुसंशासो मृडता) जिस प्रकार हमारे शरीर को अन्न भोजनों से यह वाणीगत प्राण धारण किये हुये हैं उसी प्रकार तुम सब प्राणों ! शरीरको समीचीनरूपसे शासन में रखते हुए हमको सुखी बनाओ । वाणीगत प्राण अन्न भोजनों यानि भक्षण चर्वण ग्रहणके द्वारा शरीरको धारण करना है एवं श्रोत्र जिह्वा चक्षु मन त्वचा नासिका हृदय में रहने वाले प्राण शरीरको सुमार्गमें ले जाते हुए सुख के हेतु बनें ॥ १६ ॥

शिक्षा—मन तथा ज्ञानेन्द्रियों के अन्दर वर्तमान प्राण शरीरको सुपथ पर चलने का सदा आदेश करने वाले बनें ॥ १६ ॥

कस्ये मृजाना अतियन्ति रिप्रमायुर्दधानाः प्रतरं नवीयः ।
आप्यायमानाः प्रजया धनेनाध स्याम सुरभयो गृहेषु ॥ १७ ॥

(कस्ये मृजाना रिप्रमतियन्त्यध प्रतरं नवीय आयुर्दधानाः प्रजया धनेनाप्यायमाना गृहेषु सुरभयः स्याम) कस्ये शासने पूर्वमन्त्रोक्तश्रोत्रादीनां शासने सुनियमे मृजानाः शुद्ध्यन्तः । 'कस गतिशासनयोः' "अघ्न्यादयश्च" (उणादि० ४ । ११२) शासनार्थे यक् । रिप्रं पापं दोषमहितमतियन्त्यतिक्रामन्त्युल्लङ्घयन्ति । अधानन्तरं वयं प्रतरं प्रकृष्टं नवीयोऽपूर्वं दीर्घमायुर्दधानाः प्रजया सन्तानादिकया धनेनैश्वर्येणाप्यायमाना गृहेषु सुरभयः कार्यस्य सम्यगारब्धारो धैर्येण कार्यसाधकाः स्याम भवेमेति निश्चयः 'सुपूर्वकरंभधातोरौणादिक इप्रत्ययः' । तथाच वाचस्पत्ये 'सुरभि र्धीर इतिधरणिः' ॥१७॥

भाषार्थ—(कस्ये मृजानाः) पूर्व मन्त्रोक्त श्रोतादिके शासनमें रहकर शुद्ध हुए (रिप्रमतियन्ति) पाप दोष या अहितको त्याग देते हैं (अध प्रतरं नवीय आयुर्दधानाः) पुनः उत्तम नूतन अपूर्व या दीर्घ आयुको धारण करते हुए (प्रजया-धनेनाप्यायमानाः) सन्तानादि प्रजा और ऐश्वर्य से परिपूरित हुए (गृहेषु सुरभयः स्याम) घरोंमें कार्यके सम्यक् आरम्भ करने तथा साधने वाले हो सकेंगे यह निश्चय है ॥ १७ ॥

शिक्षा—ज्ञानेन्द्रियोंके शासनमें रहते हुए मनुष्य अहितसे बचकर उत्तम आयु को प्राप्त करते हुए सन्तान और ऐश्वर्य के भागी बनते हैं ॥ १७ ॥

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृह्णते ॥१८॥

(मधुनाञ्जते व्यञ्जते समञ्जतेऽभ्यञ्जते क्रतुं रिहन्ति) पूर्वोक्तश्रोतादीन्द्रिय-प्राणा यदा मधुना रसेन शरीररसेन सह । "रसो वै मधु" (श० ६ । ४ । ३ । २) अञ्जते स्थिरी भवन्ति व्यञ्जते व्यक्ततां यान्ति समञ्जते शोभन्तेऽभ्यञ्जते कार्याभिमुखं समर्था भवन्ति तदा क्रतुं रिहन्ति मनोजवं गृह्णन्ति "क्रतुर्मनोजवः" (श० ३।२।४।७) रिहधातुरत्र तौदादिक आदानार्थे (सिन्धोरुच्छ्वासे पतयन्तमुक्षणं पशुं हिरण्य-पावा आसु गृह्णते) अनन्तरं सिन्धोः शरीरमध्ये रक्तवाहिनीनां नदीरूपाणां नाडीनां सिन्धुस्थानीयस्य हृदयस्योच्छ्वासे सञ्चलने पतयन्तं गच्छन्तं प्राप्नुवन्तम् । पत गतौ चुरादिरदन्तो वा' गतेरत्र प्राप्त्यर्थो गृह्यते । उक्षणं महान्तं महत्वयुक्तं । "उक्षा महन्नाम" (नि० ३ । ३) पशुं द्रष्टारं जीवात्मानम् । "आत्मा वै पशुः" (कौ० १२ । ७) हिरण्यपावा आयुश्शोधकाः सन्त आसु नाडीषु गृह्णते रक्षन्ति । "आयुर्हि हिरण्यम्" (श० ४ । ३ । ४ । २४) ॥ १८ ॥

भाषार्थ—(मधुनाऽञ्जते व्यञ्जते समञ्जतेऽभ्यञ्जते क्रतुं रिहन्ति) पूर्वोक्त श्रोत्रादि इन्द्रिय-प्राण जब शरीररस के साथ स्थिर होते हैं, व्यक्त होते हैं, शोभित होते हैं, तथा कार्याभिमुख समर्थ होते हैं तब मन की अनुकूलता को ग्रहण करते हैं (सिन्धोरुच्छ्वासे पतयन्तमुक्षणं पशुं हिरण्यपावा आसु गृह्णते) पुनः शरीर में वर्तमान रक्तवाहिनी नदीरूप नाडियों के सिन्धुस्थानीय हृदय के सञ्चलने में प्राप्त महत्तायुक्त द्रष्टा जीवात्माको आयुके शोधक होकर वे प्राण उन नाडियों में जीवन रूप से स्वीकार करते वा सब नाडियों में उसकी जीवनशक्ति को स्थिर करते हैं ॥ १८ ॥

शिक्षा—शरीर रस श्रोत्रादिगत सभी प्राणोंको स्थिर, स्पष्ट, सुन्दर, कार्य में समर्थ बनाता है तथा मनकी अनुकूलता से गति कराता है । पुनः वे प्राण शुद्ध और स्वस्थ होकर जीवात्माकी शक्तिका फैलाव हृदयके उछ्च्छ्वासके साथ नाडी नाडी में कर देते हैं ॥ १८ ॥

यद्व वो मुद्रं पितरः सोम्यं च तेनो सचध्वं स्वयशसो हि भूत ।
ते अर्वाणः कवय आ शृणोत सुविदत्रा विदथे हूयमानाः ॥१९॥

(पितरो यद् वो मुद्रं सोम्यं च तेनो सचध्वं स्वयशसो हि भूत) 'अत आरभ्य सामान्ययज्ञप्रकरणमस्ति' । पितरो हे विद्वांसो वो युष्माकं यत्किञ्च वस्तु मुद्रं

हर्षप्रदं सोम्यं रोचकं स्यात् तेनो तेन हि यूयं सचध्वं सङ्गच्छध्वं पुनश्च स्वयशसो निजयशोनिमित्तका भूत भवत (तेऽर्वाणः सुविदत्राः कवयो हूयमाना विदथ आशृणोत) ते यूयमर्वाणो गन्तारः पर्यटनशीलाः सुविदत्राः सुविद्याः कवयः क्रान्तदर्शिनो विदथेऽस्मद्यज्ञे "विदथो यजनाम" (निरु० ३ । १७) आशृणोतास्माकं प्रार्थनादिकं स्वीकुरुत ॥ १६ ॥

भाषार्थ—(पितरो यद् वो मुद्रं सोम्यं च तेनो सचध्वं स्वयशो हि भूत) 'अब सामान्य यज्ञ का प्रकरण है।' हे विद्वानो ! तुम्हारो जो हर्षप्रद और इष्ट वस्तु हो उसीसे तुम सङ्गत हो जाओ पुनः स्वयश के बर्धक बनो (तेऽर्वाणः सुविदत्राः कवयो हूयमाना विदथ आशृणोत) वे तुम पर्यटनशील, उत्तमविद्यायुक्त, क्रान्तदर्शी महानुभावो ! हमारे यज्ञ में हमारी प्रार्थना को स्वीकार करो ॥ १६ ॥

शिक्षा—यज्ञ में विद्वानों की रुचिकर प्रियवस्तु दक्षिणा देनी चाहिये जिससे प्रसन्न होकर हमारे आवश्यक प्रश्नों का समाधान करसकें ॥ १६ ॥

ये अत्रयो अङ्गिरसो नवग्वा इष्टावन्तो रातिषाचो दधानाः ।
दक्षिणावन्तः सुकृतो य उ स्थासद्यास्मिन् बर्हिषि मादयध्वम् ॥२०॥

(ये अत्रयो अङ्गिरसो नवग्वा इष्टावन्तो रातिषाचो दधाना दक्षिणावन्तः सुकृतो य उ स्थास्मिन् बर्हिष्यासद्य मादयध्वम्) येऽत्रयो तापत्रयरहिताः । "तस्मादत्रिर्न त्रय इति यास्कः" (निरु० ३ । १७) अङ्गिरसस्तेजस्विनो नवग्वा नवनीतगतयो नवनीततुल्याः स्निग्धाः कान्तिमन्त इष्टावन्तो विविधयज्ञक्रियावन्तो रातिषाचो विद्यादानक्षेत्राणि दधाना धारयन्तो दक्षिणावन्तो दक्षिणायोग्याः सुकृतः पुण्यकर्माणो य उ येऽपि यूयं स्थास्मिन् बर्हिषि यज्ञ आसद्य स्थित्वा मादयध्वं प्रसीदत ॥ २० ॥

भाषार्थ—(ये अत्रयो अङ्गिरसो नवग्वा इष्टावन्तो रातिषाचो दधाना दक्षिणावन्तः सुकृतो य उ स्थास्मिन् बर्हिष्यासद्य मादयध्वम्) जो आध्यात्मिक आधिदैविक आधिभौतिक तीनों तापों से रहित, तेजस्वी, मक्खनके तुल्य कान्ति तथा स्निग्धस्वभाव वाले, विविध यज्ञ करने वाले, विद्यादानके विद्यालय रखने वाले, दक्षिणा पाने योग्य, पुण्यकर्मी महानुभाव तुम हो अत एव तुम सब इस यज्ञ में स्थित होकर यथारुचि प्रसन्नता को प्राप्त होओ ॥ २० ॥

शिक्षा—यज्ञ में बैठनेवाले महानुभाव तीनों दुःखों से रहित, तेजस्वी, स्नेह करने वाले, यज्ञशील, विद्यादाता, दक्षिणा पाने के योग्य, पुण्यकर्मी होने चाहिये ॥२०

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशशानाः ।
शुचीदयन् दीध्यत उक्थशासः क्षामा भिन्दन्तो अरुणीरपव्रन् ॥२१॥

(अग्ने यथा नः परासः प्रत्नासः पितर ऋतमाशशानाः शुचीदयन् दीध्यत उक्थशासः क्षामा भिन्दन्तोऽरुणीरपवृन्) हे अग्नेऽग्रणीर्विद्वन् ! यथा येन प्रकारेण नोऽस्माकं परासः श्रेष्ठाः प्रत्नासः प्राचीनाः पितरः पूर्वजा ऋतं यज्ञमाशशाना व्याप्नुवन्तः सेवमानाः शुचि वीर्यमिन्निःसन्देहमयन् प्राप्नवन्तः। "वीर्यं वै शुचि" (श० २।२।१।८) तथा दीध्यतो दीप्यमाना उक्थशासो मन्त्रवाचकाः क्षामा पार्थिवस्थानं कुण्डं हवनगर्तं 'क्षमा पृथिवी ततस्ताद्धितोऽण्'। 'विभक्तेराकारादेशः' भिन्दन्तः खनन्तः सम्पादयन्तोऽरुणीरग्निज्वाला अपवृन् प्रकटयन्ति स्म तथा त्वं प्रकटय ॥ २१ ॥

भाषार्थ—(अग्ने) हे अग्रणी विद्वन् ! (यथा नः) जैसे हमारे (परासः) श्रेष्ठ (प्रत्नासः) प्राचीन (पितरः) पूर्वज (ऋतम्) यज्ञको (आशशानाः) सेवन करते हुए (शुचि-इद्-आयन्) वीर्य को निरन्तर प्राप्त हुए (दीध्यतः) दीप्तिमान् होते हुए (उक्थशासः) मन्त्र पढ़ने वाले (क्षामा) पृथिवी में हवनकुण्डको (भिन्दन्तः) खोदते हुए। पुनः उसमें (अरुणीः) अग्नि को ज्वालाओं को (अपव्रवन्) बाहर प्रकट करते थे वैसा तू प्रकट कर ॥ २१ ॥

शिक्षा—पृथिवी में यज्ञकुण्ड खोदकर उसमें मन्त्रों से आहुति इतनी तीव्र देनी चाहिये कि ऊपर कुण्ड के अग्निज्वालाएं लपलपाया करें ॥ २१ ॥

सुकर्माणः सुरुचो देवयन्तो अयो न देवा जनिमा धमन्तः।
शुचन्तो अग्निं वावृधन्त इन्द्रमुर्वीं गव्यां परिषदं नो अक्रन् ॥२२॥

(सुकर्माणः सुरुचो देवयन्तो देवा जनिमायो न धमन्तः) सुकर्माणः पुण्यकर्माणः सुरुचः सुरोचमाना देवयन्तः आत्मनो देवानिच्छन्तो देवा विद्वांसो जनिमा निजजन्मायो न लोहमिव धमन्तः सम्पादयन्तः (अग्निं शुचन्तः) यज्ञाग्निं शुचन्तो ज्वलयन्तः "शोचतिर्ज्वलतिकर्मा" (नि० १।१६) (इन्द्रं वावृधन्तः) इन्द्रं विद्युदाख्यमग्निं च वावृधन्तो वर्धयन्तः (गव्यां परिषदं न उर्वीमक्रन्) वाक्सम्बन्धिनीं परिषदं सभां नोऽस्माकमुर्वीं महतीमक्रन् कुर्वन्ति 'सामान्यकाले लुङ्' ॥२२॥

भाषार्थ—(सुकर्माणः सुरुचो देवयन्तो देवा जनिमायो न धमन्तः) पुण्यकर्मी, विद्यासे शोभायमान 'अपने आप देव बननेकी इच्छा रखने वाले' विद्वान् लोग निज जन्मको लोहशोधने के समान उत्तम सम्पादन करते हुए (अग्निं शुचन्तः) यज्ञाग्नि को प्रज्वलित करते हुए (इन्द्रं वावृधन्तः) विद्युद्रूप अग्नि को बढ़ाते हुए (गव्यां परिषदं न उर्वीमक्रन्) वाणी सम्बन्धी सभाको हमारे लिये महती तय्यार करते हैं ॥ २२ ॥

शिक्षा—धर्मात्मा विद्वान् महानुभाव जब यज्ञ रचते हैं तब मनुष्य हितका विचार करनेके लिये विद्वत्सभा भी करते हैं ॥ २२ ॥

आ यूथेव क्षुमति पश्वो अख्यद् देवानां जनिमान्त्युग्रः ।
मर्तासश्चिदुर्वशीरकृप्रन् वृधे चिदर्य उपरस्यायोः ॥ २३ ॥

(उपरस्यायोर्वृधे मर्तासश्चिदुर्वशीरकृप्रन्) उपरस्य मेघस्यायोरयनस्य मेघायनस्य मेघमण्डलस्य "उपरो मेघः" (नि० ११०) "आयोरयनस्य" (नि० ११।४०) वृधे वर्धनाय मर्तासो मनुष्या यजमानरूपा ऋत्विग्रूपाश्चोर्वशीर्व्यापनशीलानि ज्योतींषि महता यज्ञेनाकृप्रन् कल्पयन्ति सम्पादयन्ति "छन्दसि लुङ्लङ्लिटः" (अष्टा० ३।४।६) "उर्वशी-उर्वभ्यश्नुते" (बहु व्याप्नोति) निरु० ५ । १३ । "उतासि मैत्रा-वरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसोऽधिजातः" (ले० अत्रोर्वशीसकाशान्मित्रावरुणयो रपत्यत्वं वसिष्ठे प्रदर्शितमथ चालङ्कारोऽत्र विद्यते, उर्वशी च विद्युज्ज्योतिः । अपर-मन्त्रे चास्य समन्वयः) "विद्युतो ज्योतिः परिसञ्जिहानं मित्रावरुणा यदपश्यतां त्वा । तत्ते जन्मोतैकं वसिष्ठ०" (ऋ० ७ । ३३ । १०) दुर्गाचार्यश्चात्रोर्वशीशब्दस्यार्थं विद्युदिति मन्यते तद्वचनम् "विशेषेण द्योतते देदीप्यत इति विद्युदुर्वशी" । अनन्तरम् (अर्यश्चि-द्यूथेव क्षुमति पश्वो देवानां जनिमान्त्युग्र आख्यत्) अर्यश्चित् कश्चित्स्वामी यूथेव क्षुमति यथाऽन्नवति घासवति समूहे पश्वः पशूनन्तिकं सामीप्येनाख्यद् व्यभजत, एवमुग्रो देदीप्यमानोऽग्निर्देवानां जनिम जन्म निवर्तनं व्यक्तिभावमकरोत् । "क्षु इत्यन्ननाम" (नि० २ । ७) ॥ २३ ॥

भावार्थ—(उपरस्यायोर्वृधे मर्तासश्चिदुर्वशीरकृप्रन्) मेघस्थान-मेघमण्डल की वृद्धिके लिये यजमान और ऋत्विग् लोग व्यापने वाली ज्योतियोंको बड़े यज्ञ द्वारा सम्पादन करते हैं । (अर्यश्चिद्यूथेव क्षुमति पश्वो देवानां जनिमान्त्युग्र आख्यत्) जैसे कोई स्वामी घासके समूहमें पशुओंका पास २ विभाग करता है यथोचित घास वितीर्णार्थ उनको नियुक्त करता है एवं यह यज्ञमें देदीप्यमान अग्नि देव अन्य सब देवोंके जन्म अर्थात् कार्य-कुशल व्यक्तित्वका सम्पादन करता है ॥ २३ ॥

शिक्षा—यज्ञाग्नि मेघमण्डलकी वृद्धिके निमित्त व्यापनशील विद्युत्को उत्पन्न करती है पुनः द्युस्थानके पदार्थों में उसका यथावत् सहयोग होने से वृष्टिका कार्यसम्भव है ॥ २३ ॥

अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
विश्वं तद् भद्रं यदवन्ति देवा बृहद् वदेम विदथे सुवीराः ॥२४॥

(ऋतं तेऽकर्म स्वपसो अभूम विभातीरुषसोऽवस्रन्) हे अग्ने! वयमृतं यज्ञं ते तुभ्यमकर्म कुर्याम तथा च स्वपसः सुकर्माणोऽभूम भवेम यदा विभातीर्दीप्यमाना उषसो ज्वाला अवस्रन् तत्र यज्ञेऽवसन् वसन्ति । तदा (विश्वं यद् भद्रं तद्देवा अवन्ति) सर्वं यद् भद्रं सुखकरं हव्यं तद् देवा वाय्वादयोऽवन्ति रक्षन्ति । अग्नौ हुतं न विनश्यतीति भावः (विदथे सुवीरा बृहद् वदेम) वयं विदथे जनसङ्गतिरूपे यज्ञे सुवीराः सन्तो बृहत् प्रकृष्टं वदेम ॥ २४ ॥

भाषार्थ—(ऋतं तेऽकर्म स्वपसोऽभूम विभातीरुषसोऽवस्रन्) हे अग्ने! हम यज्ञको तेरेलिये करें एवं सुकर्मा बनें जब तेरी ज्वालाएं यज्ञमें बस जावें तो (विश्वं यद् भद्रं तद्देवा अवन्ति) सब कुछ जो सुखकर हव्य है उसको वायु आदि देव रखते हैं। अर्थात् अग्निमें होम किया हुआ पदार्थ नष्ट नहीं होता (विदथे सुवीरा बृहद् वदेम) जनसङ्गतिरूप यज्ञमें हम सुवीर होते हुए तेरे गुणों को खूब वर्णन कर सकें ॥ २४ ॥

शिक्षा—अग्नि में होमी हुई वस्तु नष्ट नहीं होती किन्तु अनेक प्रकार से हितकर सिद्ध होती है ॥ २४ ॥

इन्द्रो मा मरुत्वान् प्राच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२५॥

(इन्द्रो मा मरुत्वान् प्राच्या दिशः पातु) इन्द्र ऐश्वर्यवान् सूर्यः "इन्द्र इत्येतमाचक्षते य एष 'सूर्यः' तपति" (श० ४ । ६ । ७ । ११) मां यजमानं मरुत्वान् मरुतोऽस्य सन्तीति मरुत्वान् मरुद्भिः रश्मिभिः सह वर्तमानः "मरुतो रश्मयः" (तां० १४ । १२ । ६) प्राच्याः सम्मुखवर्तिन्या दिशः पातु रक्षतु (बाहुच्युता पृथिवी द्यामिवोपरि) बाहुच्युता "बाहू वै मित्रावरुणौ" (श० ५ । ४ । १ । १५) ताभ्यामुभयबाहुभ्यामिव मित्रावरुणाभ्यामहोरात्राभ्यां च्युता गता पृथिवी यथा द्यां मेघमण्डलमुपरि पाति रक्षति स्थापयति (देवानां लोककृतः पथिकृतो हुतभागा इह स्थ) देवानां विदुषां मध्ये ये सन्ति लोककृतो लोकोपकारकर्तारः पथिकृतो मार्गनिर्मातारो हुतभागा दातव्यभागाधिकारिणस्ते सर्वे इहास्मिन् यज्ञे स्थ सन्ति सन्तु वा । अत्र पुरुषव्यत्ययः ॥ २५ ॥

भाषार्थ—(इन्द्रो मा मरुत्वान् प्राच्या दिशः पातु) सूर्य अपनी रश्मियों के साथ वर्तमान हुआ पूर्व या सम्मुख वाली दिशासेमेरी रक्षा करे (बाहुच्युता पृथिवी द्यामिवोपरि) अहोरात्रसे प्राप्त पृथिवी जैसे मेघमण्डलकी रक्षा करती है

अपने ऊपर सदा वर्तमान रखती है (देवानां लोककृतः पथिकृतो हुतभागा इह स्थ) एवं विद्वानोंके मध्यमें जो लोकोपकार करने वाले तथा संसारयात्राके लिये मार्ग बनाने वाले दानपूजाके अधिकारी महानुभाव यहां हैं वे मेरी रक्षा करें ॥ २५ ॥

शिक्षा—यज्ञानुष्ठानसे सूर्य अपनी किरणों द्वारा पूर्व दिशासे हमारी रक्षा करता है एवं पृथिवी मेघवृष्टिके परिणामसे और विद्वान् परोपकार तथा पथप्रदर्शकता से रक्षा करते हैं ॥ २५ ॥

धाता मा निर्ऋत्या दक्षिणाया दिशः पातु बाहु० ॥ २६ ॥

(धाता मा निर्ऋत्या दक्षिणाया दिशः पातु) लोकानां धारयिता स एव सूर्यः "यः सूर्यः स धाता" (ऐ० ३ । ४८) निर्ऋत्या निरन्तररममाणक्रियया सह वर्तमानाया दक्षिणाया दक्षिणहस्तगताया दिशः पातु यतोऽहं दक्षिणाङ्गेन निरन्तररममाणः कार्यकुशलो भवेयम् । अग्रे पूर्ववत् ॥ २६ ॥

भाषार्थ—(धाता मा) लोकोंका धारक सूर्य मुझे (निर्ऋत्या दक्षिणाया दिशः) निरन्तर रमणशील दक्षिणहस्तकी दिशसे (पातु) सुरक्षित रखे जिससे मैं दक्षिणाङ्ग से कार्य कुशल बन सकूं ॥ २६ ॥

शिक्षा—दक्षिण दिशा या दक्षिण अङ्ग की तरफ भी सूर्य अपनी रश्मियों द्वारा हमारी रक्षा करता है ॥ २६ ॥

अदितिर्मादित्यैः प्रतीच्या दिशः पातु बाहु० ॥ २७ ॥

(अदितिर्मादित्यैः प्रतीच्या दिशः पातु) अदितिः स एवाखण्डतेजाः सूर्यः मां यजमानमादित्यैरादानधर्मैः प्रतीच्याः पश्चिमायाः पृष्ठवर्तिन्या दिशायाः पातु ॥ २७ ॥

भाषार्थ—(अदितिर्मा) अखण्डज्योतिः सूर्य मेरी (आदित्यैः प्रतीच्या दिशः) आदान धर्मों–आश्रय धर्मों के द्वारा पश्चिम या पृष्ठ की दिशासे मेरी रक्षा करे ॥ २७ ॥

शिक्षा—आश्रयधर्मोंके द्वारा सूर्य पश्चिम या पृष्ठकी तरफ से रक्षा करता है ॥ २७ ॥

सोमो मा विश्वैर्देवैरुदीच्या दिशः पातु बाहु० ॥ २८ ॥

(सोमो मा विश्वैर्देवैरुदीच्या दिशः पातु) सोमः स एव सूर्यो यः सुनोत्युत्पादयति मां सर्वैर्दिव्यगुणैरुदीच्या वामहस्तवर्तिन्या दिशः पातु० ॥ २८ ॥

भाषार्थ—(सोमो मा) वही सबको उत्पन्न करनेवाला सूर्य मेरी (विश्वैर्देवैरुदीच्या दिशः) सब दिव्यगुणोंके द्वारा उत्तर या वाम हाथकी दिशासे (पातु) रक्षा करे ॥ २८ ॥

शिक्षा—सकल दिव्य गुणोंसे वर्तमान सूर्य उत्तरकी ओरसे मेरी रक्षा करता है ॥ २८ ॥

धर्ता ह त्वा धरुणो धारयाता ऊर्ध्वं भानुं सविता द्यामिवोपरि० ॥२९॥

(धरुणो धर्ता ह त्वा धारयातै) धरुणो धारणशीलो धर्ता सूर्यस्त्वामवश्यं धारयातै धारयेत । (ऊर्ध्वं भानुं सविता द्यामिवोपरि) ऊर्ध्वं भानुं भासमानं रश्मिमण्डलमुपरि यथा धारयति० ॥ २६ ॥

भाषार्थ—(धरुणो धर्ता) धारणशील सूर्य (त्वा धारयातै) अवश्यमेव तुझको धारण करे (ऊर्ध्वं भानुं सविता द्यामिवोपरि) ऊपर जैसे भासमान रश्मिमण्डलको धारण करता है ॥ २६ ॥

शिक्षा—सूर्यके आश्रय रश्मियां हैं अत एव सारे लोक लोकान्तर या प्राणी भी उसी के आश्रय हैं ॥ २६ ॥

प्राच्यांत्वा दिशि पुरा संवृतः स्वधायामादधामि बाहु० ॥३०॥

(प्राच्यां दिशि त्वा पुरा संवृतः स्वधायामादधामि) सम्मुखवर्तिन्यां दिशि पुरा स्वात्मना "आत्मा वै पूः" (श० ७ । ५ । १ । २१) संवृतः सम्यग्वृतः सन् त्वां स्वधायां सद्भावनायामादधामि संस्थापयामि० ॥ ३० ॥

भाषार्थ—(प्राच्यां दिशि त्वा) सम्मुखवर्ती दिशामें तुझको (पुरासंवृतः) स्वात्मा से सम्यग् वर्तमान हुआ (स्वधायामादधामि) सद्भावना में संस्थापन करता हूँ ॥ ३० ॥

शिक्षा—पूर्व दिशा में सद्भावनासे सूर्यका सेवन करना चाहिये ॥ ३० ॥

दक्षिणायां त्वा दिशि पुरा संवृतः स्वधायामादधामि बाहु० ॥३१॥

प्रतीच्यां त्वा	"	"	॥३२॥
उदीच्यां त्वा	"	"	॥३३॥
ध्रुवायां त्वा	"	"	॥३४॥
ऊर्ध्वायां त्वा	"	"	॥३५॥

एवं सर्वत्र दिशाभेदेन समन्वयःकर्तव्यो नान्यः कश्चिद्विशेषः ॥३१-३५॥

भाषार्थ—दक्षिण, पश्चिम, उत्तर, ध्रुवा, ऊर्ध्वा के दिशाभेदसे पूर्वके समान अर्थ समझो ॥३१-३५ ॥

धर्तासि धरुणोसि वंसगोसि ॥ ३६ ॥

(धर्तासि) हे सूर्य ! त्वं सर्वेषां धर्तासि (धरुणोसि) आश्रयणीयोसि (वंसगोसि) सुखं प्रापयितासि, वंसं वननीयं गमयतीति यतः ॥ ३६ ॥

भाषार्थ—(धर्तासि) हे सूर्य तू सब का धारक है (धरुणोसि) आश्रय-दाता है (वंसगोसि) सुख प्राप्त कराने वाला है ॥ ३६ ॥

शिक्षा—सूर्य संसारका धारक, आश्रयणीय और सुख सम्पादक है अतः सूर्य विज्ञानको सीखना चाहिये ॥ ३६ ॥

उदपूरसि मधुपूरसि वातपूरसि ॥ ३७ ॥

(उदपूरसि) जलप्रेरकोऽसि (मधुपूरसि) अन्नप्रेरकोसि (वातपूरसि) वायुप्रेरकोसि ॥ ३७ ॥

भाषार्थ—(उदपूरसि) जलका प्रेरक है (मधुपूरसि) अन्नका प्रेरक है (वातपूरसि) वायुका प्रेरक है ॥ ३७ ॥

शिक्षा—सूर्य प्राणियोंके योग्य अन्न, जल और वायु का सम्पादन करता है ॥ ३७ ॥

इतश्च मामुतश्चावतां यमे इव यतमाने यदैतम् ।
प्र वां भरन् मानुषा देवयन्त आसीदतां स्वमुलोकं विदाने ॥३८॥

(यमे इव यतमाने यदैतम्) हे द्यावापृथिव्यौ युवां यमे इव सहजातकन्ये इव यद्यतोऽस्मिन् संसार ऐतमागच्छतमतो युवाम् (इतश्चामुतश्च मावताम्) इतश्च पृथिवीतश्चामुतश्च दिवश्च माऽवतां रक्षतम् (मानुषा वां प्रभरन् स्वमुलोकमासीदताम्) मानुषा मनुष्या वां युवां प्रभरन् प्रभरन्ति मातापितृरूपे धारयन्ति तस्मात् स्वमुलोकं स्थानं मानवशरीरं विदाने जानत्यौ समन्तात् प्राप्नुतम् ॥३८ ॥

भाषार्थ—(यमे इव यतमाने यदैतम्) हे द्यावापृथिवी तुम दोनों सहजात कन्याओंके तुल्य जिससे इस संसारमें आती हो अतः तुम दोनों (इतश्चामुतश्च-मावताम्) इधरसे यानि पृथिवी अपनी तरफसे और उधरसे यानि द्यौ अपनी तरफसे मेरी रक्षा करें (मानुषा वां प्रभरन् स्वमुलोकमासीदताम) मनुष्य तुम दोनोंका मातापिताके रूपमें आश्रय लेते हैं अत एव तुम मानवशरीरको सुख सम्पादनार्थ सदा प्राप्त हो ॥ ३८ ॥

शिक्षा—संसार में 'अधः—ऊर्ध्व' या 'स्थूल—सूक्ष्म' की मर्यादा से 'पृथिवी और द्यौ' वर्तमान हैं जो प्राणी मात्रको अपने अन्दर धारण करती हैं ॥ ३८ ॥

स्वासस्थे भवतमिन्दवे नो युजे वां ब्रह्म पूर्व्यं नमोभिः ।
वि श्लोक एति पथ्येव सूरिः शृण्वन्तु विश्वे अमृतास एतत् ॥३९॥

(इन्दवे नः स्वासस्थे भवतम्) द्यावापृथिव्यौ नोऽस्माकमिन्दवे यज्ञाय 'इन्दुर्यज्ञनाम' (नि० ३।१७) स्वासस्थे सुखसम्पादिके भवतम् (पूर्व्यं ब्रह्म वां नमोभिर्युजे) पूर्व्यं शाश्वतिकं ब्रह्म वेदं मन्त्रानिति यावत् । वां युवाभ्यां द्यावापृथिवीभ्यां नमोभिर्यज्ञैर्युजे युनज्मि । "यज्ञो वै नमः" (श० ७ । ४ । १ । २०) (श्लोको व्येति पथ्येव सूरिः) श्लोको मन्त्रो व्येति ध्वनिमेवं विशेषेण प्राप्नोति सूरिर्विद्वान् स्तोता पथ्यायामुच्चारणप्रक्रियायां यथा प्रवर्तेत (विश्वेऽमृतास एतच्छृण्वन्तु) सर्वेऽमृतास आत्मान एतत्स्वरं शृण्वन्तु ॥ ३९ ॥

भाषार्थ—(इन्दवे नः स्वासस्थे भवतम्) द्यावापृथिवी हमारे यज्ञके लिये सुखसम्पादक हों (पूर्व्यं ब्रह्म वां नमोभिर्युजे) शाश्वतिक वेद यानि मन्त्रों को तुम्हारे प्रति यज्ञों द्वारा प्रयुक्त करता हूँ (श्लोको व्येति पथ्येव सूरिः) मन्त्र एवं ध्वनिको प्राप्त होता है जैसे अच्छे विद्वान्की उच्चारणप्रक्रिया में होनी चाहिये । (विश्वेऽमृतास एतच्छृण्वन्तु) और सब मनुष्य इस स्वरको सुन सकें ॥ ३९ ॥

शिक्षा—पृथिवी और मेघ मण्डल को उपयोगी बनानेके लिये यज्ञ करना चाहिये और यज्ञमें वेदपाठ होना चाहिये जिसकी ध्वनि अच्छे विद्वानोंके मुखसे निकली हुई सब लोग सुगमता से सुन सकें ॥ ३९ ॥

त्रीणि पदानि रुपो अन्वरोहच्चतुष्पदीमन्वैद्व्रतेन ।
अक्षरेण प्रति मिमीते अर्कमृतस्य नाभावभि संपुनाति ॥ ४० ॥

(रुपस्त्रीणि पदान्यन्वरोहत्) रूपयति रूपं धारयतीति रुपो जीवस्त्रीणि पदानि त्रीणि शरीराणि स्थूलसूक्ष्मकारणाख्यानि, अन्वरोहदधितिष्ठति (व्रतेन चतुष्पदीमन्वैत् *) व्रतेन व्रताचरणेन चतुष्पदीं चतुर्थीमवस्थां तुरीयाख्यामन्वैल्लब्धवान् तत्र च (अक्षरेण प्रतिमिमीते) अक्षरेणाविनाशिब्रह्मणा सह प्रतिमिमीते साहचर्यं सादृश्यं प्राप्नोति । अथ च (ऋतस्य नाभावर्कं संपुनाति) ऋतस्य ज्ञानरूपवेदस्य नाभावाधाररूपे तस्मिन्नेवोङ्काराक्षरेऽर्कं स्वात्मानं सम्पुनाति निर्मलीं करोति शुद्धः सन् तिष्ठति "वेत्थार्कमिति पुरुषं ह वै तदुवाच" (श० १० । ३ । ४ । ५) "स एषोऽग्निरर्को यत्पुरुषः" (श० १० । ३ । ४ । ५) ॥ ४० ॥

* "अन्वैत्" इतिपाठः क्वचित् ।

भाषार्थ—(रूपस्त्रीणि पदान्यन्वरोहत्) संसारमें प्रकट होने वाला जीव स्थूल सूक्ष्म और कारण के भेदसे तीन शरीरोंको प्राप्त होता है (व्रतेन चतुष्पदीमन्वैत्) व्रताचरणसे तुरीयनाम की चतुर्थावस्था को प्राप्त करता है (अक्षरेण प्रतिमिमीते) अविनाशि ब्रह्मके साथ सहयोग तथा सदृशताको प्राप्त होता है (ऋतस्य नाभावर्क संपुनाति) ज्ञानरूप वेदकी नाभि अर्थात् आश्रयभूत उसी अविनाशी ब्रह्म में अपने आपको अत्यन्त निर्मल बनाता या शुद्ध रखता है ॥ ४० ॥

शिक्षा—जीव संसारमें आकर स्थूल सूक्ष्म और कारण शरीरको धारण करता है पुनः व्रताचरणसे तुरीयावस्था में पहुँच ब्रह्मके सहयोग और सदृशता को प्राप्त हो ज्ञानके केन्द्रमें अपने आपको कृतकृत्य करता है ॥४०॥

देवेभ्यः कमवृणीत मृत्युं प्रजायै किममृतं नावृणीत ।
बृहस्पतिर्यज्ञमतनुत ऋषिः प्रियां यमस्तन्वमा रिरेच ॥ ४१ ॥

(बृहस्पतिर्ऋषिर्देवेभ्यः कं मृत्युं नावृणीत) बृहस्पतिर्ऋषिर्बृहतामाकाशादीनां पतिः स्वामी, ऋषिः सर्वद्रष्टा परमात्मा देवेभ्योऽधीतविद्येभ्यो विज्ञातात्मभ्यः कं कथञ्जातीयं मृत्युं नावृणीत न स्वीकृतवान् ? न तत्र देवानाममरत्वे बृहस्पतिः कारणम्, तेषां कर्माण्येवैवंविधानि यतस्ते मृत्युरहिता मोक्षं प्राप्ताः सन्ति (प्रजायै किममृतं नावृणीत) प्रजायै प्रकृष्टेन पुनः पुनर्जायते या तस्यै किञ्जातीयममृतं नावृणीत न स्वीकृतवान् ? न तत्र प्रजाया मरणत्वे बृहस्पतिः कारणमपितु पुनर्जन्मनिमित्तं कर्मैव कारणम् । (यज्ञं तनुते) बृहस्पतिस्तु केवलं यज्ञं सर्वेषां शरीररूपं यज्ञं तनुते विस्तारयति । किन्तु (यमः प्रियां तन्वमारिरेच) यमः काल एव प्रियामनुकूलां तन्वं तनुमारिरेच प्राणरिक्तां करोति ॥ ४१ ॥

भाषार्थ—(बृहस्पतिर्ऋषिर्देवेभ्यः कं मृत्युं नावृणीत) आकाशादि बड़े बड़े लोकोंके स्वामी सर्वसाक्षी परमेश्वर ने कृतात्मविद्वानों के लिये किस प्रकार के मृत्युको नहीं दिया है ? देवों के अमरपन में बृहस्पति कारण नहीं है कर्म ही उनके इस प्रकार के है जो अमरपन यानि मोक्ष को प्राप्त होते हैं (प्रजायै किममृतं नावृणीत) पुनः पुनः जन्म लेने वाली प्रजा के लिये किस अमरपन को नहीं दिया है ? पुनर्जन्म का कर्म ही कारण है (यज्ञं तनुते) बृहस्पति तो केवल सबके शरीरयज्ञका विस्तार करते हैं किन्तु (यमः प्रियां तन्वमारिरेच) काल यानि समय ही इस प्यारी कायाको प्राणों से खाली कर देता है ॥ ४१ ॥

शिक्षा—जगदीश्वर देवोंको मृत्युसे अलग रहने और बारम्बार जन्मने वाले प्राणियों को अमरपन से अलग रहनेमें कारण नहीं है प्रत्युत उनके अपने अपने

कर्म ही कारण हैं जगदीश देव तो वस्तुतः संसारमें प्रत्येक प्राणी के शरीरको उत्पन्न करता है किन्तु समय बलवान् है वह ही उनकी प्यारी काया को उनसे खाली करा लेता है ॥ ४१ ॥

त्वमग्न इडि····॥ ४२ ॥ (देखो सूक्तसमन्वय) ऋग्वेद १०।१५।१२ (पृष्ठ ४६)

आसीनासो····॥ ४३ ॥ " ऋग्वेद १०।१५।७ (पृष्ठ ४५)

अग्निष्वात्ता····॥ ४४ ॥ " ऋग्वेद १०।१५।११ (पृष्ठ ४८)

उपहूता नः ···॥ ४५ ॥ " ऋग्वेद १०।१५।५ (पृष्ठ ४४)

ये नः पितुः····॥ ४६ ॥ " ऋग्वेद १०।१५।८ (पृष्ठ ४६)

ये तातृपु····॥ ४७ ॥ " ऋग्वेद १०।१५।९ (पृष्ठ ४७)

ये सत्यासो ॥ ४८ ॥ " ऋग्वेद १०।१५।१० (पृष्ठ ४८)

उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदाः पृथिवी दक्षिणावत एषा त्वा पातु प्रपथे पुरस्तात् ॥४९॥

(एतामुरुव्यचसं पृथिवीं सुशेवां भूमिं मातरमुपसर्प) हे जीव ! जन्म धारयितुं त्वमेतामुरुव्यचसं बहुशरीरव्यक्तिनिर्मात्रीं प्रथितां सुशेवां सुखसम्पादिकां भूमिं मातरमुपसर्पोपगच्छाश्रयस्व (दक्षिणावत एषा पृथिव्यूर्णम्रदाः) दक्षिणावते स्वकर्मफलशरीरधारणयोग्यजीवायैषा पृथिव्यूर्णवन्मृद्वी भवति (पुरस्तात्प्रपथे त्वा पातु) पुरस्तात् पूर्वसृष्टावारम्भसृष्टौ संसारयात्रायां पथाग्रे त्वां पालयतु ॥ ४६ ॥

भाषार्थ—(एतामुरुव्यचसं पृथिवीं सुशेवां भूमिं मातरमुपसर्प) हे जीव ! जन्म धारण करनेके लिये तू इस बहुत प्रकार से जीव व्यक्तियों को प्रकट करने वाली विस्तृत और अनुकूलताको सम्पादिका भूमि रूपी माताको प्राप्त हो (दक्षिणावत एषा पृथिवी-ऊर्णम्रदाः) स्वकर्मफल शरीरके धारण योग्य जीवके लिये यह पृथिवी ऊनके तुल्य मृदु होजाती है (पुरस्तात्प्रपथे त्वा पातु) पूर्वसृष्टि अर्थात् आरम्भसृष्टिमें संसार यात्राके पथाग्र पर तेरा पालन करती है ॥ ४६ ॥

शिक्षा—आरम्भसृष्टिमें सब जीवोंकी एक मात्र माता पृथिवी ही होती है । अत एव उस समय मनुष्योंकी भी अमैथुनी सृष्टि होती है । नानाभेदों से मनुष्यादि शरीरों का प्रादुर्भाव होता है । आरम्भ सृष्टिमें पृथिवीका बाह्यतल ऊन के समान कोमल होता है ॥ ४६ ॥

उच्छ्वञ्चस्व पृथिवि मा निबाधथाः सूपायनास्मै भव सूपसर्पणा ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥ ५० ॥

(पृथिवि उच्छ्वञ्चस्व मा निबाधथाः) हे पृथिवि त्वमुच्छ्वञ्चस्व जीव-गर्भं धारयितुमुद्गच्छ पुलकितपृष्ठा भव 'श्वचि गतौ भ्वादिः' मा निबाधथा जीवं न पीडय (अस्मै सूपायना सूपसर्पणा भव) अस्मै जीवाय सूपायना शरीरधारण-वर्धनयोग्या सूपसर्पणा सम्यगुपरि प्रेरयित्री भव (भूमे माता पुत्रं यथा सिचैनम-भ्यूर्णुहि) हे भूमे ! माता यथा पुत्रं जननानन्तरं सिचा दुग्धसेचनपार्श्वेन स्तनपार्श्वे-नाश्रयं ददाति तथा त्वमपि जीवरूपं पुत्रं प्रकटीकृत्य वनस्पतियुक्तेन निजपार्श्वेनाश्रयं देहि ॥ ५० ॥

भाषार्थ—(पृथिवि, उच्छ्वञ्चस्व मा निबाधथाः) हे पृथिवि ! तू जीवगर्भ को धारण करनेके लिये पुलकितपृष्ठा–उफनी हुई हो जा, जिससे इस जीवको पीड़ा न दे सके (अस्मै सूपायना सूपसर्पणा भव) इसके लिये शरीरधारणवर्धन कराने योग्य तथा सम्यक् उपसरणे-ऊपर उभरने-बाहर प्रकट होने में निमित्त बन (भूमे माता पुत्रं यथा सिचैनमभ्यूर्णुहि) हे भूमे ! तू माता जैसे पुत्रको जननेके पश्चात् अपने दुग्धसेचन पार्श्वसे आश्रय में धारण करती है एवं तू भी जीवरूप निज पुत्रको जन्म देकर वनस्पतिसे युक्त अपने पार्श्वसे आश्रय दे ॥ ५० ॥

शिक्षा—जीवगर्भ जब भूमिमें आता है तो भूमि ऊपरके पृष्ठ पर पुलकित उफनी हुई पोली सी हो जाती है जिससे आसानीके साथ जीव बढ़सके और गर्भकी आवश्यकताओं को पूरा करती है, गर्भके पूर्ण होते ही उसको ऊपर उभरने-बाहर प्रकट करनेमें योग्य होती है तथा बाहर प्रकट होजाने पर ओषधियों से उसका पोषण भी करती है अतएव उस समय जीव सब प्रकार कुशल कुमारावस्था में उत्पन्न होते हैं ॥ ५० ॥

उच्छ्वञ्चमाना पृथिवी सुतिष्ठतु सहस्रं मिथ उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतः स्योना विश्वाहास्मै शरणाः सन्त्वत्र ॥५१॥

(उच्छ्वञ्चमाना पृथिवी सुतिष्ठतु) यदा पुलकितपृष्ठा पृथिवी सुतिष्ठतु सम्यक् तिष्ठति तदा (सहस्रं मिथो ह्युपश्रयन्ताम्) सहस्रमसंख्याता जीवा मिथः परस्परं हि, उपश्रयन्तामुपतिष्ठन्ते (ते गृहासो घृतश्चुतोऽस्मै विश्वाहाऽत्र स्योनाः शरणाः सन्तु) जीवात्मने ते गृहासो गर्भकोशा घृतश्चुतो रसपूर्णाः सर्वदाऽत्र स्योनाः सुखकराः शरणाः शरण्याः सन्तु भवन्ति ॥ ५१ ॥

भाषार्थ—(उच्छ्वञ्चमाना पृथिवी सुतिष्ठतु) जब पुलकितपृष्ठा उफनी हुई-पोलीसी बनी हुई पृथिवी तैयार हो जाती है तब (सहस्रं मिथो ह्युपश्रयन्ताम्) असंख्य जीव परस्पर ही आश्रित रहते हैं (ते गृहासो घृतश्चतोऽस्मै विश्वाहात्र स्योनाः शरणाः सन्तु) जीवात्मा केलिये वे गर्भगृह रसपूर्ण सर्वदा सुखकारक आश्रय देने वाले होते हैं ॥ ५१ ॥

शिक्षा—जीवसृष्टिके लिये पृथिवी ऊपर पोली और मृदु कुछकाल तक रहती है पुनः उसमें असंख्य जीव परस्पर आश्रित रहते हैं अत एव आज तक भी स्व स्वजातीय सङ्घ में रहने का स्वभाव प्रायः सभी जीवों में वर्तमान है आत्माके लिये गर्भगृह स्वाभाविक रस देते हुए शरणीय हैं ॥ ५१ ॥

उत्ते स्तभ्नामि पृथिवीं त्वत् परीमं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्ति ते तत्र यमः सादना ते कृणोतु ॥५२॥

(पृथिवीं त उत्तभ्नामि) हे जीव ! तुभ्यमहमीश्वरः पृथिवीं जलमिश्राद् भूगोलादुपर्याकर्षामि (त्वदिमं लोगं परिनिदधन्मोऽहं रिषम्) त्वत् तव 'विभक्तिव्यत्ययः' । इमं लोगं लुङ्गं ग्रहणं गर्भकोशमित्यर्थः 'लुञ्जि हिंसाबलादाननिकेतनेषु । इदितो नुम् धातोरिति छन्दसि सर्वे विधयो विकल्प्यन्तेऽतो नुमभावः । अधिकरणार्थे घञ् । चजोः कुघिण्यतोरिति कुत्वम्' । परिनिदधत्समर्पयन् नैवाहं हिंसेयम् (एतां स्थूणां पितरो धारयन्ति) एतां स्थूणामुपर्युत्थितां भूमिं पितरः सूर्यरश्मयो धारयन्ति (तत्र यमस्ते सादना कृणोतु) तत्र यमः सूर्यस्ते तुभ्यं सादना गर्भकोशान् सम्पादयति ॥ ५२ ॥

भाषार्थ—(पृथिवीं त उत्तभ्नामि) हे जीव ! तेरे लिये मैं ईश्वर पृथिवीको जल मिश्रित भूगोलसे ऊपर खींचता हूँ (इमं ते लोगं परिनिदधत्) वहां तेरे इस गर्भकोश को रखता हुआ मैं पीड़ा नहीं देता हूँ (एतां स्थूणां पितरो धारयन्ति) इस ऊपर उठी हुई पृथिवीको सूर्यकिरणें धारण करती हैं (तत्र यमस्ते सादना कृणोतु) सूर्य तेरे लिये सब आवश्यक कोशों को बनाता है ॥ ५२ ॥

शिक्षा—आरम्भसृष्टि भूगोलके ऊंचे भाग पर होती है । वह भाग जल मिश्रित भूगोलसे पर्वत भूमि के रूप में ऊपर खींचा जाता है । उस उठे हुए भूभागको सूर्य की रश्मियां धारण करती हैं और सूर्य अपनी रश्मियोंद्वारा जीवात्माके गर्भादिको बनाता है अत एव उसका दूसरा नाम सविता है । ॥५२॥

इममग्ने चम····॥५३॥ (देखो सूक्तसमन्वय) ऋग्वेद १०।१६।८ (पृष्ठ ४८)

अथर्वा पूर्णं चमसं यमिन्द्रायाबिभर्वाजिनीवते ।
तस्मिन् कृणोति सुकृतस्य भक्षं तस्मिन्निन्दुः पवते विश्वदानीम् ॥५४॥

(अथर्वा यं पूर्णं चमसं वाजिनीवत इन्द्रायाबिभः) अथर्वा स्थिरकायो जीवन् जनो यं पूर्णं घृतेनपूर्णं चमसं वाजिनीवते वाजिनश्छन्दांसि मन्त्रास्तत्सम्बद्धा वाजिनीष्टिः सा विद्यते यस्य सोऽयं वाजिनोवानिन्द्रः, अत्र चाग्निरेवेन्द्र इदंदारणात् तस्मा अबिभर्बिभर्ति धारयति "छन्दांसि वै वाजिनः" (गो०क० १ । २० तै० १।६ । ३ ।१) "तर्हि हैषः (अग्निः) भवतीन्द्रः" (श० २ । ३ । २ । ११) (तस्मिन् सुकृतस्य भक्षं कृणोति) तस्मिन् चमसे सुकृतस्य सम्यक्कृतस्य सुहुतस्य भक्षं कृणोति करोति (तस्मिन् विश्वदानीमिन्दुः पवते) तस्मिन् चमस इन्दुर्यज्ञो विश्वदानीं सर्वदा पवते शुद्धयति पवित्री भवति । इन्दुर्यज्ञनामेत्युक्तम् । "विश्वदानीं सर्वदा" (निरु० ११ । ४४) 'पवते-ऽत्र पूङ् पवने भ्वादिः' ॥ ५४ ॥ ?

भाषार्थ—(अथर्वा यं पूर्णं चमसं वाजिनीवत इन्द्रायाबिभः) स्थिरकाय जीवित मनुष्य जिस घृतपूर्ण चमसको मन्त्रोच्चारण के साथ वर्तमान अग्नि में धारण करता अर्थात् रखता है (तस्मिन् सुकृतस्य भक्षं कृणोति) उस चमसे में सुगन्धी आदि से सज्जितका भक्ष अग्निमें होमनेको बनाता है (तस्मिन् विश्वदानीमिन्दुः पवते) उस चमसेमें सदा यज्ञ शुद्ध होता है ॥ ५४ ॥

शिक्षा—दाह करने वाला जीवित पुरुष यदि मृतदेहको घृतचमासहुति के द्वारा अग्निमें होमता है तो उसकी दुर्गन्ध नष्ट हो जाती है ॥ ५४ ॥

यत्ते कृष्णः....॥ ५५ ॥ (देखो सूक्तसमन्वय) ऋग्वेद १०।१६।६ (पृष्ठ ४६)

पयस्वतीरोषधयः पयस्वन्मामकं पयः ।
अपां पयसो यत्पयस्तेन मा सह शुम्भतु ॥५६॥

(ओषधयः पयस्वतीर्मामकं पयः पयस्वत्) ओषधयः पयस्वत्यो रसवत्यः सारवत्यो भवन्तु यतो हि तासां पयसा मामकं मच्छरीरगतं पयो रसो रक्तं पयस्वत् वीर्यवद् भवतु । "रसो वै पयः" (श० ४ । ४ । ८ । ७) "रेतः पयः" (श० १२।४।१।७) (अपां पयसो यत्पयस्तेन सह मा शुम्भतु) अपामन्तरिक्षस्य पयसो जलस्य मेघस्थस्य यत्पयो वृष्टिजलं तेन सह मां शुम्भतु शुम्भयतु शोभयतु । अन्तर्गतोणिजर्थः ॥ ५६ ॥

भाषार्थ—(ओषधयः पयस्वतीर्मामकं पयः पयस्वत्) ओषधियां रसवाली हों जिससे कि मेरा शरीरस्थ रक्त बलवान् बने (अपां पयसो यत्पयस्तेन सह मा

शुम्भतु) अन्तरिक्ष के मेघस्थ जलका जो वृष्टिरूप जल सार है उससे मुझको शोभित करे ॥ ५६ ॥

शिक्षा—सुगन्ध से यज्ञ या अन्त्येष्टि करने से ओषधियां विकृत नहीं होती अपि तु रस वाली होती हैं जिससे प्राणियोंका शरीरस्थ रक्त भी बलवान् होता है । अन्तरिक्षस्थ मेघजल और वृष्टिजल भी उत्तम होता है ॥ ५६ ॥ ?

इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा संस्पृशन्ताम् ।
अनश्रवो अनमीवा सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥५७॥

(इमा अविधवाः सुपत्नीर्नारीराञ्जनेन सर्पिषा संस्पृशन्ताम्) इमा अविधवाः सपतिकाः सुपत्न्यो नार्यः । 'अत्र सर्वत्र विभक्तिव्यत्ययः' । आञ्जनेन समन्तादञ्जनेन नेत्रमुखप्रक्षालनहेतुना सर्पिषा सर्पिरुदकं संस्पृशन्तां सङ्गृह्णन्तु । 'सर्पिरुदकनाम' (नि० १ । १२) 'विभक्तिव्यत्ययः' (अनश्रवोऽनमीवाः सुरत्ना जनयोऽग्रे योनिमारोहन्तु) अनश्रवोऽश्रुरहिता अनमीवाः स्वस्थाः सुरत्नाः सुरमणा जनयो युवतयोऽग्रे पूर्वत एव योनिमारोहन्तु गृहमधितिष्ठन्तु ॥ ५७ ॥ ?

भाषार्थ—(इमा अविधवाः सुपत्नीर्नारीराञ्जनेन सर्पिषा संस्पृशन्ताम्) यह जीवित पतिवाली सुशील नारियां भली प्रकार नेत्रमुखप्रक्षालनके कारण जल का सेवन करें (अनश्रवोऽनमीवाः सुरत्ना जनयोऽग्रे योनिमारोहन्तु) आंसूरहित हुई स्वस्थ सुन्दर युवतियां श्मशान जाने से पूर्व ही घर को वापिस चली आवें ॥५७॥

शिक्षा—शव के साथ जाने वाली स्त्रियां जो पतिवाली और युवति हों वे किसी जलाशय तक पहुँचकर वहां नेत्र मुख आदि धोकर पुनः आंसुरहित स्वस्थ हुई घर को वापिस चली आवें ॥ ५७ ॥

सङ्गच्छस्व ····॥ ५८ ॥ (देखो सूक्तसमन्वय) ऋग्वेद १०।१४।८ (पृष्ठ ३१)

ये नः पितुः पितरो ये पितामहा य आविविशुरुर्वन्तरिक्षम् ।
तेभ्यः स्वराडसुनीतिर्नो अद्य यथावशं तन्वः कल्पयाति ॥५९॥

भाषार्थ—(ये नः पितुः पितरो ये पितामहः) जो हमारे पितृतुल्य सूर्यके मास और ऋतुएं हैं (य उर्वन्तरिक्षमाविविशुः) जो मास और ऋतुएं विस्तृत आकाशमें अपने प्रभाव से वर्तमान हैं (स्वराट् तेभ्योऽसुनीतिर्नोऽद्य यथावशं तन्वः कल्पयाति) यज्ञ में प्रकाशमान अग्नि उनके द्वारा जो कि प्राणशक्तिका सञ्चार करने वाली हैं वह हमारे लिये अब यथोचित शरीरों सन्तानों का सम्पादन करती हैं ॥५९॥

शिक्षा—मास और ऋतुओंके द्वारा अग्नितत्व सन्तानों को युवतिस्त्रियों में उत्पन्न करता है ।। ५६ ।।

इस मन्त्रके स्पष्टी करण के लिये देखो सूक्तसमन्वय अथर्व १८ । २ । ४६ पृष्ठ १४० में पूर्वार्द्ध तथा ऋ० १० । १५ । १४ पृष्ठ ५० में उत्तरार्द्ध ।

शं ते नीहारो भवतु शं ते प्रुष्वावशीयताम् ।
शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।
मण्डूक्यप्सु शंभुव इमं स्वग्निं शमय ।। ६० ।।

(नीहारस्ते शं भवतु) नीहारस्तुषारः खजलं तुभ्यं शमनुकूलं भवतु (प्रुष्वा ते शमवशीयताम्) प्रुष्वा वृष्टिस्ते तुभ्यं शमनुकूलमवशीयतामधः पततु । अग्रे ऋ० १० । १६ । १४ (पृ० ६२) व्याख्यातः ।। ६० ।।

भाषार्थ—(नीहारस्ते शं भवतु) तुषार ओस तेरे लिये अनुकूल हो (प्रुष्वा ते शमवशीयताम्) वृष्टि तेरे लिये अनुकूल गिरे (शीतिके............ऋ० १०।१६।१४) हे दूब घास और दूबयुक्त भूमि तथा सुन्दर वल्ली और वल्ली वाली भूमि, और हे मेण्डकी तू जलों में कल्याण साधक हो तथा शवाग्नि को शान्त कर । स्पष्टीकरण के लिये देखो ऋ० १० । १६ । १४ पृष्ठ ६२ ।। ६० ।।

शिक्षा—शवाग्नि से जले हुए स्थानको ओस और वर्षा ठीक बना देती है एवं जल के सम्पर्क से वह भूमिमें पूर्वके समान घास मेण्डकी आदि से सुशोभित होजाती है ।। ६० ।। ?

विवस्वान् नो अभयं कृणोतु यः सुत्रामा जीरदानुः सुदानुः ।
इहेमे वीरा बहवो भवन्तु गोमदश्ववन्मय्यस्तु पुष्टम् ।। ६१ ।।

(विवस्वान् नो अभयं कृणोतु यः सुत्रामा जीरदानुः सुदानुः) आदित्योऽस्मभ्यं भयराहित्यं करोति यश्च सम्यक् त्राता अथ चाऽऽजरावस्थं जीवनस्य प्रदाता सुदाता चास्ति (इहेमे वीरा बहवो भवन्तु) अस्मिन् संसार इमे पुत्रादयो वीरा बहवो भवन्तु (गोमदश्ववत्पुष्टं मय्यस्तु) गोयुक्तमश्वयुक्तं पुष्टं पोषकं धनं मयि भवतु ।। ६१ ।।

भाषार्थ—(विवस्वान् नो अभयं कृणोतु यः सुत्रामा जीरदानुः सुदानुः) सूर्य अपने प्रकाशसे हमको भयरहित करता है जो कि रक्षक और जरा अवस्था पर्यन्त जीवनका देने वाला दाता है (इहेमे वीरा बहवो भवन्तु) इस संसार में ये

पुत्रादि वीर बहुत होवें (गोमदश्ववत्पुष्टं मय्यस्तु) गोयुक्त, अश्वयुक्त पोषकधन मुझ में स्थिर हो ॥ ६१ ॥

शिक्षा—सूर्य देव रोगादि भयसे पृथक् करता है जरा अवस्था पर्यन्त उस की किरणें जीवन की सहायक हैं ऐश्वर्य का नियन्त्रणबल भी प्रदान करता है ॥६१॥

विवस्वान् नो अमृतत्वे दधातु परैतु मृत्युरमृतं न ऐतु ।
इमान् रक्षतु पुरुषाना जरिम्णो मो ष्वेषामसवो यमं गुः ॥६२॥

(विवस्वान् नोऽमृतत्वे दधातु) आदित्योऽस्मानमृतत्वे स्वास्थ्ये धारयतु (मृत्युः परैतु) मृत्युभयं परागच्छतु दूरं तिष्ठतु (अमृतं न ऐतु) अमृतं मोक्षसुख-मस्मान् प्राप्नोतु (आजरिम्ण इमान् पुरुषान् रक्षतु) जरावस्थापर्यन्तमिमान् पुत्रादीन् पुरुषान् रक्षतु (एषामसवो यमं मो सुगुः) एषामसवः प्राणा यमं यन्तारं कालं मो नैव सुगुर्जरायाः पूर्वं गच्छन्तु ॥ ६२ ॥

भाषार्थ—(विवस्वान् नोऽमृतत्वे दधातु) आदित्य हमको स्वस्थतामें धारण करे रखे (मृत्युः परैतु) मृत्यु भय दूर रहे (अमृतं न ऐतु) मोक्षसुख हमको प्राप्त हो (आजरिम्ण इमान पुरुषान् रक्षतु) बुढ़ापे तक इन हमारे पुरुषों को सुरक्षित रखे (एषामसवो यमं मो सुगुः) इनके प्राण अन्तक काल को न प्राप्त हों ॥ ६२ ॥

शिक्षा—सूर्य मनुष्य के स्वास्थ्यका हेतु है रोगोंके दूर होनेमें भी कारण है ॥ ६२ ॥

यो दध्रे अन्तरिक्षे न मह्ना पितॄणां कविः प्रमतिर्मतीनाम् ।
तमर्चत विश्वमित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात् ॥६३॥

(यो मतीनां प्रमतिर्नान्तरिक्षे पितॄणां कविर्मह्ना दध्रे) यो मतीनां मेधाविनां प्रमतिः प्रकृष्टमेधावोवान्तरिक्षे पितॄणां रश्मीनां कविरादित्यस्तान् रश्मीन् मह्ना महत्वेन दध्रे धारयति "असौ वा आदित्यः कविः (श० ६ । ७ । २ । ४) विश्वमित्रास्तं हविर्भिरर्चत) हे सर्वमित्रा ऋत्विजस्तं हविर्भिराहुतिदानेनार्चतानुतिष्ठत (स यमो नो जीवसे प्रतरं धात्) स यम आदित्यः । "यमो रश्मिभिरादित्यः" (निरु० १२ । २१) जीवसे जीवनाय प्रतरं प्रतरणं धाद् धारयेत् ॥ ६३ ॥

भाषार्थ—(यो मतीनां प्रमतिर्नान्तरिक्षे पितॄणां कविर्मह्ना दध्रे) जो मेधावियों में उच्च मेधावी के तुल्य अन्तरिक्ष में वर्तमान रश्मियों को आदित्य धारण करता है (विश्वमित्रास्तं हविर्भिरर्चत) हे सबके मित्र ऋत्विजो ! उसको आहुतिदान से

सेवन करो (स यमो नो जीवसे धात्) वह आदित्य हमारे लिये जीवनकी नौका को धारण करे ॥ ६३ ॥

शिक्षा—रश्मिनायक सूर्यका सेवन हवियों द्वारा करना मानों संसार सागर तरने के लिये नौकाका आश्रय लेना है ॥ ६३ ॥

आरोहत दिवमुत्तमामृषयो मा बिभीतन ।
सोमपाः सोमपायिन इदं वः क्रियते हविरगन्म ज्योतिरुत्तमम्॥६४॥

(सोमपाः सोमपायिन ऋषय इदं वो हविः क्रियते) हे सोमपाः सोमपायिन ऋषयो रश्मयो वो युष्मभ्यमिद हविः क्रियते । "ऋषयो रश्मयः" (निरु०१२।३७) तदेतद् हविः पीत्वा (उत्तमां दिवमारोहत मा बिभीतन) उत्तमामुच्चतमामन्तिमां तृतीयां दिवं रश्मिमण्डलं गच्छत तत्र गन्तु यूयं भयं न कुरुथेति प्रकृतिर्युष्माकम् (ज्योतिरुत्तममगन्म वयमेवङ्कृतेन तद्रश्मिमण्डलमगन्म गच्छाम इत्येष प्रकारस्तत्रास्माकं गन्तुं नान्यथा ॥ ६४ ॥

भाषार्थ—(सोमपाः सोमपायिन ऋषय इदं वो हविः कियते) हे रश्मियो ! तुम्हारे लिये यह हविकी जाती है, इस हविको पीकर (उत्तमां दिवमारोहत मा बिभीतन) जो सबसे ऊपर रश्मिमण्डल है वहां इस हवि को ले जावो किसी प्रकार का तुम भय नहीं करती हो यह तम्हारा स्वभाव है (ज्यातिरुत्तममगन्म) हम इस प्रकार इसरश्मिमण्डल को प्राप्त हो सकते हैं यानी उसका उपयोग ले सकते हैं ॥६४॥

शिक्षा—यज्ञ में डाली हुई हवि सूर्य किरणों द्वारा रश्मिमण्डल यानी सूर्य को प्राप्त होती है पुनः हम उससे लाभ उठाते हैं ।

प्र केतुना बृहता भात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥ ६५ ॥

(अग्निर्बृहता केतुना प्रभाति) अग्निरेष सूर्यो बृहता महता केतुना रश्मिमण्डलेन प्रभाति प्रकाशते (वृषभो रोदसो आरोरवीति) वृषभो मेघवर्षणहेतुः सूर्यः "स एष आदित्यः सप्तरश्मिर्वृषभस्तुविष्मान्" (जै० उ० १ । २८ । २) रोदसी द्यावापृथिव्यौ "रोदसी द्यावापृथिवीनाम" (नि० ३ । ३०) मेघान्तर्गत आरोरवीति आक्रम्य रोरवीति (दिवश्चिदन्तान्मामुपोदानट्) दिव आकाशस्यान्तात् पर्यन्तादपिमामुप मत्समीपमुदानडुद्व्यक्तोऽस्ति (अपामुपस्थे महिषो ववर्ध) अपां जलानामुपस्थाने मेघमण्डल इत्यर्थः, महिष एषोऽग्निर्महान् देवो ववर्ध वर्धते "अग्निर्वै महिषः स हीदं जातो महान् सर्वमैष्णात्" (श० ७ । ३ । १ । २३) ॥ ६५॥

भाषार्थ—(अग्निर्बृहता केतुना प्रभाति) सूर्यरूप अग्नि अपने बड़े रश्मि-मण्डलसे विश्वभर में प्रकाश करता है (वृषभो रोदसी आरोरवीति) मेघ वर्षाने वाला सूर्य द्यावापृथिवी को अपने तेजोबलसे प्राप्त होकर शब्द करता है (दिवश्चि-दन्तान्मामुपोदानट्) आकाशकी सब ओर से मेरे समीप प्रकट है (अपामुपस्थे महिषो ववर्ध) जलों के स्थान यानी मेघ मण्डलमें यह अग्नि विद्युत् के रूपमें व्यापता है ॥ ६५ ॥

शिक्षा—आकाश के बीच वर्तमान सूर्य अपने बड़े भारी रश्मिमण्डल द्वारा संसार में प्रकाश करता है तथा मेघों के अन्दर रश्मियों द्वारा विद्युत् के रूपमें वर्तमान हो गर्जन रूप घोर शब्द करता है एवं सब तरफ आकाश में मेघमण्डल के अन्दर विद्युत् के रूपमें व्यापता है ॥ ६५ ॥

नाके सुपर्णमुप यत् पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥६६ ॥

(यमस्य योनौ भुरण्युं वरुणस्य दूतं सुपर्णं हिरण्यपक्षं शकुनं नाके त्वो-पपतन्तं हृदा वेनन्तो यदभ्यचक्षते) लुप्तोपमालङ्कारोत्र—यमस्य कालस्य योनौ मूलस्थाने भुरण्युं गमनस्वभावम् "भुरण्यति गतिकर्मा" (नि० २ । १४) वरुणस्य जन्मदानेन स्वीकर्तुर्देवस्य दूतं सुपर्णं शोभनपतनं हिरण्यपक्षं ज्योतिर्मयपक्षं शकुनं पक्षिणमिव वर्तमानं त्वां विवस्वन्तं नाके दिव्युपपतन्तमुपचरन्तं हृदा हृदयेन वेनन्तः कामयमानाः सर्वे प्राणिनो यद्यतो ह्यभ्यचक्षतेऽभिपश्यन्ति ॥ ६६ ॥

भाषार्थ—(यमस्य योनौ) इस मन्त्रमें लुप्तोपमालङ्कार है–काल (Time) के मूल स्थानमें (भुरण्युम्) गति करते हुए को (वरुणस्य दूतं) प्राणियों के जन्म देनेसे स्वीकार करने वाले वरुण देवके दूतको (सुपर्णं हिरण्यपक्षं शकुनम्) शोभन गति वाले ज्योतिर्मय रश्मिरूप पक्ष वाले पक्षीके तुल्य वर्तमान (नाके त्वोपपतन्तम्) द्युस्थानमें ऊपर विचरते हुए तुझ सूर्य को (हृदा वेनन्तः) हृदय से चाहते हुए सभी प्राणी (यदभ्यचक्षते) अवश्य ही साक्षात् करते हैं अर्थात् तेरे प्रकाशको प्राप्त करते हैं ॥ ६६ ॥

शिक्षा—कालचक्रका केन्द्र सूर्यके अधीन है, प्राणियोंके जन्मका कारण सूर्य है, सारे प्राणी ज्योतिर्मय पङ्ख वाले इस सूर्यको पक्षीके तुल्य आकाशमें विचरते हुए देख कर जीवनयात्रा को व्यतीत करते हैं ॥ ६६ ॥

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥६७॥

(इन्द्र पिता पुत्रेभ्यो यथा नः क्रतुमाभर) इन्द्र हे सूर्य ! पिता पुत्रेभ्यो यथा वर्तते तथा त्वं वर्तमानः सन् नोऽस्मभ्यं क्रतुं कर्म पुरुषार्थमाभर प्रवेशय (शिक्षा णः) अस्मान् शिक्ष प्रेरय । यतो वयम् (अस्मिन् यामनि पुरुहूत जीवा ज्योतिरशीमहि) अस्मिन् यामनि यातव्ये गन्तव्ये जगति । 'या धातोर्मनिन् प्रत्ययः' "सर्वधातुभ्यो मनिन्" (उ० ४ । १४५) पुरुहूत हे बहुप्रकारेण होतव्य देव ! जीवा वयं जीवन्तो ज्योतिर्जीवनज्योतिरशीमहि प्राप्नुयाम ॥ ६७ ॥

भाषार्थ—(इन्द्र पिता पुत्रेभ्यो यथा नः क्रतुमाभर) हे सूर्य ! जैसे पिता पुत्रोंके लिये रक्षादि कर्मसे वर्तता है वैसे तू हमारे लिये हमारे अन्दर सामर्थ्य का प्रवेश करा (शिक्षा णः) और हमको प्रेरितकर यानि बुद्धि-शक्ति हमारे अन्दर प्रदान कर। जिससे (अस्मिन् यामनि पुरुहूत जीवा ज्योतिरशीमहि) इस गन्तव्य जगत् में हे बहुत प्रकारसे ग्रहण करने योग्य देव ! हम जीवित जन जीवनज्योतिको प्राप्त कर सकें ॥ ६७ ॥

शिक्षा—सूर्य संसारके प्राणिमात्रकी उत्पत्ति और रक्षादि कर्म द्वारा पिताके तुल्य वर्ताव करता है, उसकी रश्मियां प्राणिगर्भ और जीवनस्थिरताकी हेतु हैं उनसे यथोचित लाभ उठाना चाहिये ॥ ६७ ॥

अपूपापिहितान् कुम्भान् यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥ ६८ ॥

(देवा यानपूपापिहितान् कुम्भान् तेऽधारयन्) देवा यज्ञकलाविदा विद्वांसः "विद्वांसो वै देवाः" (श० ३ । ७ । ३ । १०) यानपूपापिहितानपूपैः सुगन्धैः सुसंस्कृतपक्वान्नविशेषैः पूर्णान् कुम्भान् द्वादशाङ्गुलान् षोडशाङ्गुलान् षट्त्रिंशदङ्गुलान् विस्तारोन्नतशालिनो बृहतो यज्ञपात्रविशेषान् ते तुभ्यमिन्द्र ! 'प्रकरणादिन्द्रो देवतात्र गृह्यते' अधारयन् धारयन्ति (ते स्वधावन्तो मधुमन्तो घृतश्चुतस्ते सन्तु) ते स्वधावन्तोऽन्नवन्तो गोधूमाद्यन्नैः सम्पन्ना मधुमन्तो नानाविधमधुररसवन्तो घृतश्च्युतो घृतप्रचुरा अपूपास्ते तुभ्यं सन्तु भवन्तु । इन्द्राय विविधं हविरिष्टान्नस्य देयमिति विज्ञेयम् ॥६८॥ ?

भाषार्थ—(देवा यानपूपापिहितान् कुम्भान् तेऽधारयन्) यज्ञकलाके जानने वाले विद्वान् उत्तम सुगन्धयुक्त सुसंस्कृत पक्वान्न विशेषों से पूर्ण द्वादशाङ्गुलादिविस्तृत

परिमाण वाले बड़े यज्ञपात्रोंको हे सूर्य ! तेरे लिये तैयार रखते हैं (ते स्वधावन्तो मधुमन्तो घृतश्च्युतस्ते सन्तु) व पक्वान्न गेहूँ आदि अन्नोंके बने हुए नानाप्रकारके मिठास से युक्त और घृतपूर्ण तेरे लिये यज्ञमें आहुतिरूपमें प्राप्त हो ॥ ६८ ॥

शिक्षा—यज्ञविद्याको जानने वाले लोग सूर्यरश्मियोंका वैज्ञानिक लाभ उठानेके लिये यज्ञमें उत्तम सुगन्धि वाले नाना प्रकारके मीठे रसोंसे युक्त घृतपूर्ण मिष्टान्नसे हवन करते हैं ॥ ६८ ॥

यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तु विभ्वीः प्रभ्वीस्ता ते यमो राजानुमन्यताम् ॥६९॥

(याः स्वधावतीस्तिलमिश्रा धानास्तेऽनुकिरामि) याः स्वधावतीर्विविधस्वाद्वन्नसम्पन्नास्तिलमिश्रा धाना भद्रास्ते तुभ्यमिन्द्र ! अनुकिराम्यत्र यज्ञाग्नौ क्षिपामि "बभ्रां ते हरी धाना उप ऋजीषं जिघ्रताम्" (नि० ५ । १२) (तास्ते विभ्वीः प्रभ्वीः सन्तु) ता धानास्ते तुभ्यं विभ्वीर्विशिष्टभावाः प्रभ्वीः प्रकृष्टभावाः सन्तु भवन्तु (तास्ते यमो राजानुमन्यताम्) तव धाना यमो राजा गार्हपत्यो यज्ञाग्निरनुमन्यतामनुकूलं कुरुताम् । "अथैष एव गार्हपत्यो यमो राजा" (श० २ । ३ । २ । २) ॥६९॥

भाषार्थ—(या स्वधावतीस्तिलमिश्रा धानास्तेऽनुकिरामि) जो विविध स्वादु अन्नयुक्त तिलसहित धाना हे इन्द्र ! तेरे लिये यज्ञ में डालता हूँ, (तास्ते विभ्वीः प्रभ्वीः सन्तु) वे धाना तेरे लिये विशिष्टप्रभाववाली तथा उत्तम परिणाम देने वाली हों (तास्ते यमो राजानुमन्यताम्) उन तेरी धानाओंको गार्हपत्य यज्ञाग्नि रश्मियों में व्यापने वाली बनादे ॥ ६९ ॥ ?

शिक्षा—यज्ञाग्निमें तिल और धाना भी उत्तम २ मिष्टान्नों के साथ डालनी चाहिये एवं वे यज्ञाग्निमें डाली हुई वस्तुएं सूर्यरश्मियां में फैलने के योग्य बन जाती हैं ॥ ६९ ॥ ?

पुनर्देहि वनस्पते य एष निहितस्त्वयि ।
यथा यमस्य सादन आसातै विदथा वदन् ॥७०॥

(वनस्पते य एष त्वयि निहितः पुनर्देहि) वनानां रश्मीनां पते स्वामिन्निन्द्र सूर्य ! "वनं रश्मिनाम" (नि० १ । ५) य एषोऽपूपादिरुत्तमपदार्थस्त्वयि त्वन्निमित्ते निहितोऽग्नौ निक्षिप्तः । 'त्वयीति निमित्तसप्तमी' पुनर्देहि तं पुनर्देहि (यथा यमस्य सादने विदथा वदन्नासातै) एवं कृत्वा पुनर्देहि यद् यमस्य सादने यमसदने यम-

लोकेऽन्तरिक्षे विदथा वेदनानि यज्ञवेदनानि वदन् ध्वनयन् प्रकाशयन्-आसातै- आसीतोपतिष्ठेत ॥ ७० ॥ ?

भावार्थ—(वनस्पते य एष त्वयि निहितः पुनर्देहि) हे रश्मियोंके स्वामिन् सूर्य ! जो ये अपूपादि हवन किया हुआ पदार्थ तेरे निमित्त यज्ञाग्नि में डाला है इसको फिर हमको दे (यथा यमस्य सादने विदथा वदन्) जिस प्रकार यह होमा हुआ पदार्थ अन्तरिक्षमें यज्ञकी सूचनाओंको प्रकाशित करता हुआ ठहर सके ॥ ७० ॥

शिक्षा—यज्ञ में होमा हुआ पदार्थ अन्तरिक्षमें पहुँच कर दूर २ स्थानों तकमें भी यज्ञकी सूचना देता है यानि इसकी सुगन्ध सूक्ष्म होकर दूर २ स्थान तक मनुष्यों के अनुभव में आती है और सूर्यरश्मियों द्वारा सूक्ष्मातिसूक्ष्म होकर जैसे ही ऊपर मेघमण्डल में जाती है वैसे ही मेघवृष्टि द्वारा सूक्ष्म स्वरूप में हम तक पहुँचती है ॥ ७० ॥

आ रभस्व जातवेदस्तेजस्वद्धरो अस्तु ते ।
शरीरमस्य सं दहाथैनं धेहि सुकृतामु लोके ॥ ७१ ॥

(जातवेदस्ते तेजस्वद्धरोस्तु,आ रभस्व) हे जातवेदो जाते जाते विद्यमानेन्द्र सूर्य देव ! ते तव तेजस्वद् हरो ज्वलनं दीपनं यत्तद् आरभस्व प्रकाशय "हरो ज्वलतेर्नामधेयम्" (नि० ४।१७) (अस्य शरीरं संदह) अस्य हुतपदार्थस्य शरीरं शीर्णशीलं मेघं संदह संदेहि सम्पादयेत्यर्थ । "शरीरं मेघः शरीरं शृणातेः शमनातेर्वा" (निरु० २।१६) तथा "विवृद्धया शरीरस्य स्रोतांसि निवारयाञ्चकार" (निरु० २ । १७) संदहेत्यत्र दह- धातुर्न भस्मीकरणार्थः, अपितु दानार्थः । अत्र प्रमाणम । "नूनं सा ते······माति धग्भगो नो बृहद्वदेम विदथे सुवीराः । मास्मानतिदंहीर्मा मास्मानति हाय दाः ।(निरु० ४।७) 'नूनं सा ते' इन्द्रदेवत्येयमृक् ,तत् वदेम विदथे सुवीराः, इति समाचारः। तद्वदत्रापि प्रकृत- प्रकरण मिन्द्रदेवत्यम् , विदथा वदन् च समाचारः, तथा चान्यत्र सायणः "त्वमतिधक् ददेर्दानार्थस्य लुङि मन्त्रे घसेत्यादिना च्लेर्लुक् नोस्मानतिक्रम्यान्येभ्यो दक्षिणामदाः" (ऋ० २ । १२ । २१) (अथैनं सुकृतामु लोके धेहि) हे इन्द्र ! अथानन्तरं तं सम्पा- दितं मेघं सुकृतां पुण्यकृतां यज्ञकर्तॄणां लोके स्थानेऽवश्यं धेहि धर पातय । तत्पातनप्रकारश्चोत्तरमन्त्रे ॥ ७१ ॥

भावार्थ—(जातवेदस्ते तेजस्वद्धरोस्तु, आरभस्व) प्रत्येक उत्पन्न पदार्थमें स्वकिरणों से वर्तमान सूर्य देव ! यज्ञाग्निमें होमके अनन्तर तेरी दीप्ति या रश्मिज्वलन

तेजस्वी होना चाहिये अत एव तू अपने तेजसे होम किये हुए पदार्थको अति सूक्ष्म करना आरम्भ कर (अस्य शरीरं संदह) पुनः इस होमे हुये पदार्थ का शीर्णशील यानि फिर पृथिवी पर झरने योग्य मेघ बना (अथेनं सुकृतामु लोके धेहि) हे इन्द्र ! फिर उस सम्पादित मेघको यज्ञकरने वाले महानुभावोंके स्थान तथा देशमें अवश्य गिरा ॥ ७१ ॥

शिक्षा—हवन हो चुके पदार्थका सूर्य अपनी तेजस्वी किरणों द्वारा मेघ बनाता है, पुनः वह मेघ जिस स्थानपर बड़ा यज्ञ किया गया हो वहां अवश्य बर्षता है ॥ ७१ ॥

ये ते पूर्वे परागता अपरे पितरश्च ये ।
तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती ॥ ७२ ॥

(ये ते पूर्वे परागताः पितरो ये चापरे तेभ्यो घृतस्य कुल्या शतधारा व्युन्दत्येतु) हे इन्द्र ! ये ते पूर्वे परागता मेघमण्डलं विद्युद्रूपेण प्राप्ताः पितरो रश्मयो ये चापरे वर्तमाना रश्मयस्तेभ्यः सकाशात् 'अपादाने पञ्चमी' घृतस्योदकस्य कुल्या नदी शतधाराऽसंख्यातधारा व्युन्दती पृथिवीमाद्री कुर्वती-एतु-आगच्छतु "घृतमुकनाम" (नि० १ । १२) ॥ ७२ ॥

भाषार्थ—(ये ते पूर्वे परागताः पितरः) हे सूर्य ! जो तेरी मेघमण्डलको विद्युत्रूप से प्राप्त पहिली किरणें हैं (ये चापरे) और जो वर्तमान किरणें हैं (तेभ्यः घृतस्य कुल्या) उन सभी किरणों से ताड़ित होकर जलकी नदी (शतधारा व्युन्दत्येतु) असंख्य धाराओं में बहती हुई पृथिवी को गीला करती हुई आवे ॥ ७२ ॥

शिक्षा—मेघमण्डलमें मेघसम्पादनकाल की सूर्य किरणें तथा पश्चात् धारणकाल की किरणें विद्युत् के रूपमें वर्तमान होकर मेघको ताड़ित करती हैं जिससे मेघ असंख्य धाराओंकी नदीके रूपमें गीला करता हुआ पृथिवी पर आता है ॥ ७२ ॥

एतदा रोह वय उन्मृजानः स्वा इह बृहदु दीदयन्ते ।
अभि प्रेहि मध्यतो मा पहास्थाः पितॄणां लोकं प्रथमो यो अत्र ॥७३॥

(एतद्वय उन्मृजान आरोहेह स्वा बृहदु दीदयन्ते) हे इन्द्र ! एतद् वयोऽग्निधूममुन्मृजान ऊर्ध्वगत्या शोधयन्नारोह प्राप्तो भव "धूमो वा अस्याग्नेः श्रवो वयः स एनममुष्मिन् लोके श्रावयति" (श० ७ । ३ । १ । २६) तथा "वयसा बृहन् धूमेन

बृहन्" (श० १ । ४ । ४ । ३) इहात्राग्निधूमे स्वा उ स्वकीया एव रश्मयो बृहदु दीदयन्ते दीप्यन्तेऽतः (मध्यतो मापहास्थाः) मध्यतो मध्ये मापहास्था मा त्याक्षीः। अपितु (पितॄणां लोकमभिप्रेहि प्रथमो योऽत्र) पितॄणां लोकं रश्मिलोकमभिप्रेहि-अभि प्रेरय योऽत्र प्रथमो यश्चात्र प्रथमो लोको मेघमण्डलमस्ति ॥ ७३ ॥

भावार्थ—(एतद्वय उन्मृजान आरोहेह स्वा बृहदु दीदयन्ते) हे सूर्य देव। हमारे इस यज्ञाग्नि धूमको ऊर्ध्व गतिसे शोधन करता हुआ प्राप्त हो क्योंकि इस यज्ञाग्नि धूममें तेरी अपनी ही किरणें दीप्त हो रही हैं अतः (मध्यतो मापहास्थाः) इसको मध्यमें मत त्याग अपितु (पितॄणां लोकमभिप्रेहि प्रथमो योत्र) रश्मि लोक के प्रति इस धूमको प्रेरित कर जोकि सबसे प्रथम मेघ मण्डल नामसे प्रसिद्ध है ॥७३॥

शिक्षा—यज्ञाग्नि का सुगन्धि धूम सूर्य किरणों द्वारा मेघ मण्डलमें अवश्य जाता है कारण कि सूर्य किरणोंका कार्य यज्ञाग्निके साथसे ही शुरू होजाता है और वे ऊर्ध्वगतिसे उसको मेघमण्डल तक पहुँचाती हैं ॥ ७२ ॥

समालोचना—

यहां पर विशेष समालोचना न करेंगे कारण कि प्रायः प्रत्येक मन्त्र में अन्य भाष्यकारों का समालोचनीय लेख है, ग्रन्थ विस्तार का भय है। पाठक स्वयं ही हमारे अर्थ और उनके अर्थों का तुलनात्मक अध्ययन करें। इसलिये केवल इतना हो लिखना चाहते हैं कि अन्य लेखकों की पद्धति को जिसको उन्होंने अपने हृदयमें रख कर अर्थ किये हैं वह स्वयं उन्हींको ही सन्तोषजनक नहीं है। अत एव इस अनुवाक में ५, ७, १३, १८, २३, ३०, ३१, ३२, ३३, ३४, ३५, ४०, ५१, ५२, ७१ संख्या वाले मन्त्रों पर यह लिखना पड़ा कि इनका अर्थ समझमें नहीं आता या इनका भाव व्यक्त नहीं होता। हां निम्न मन्त्र पर अवश्य कुछ लिखना है।

यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम्० ॥१३॥

"इस मन्त्र से ऐसा प्रतीत होता है कि मनुष्यों में से सबसे प्रथम मनुष्य विवस्वान् का पुत्र पहिले इस लोकमें आकर मरा" (कोई विद्वन्)

दोष—प्रतीत होता है कि वादी वेदमें मनुष्योंका इतिहास भी मानता है, आजतक जितने इतिहास ग्रन्थ सृष्टिक्रम सम्बन्धी उपलब्ध होते हैं उनमें कहीं ऐसा इतिहास नहीं मिलता, थोड़ी देर के लिये मान भी लिया जावे कि विवस्वान् का पुत्र कोई यम था, यम से पहले विवस्वान् के पिताके मरने का अवसर प्रथम है फिर

उस वैदिक काल में पुत्रके प्रथम मरने का सम्भव अनुचित है इसलिये यह कल्पना ठीक नहीं है।

(२) "और फिर सबसे पहले यमलोक में गया अतः उस लोकका नाम उसके नाम से यमलोक ऐसा पड़ा।" (वादी)

दोष—उस लोक में यम से पहले क्या कोई नहीं रहता था ? यदि वहां कोई रहते थे तो वे कहां से आये ? यदि वह लोक बिलकुल खाली था तब वहां पर वह यम किस प्रकार निर्वाह कर सका क्योंकि किसी भी प्रकार के मनुष्य, पशु, पक्षी, सरीसृप, कृमि और वृक्षादि योनि का कोई भी जीव वहां नहीं हो सकता यदि वहां इनका होना सम्भव हो तो फिर यम का मरकर प्रथम यमलोकमें जाना सिद्ध नहीं हो सकता क्योंकि यमलोक वादीके मन्तव्यसे मृतजीवोंके पहुँचनेका स्थान है। अतः उस शून्य स्थान में जहां कि किसी भी आहारादि की सम्भावना नहीं और न किसी की सङ्गतिका अवसर फिर ऐसे स्थानमें यम जाकर क्या करेगा, अच्छा होता वह सबसे प्रथम न मरता किन्तु उसके साथ सैकड़ों से अधिक जीव मर कर यम लोक को जाते, जिससे वह उनके द्वारा कुछ व्यवस्था करा सकता।

(३) "इसका अभिप्राय यह हुआ जो मनुष्य सब से प्रथम मरता है वह इस कल्प में यम बनता है" (वादी)

दोष—सबसे प्रथम मनुष्यके मरने का सम्भव नहीं है कारण कि "शतायुर्वै पुरुषः" (कौ० ११ । ७) "अपि हि भूयाꣳसि शताद्वर्षेभ्यः पुरुषो जीवति (श० १। ६ । ३ । १६) सौ या सौ वर्षों से अधिक मनुष्य का आयु होता है, इसलिये मनुष्य की अपेक्षा अन्य जीव का यमलोक में जाना सम्भव है। परन्तु यमलोक में जाकर यम बनता है जिस यम को वादी अन्य प्राणियों का मारने वाला मानते हैं तो क्या यम स्वयं ही मरा, उसको किसी ने नहीं मारा ?

(४) "सङ्गमन का अर्थ है जिसमें प्राणी जाकर जमा होते हैं"। (वादी)

दोष—यम का विशेषण सङ्गमन है और सङ्गमन का अर्थ जिसमें प्राणी जाकर जमा होते हैं ऐसा करते हैं। क्या यमलोकमें पहुँच कर यम (सबसे प्रथम मरा हुआ पुरुष) दूसरे मरे हुये प्राणियों का घर बन जाता है ? जब कि यम सदैव के लिये यम लोक का राजा बन जाता है और वहां पर मर कर गये हुए सब जीव उसकी प्रजा बनती हैं तब पुनर्जन्म का सिद्धान्त जोकि वैदिक है उसके विपरीत यम और यमलोक के जीवों का वहां पर स्थायी रहना असम्भव अनुचित और अमाननीय है। अतः इस मन्त्र का सत्यार्थ यह नहीं है। अस्तु।

अथर्ववेद का० १८ अनु० ४।

इस अनुवाक में मुख्यतः समष्टि और व्यष्टि यज्ञ का वर्णन है। समष्टि-यज्ञ के अन्दर अग्नि विद्युत् सूर्य मुख्य देव, फलग्राही यजमानरूप में जीवात्मा तथा उसका सृष्टिक्रम के साथ सम्बन्ध स्वकर्मानुसार योनिप्रवेश, गर्भ-स्थिति शरीर के अन्दर वर्तमान शुक्रादि वस्तुओं के कोश, वात पित्त कफरूप शारीरिक मूलतत्व, शरीरधारक सप्तधातु, फुप्फुस हृदयादि रक्ताशयों का वर्णन, इड़ा पिङ्गला सुषुम्ना नाड़ियां की प्रधानता, रक्तवाहक नाड़ियों और उनके साथ ग्रन्थियों आदि शरीरावयवों का विज्ञान और शरीरधारण के अनन्तर उसके पालन पोषण और शिक्षण की व्यवस्था, आहार द्वारा रस रक्तादि का परिणामविज्ञान, गर्भ के अन्दर वर्तमान जीव की भावनाएं तथा गर्भ से बाहिर आकर उसके स्वाभाविक विकास, माता पिता तथा वृद्ध जनों के प्रति वर्तन, कुटुम्ब सहवास नगर प्रान्त तथा राष्ट्र के पूज्य और रक्षक महानुभावों के प्रति सत्कार का आचरण और अन्त में परमपूज्य परमपालक उपास्य जगदीशदेव की आराधना करने का विधान है। एवं विविध उपयोगी कृत्यों का इस अनुवाक में वर्णन है॥

आरम्भ के सूक्त (१ से १० मन्त्रों) में तीन अग्नियों का विषय है। प्रथम मन्त्र में उनको "जातवेदसः" कहा गया है और फिर उन्हीं को चतुर्थ मन्त्र में "त्रयः सुपर्णाः" शब्दोंसे किसी विज्ञानमें रखा है। आगे चलकर मन्त्र ८ में "अङ्गिरसामयनं पूर्वो अग्निरादित्यानामयनं गार्हपत्यो दक्षिणानामयनं दक्षिणाग्निः" पुनः ६ वें मन्त्रमें भी "पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात्तपतु गार्हपत्यः। दक्षिणाग्निष्टे तपतु शर्म वर्मोत्तरतः०" उन्हीं अग्नियों का वर्णन है। अतः उक्त तीन अग्नियों का एक से दश तक मन्त्रों के सूक्त में समष्टियज्ञ में उपयोग है। "आरोहत जनित्रीम्" इस प्रथम मन्त्रमें उक्त समष्टि और व्यष्टि यज्ञ का श्लेषालङ्कार है। पाठक उक्त विषयों का परिचय यथास्थान कर सकेंगे। प्रकरण में व्याख्येय तीन अग्नियों का बोधक कोष्ठक नीचे देखिये।

अग्नियों का कोष्ठक चित्र—

आदित्यः	अग्निः	इन्द्रः	(समष्टि-अग्नियां) "नैरुक्तपक्षः"
आहवनीयः	गार्हपत्यः	अन्वाहार्यपचनः	(होमाग्नियां) "याज्ञिकपक्षः"
पूर्वोग्निः	गार्हपत्याग्निः	दक्षिणाग्निः	"अङ्गिरसामयनं पूर्वोग्निः०" (अथ० १८।४।८)

(पुरस्तात्तपतु)	(पश्चात्तपतु)	(उत्तरतस्तपतु)	"पूर्वोऽग्निष्ट्वा तपतु......" (अथ० १८। ४। ९)
शमः	कर्म	दमः	"शम इत्याहवनीयः। कर्मेति गार्हपत्यः। दम इत्यन्वाहार्यपचनः" (जै० उ० ४।२६।१५)
प्राणः	अपानः	व्यानः	"प्राणाग्नय एवैतस्मिन् पुरे जाग्रति गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद् गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः (प्रश्नो० ४।३)

आरोहत जनित्रीं जातवेदसः पितृयाणैः सं व आ रोहयामि ।
अवाड्ढव्येषितो हव्यवाह ईजानं युक्ताः सुकृतां धत्त लोके ॥१॥

(जातवेदसो जनित्रीमारोहत) जातवेदसो जाते जाते विद्यमाना हे अग्नीन्द्रसूर्याः ! यूयं जनित्रीं सर्वप्राणिनां जनयित्रीं द्यावापृथिवीमयोमेतां समष्टिसृष्टिमारोहत सन्तिष्ठध्वम् (पितृयाणैर्वः समारोहयामि) अहं प्रजापतिरीश्वरः पितृयाणैः पितृभिः पालकैर्यथा यातव्यं तथाभूतैर्यातव्यमार्गैर्वा युष्मान् समारोहयामि संस्थापयामि (इषितो हव्यवाहो हव्याऽवाट्) इषितो मया प्रेरितो हव्यवाहो जीवो हव्या हव्यानि स्वशक्तिरूपाणि युष्मत्सु हुतवान् । तस्मात् (युक्ता ईजानं सुकृतां लोके धत्त) यूयमेतादृशमीजानं यजमानं युक्ताः सर्वे मिलताः सुकृतां लोके सुकर्मिणां स्थाने योनौ धत्त धारयत ॥ १ ॥

भाषार्थ—(जातवेदसो जनित्रीमारोहत) हे प्रत्येक उत्पन्न हुए पदार्थमें वर्तमान अग्नि-विद्युत्-आदित्य ! तुम, सब प्राणियों के जन्मदेने वाली द्यावापृथिवीरूप समष्टि-सृष्टि को भली प्रकार प्राप्त होओ पितृयाणैर्वः समारोहयामि) मैं प्रजापति ईश्वर तुमको पालकोंके रूपमें इस सृष्टिमें छोड़ता हूँ, इसमें जैसे पालक लोग अपने पालनरूप कर्तव्यमार्गों से वर्तमान होते हैं वैसे संस्थापित करता हूँ (इषितो हव्यवाहो हव्याऽवाट्) मुझसे प्रेरित हुये जीवात्मा ने अपने शक्तिरूप हव्यों को तुम्हारे अन्दर समष्टि-यज्ञ में होम दिया है । अतः (युक्ता ईजानं सुकृतां लोके धत्त) यजमान रूप जीवात्माको तुम सब मिलकर सुकर्मी जीवोंकी योनि में धारण करो ॥ १ ॥

शिक्षा—द्यौ से लेकर पृथिवीपर्यन्त सम्पूर्ण सृष्टि में उत्पन्न होने वाले सभी

जीवोंके शरीरकी उत्पत्ति और धारण आदि परिणामयज्ञ का समष्टि में अग्नि, विद्युत् और आदित्य तीनों देव या अग्नियां आरम्भ कर रही हैं और जीव निज साधनों का हवन करता हुआ इसके परिणामरूपफलको प्राप्त करता है क्योंकि उक्त तीनों अग्नियां इसको कर्मानुसार यथास्थान पर ले जाती हैं और यह सारी व्यवस्था ईश्वरके अधीन है। यह समष्टिसम्बन्धी अर्थ हैं ॥ १ ॥

व्यष्टि में—

(जातवेदसो जनित्रीमारोहत) जातवेदसो हे प्राणापानव्यानाः! "प्राणाग्नय-एवैतस्मिन् पुरे जाग्रति। गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनः। यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः" (प्रश्नो० ४।३) जनित्रीं जीवकलानां जनयित्रीं तनुं सन्तिष्ठध्वम् (पितृयाणैर्वः समारोहयामि) पितृयाणैः पालकधर्मैरत्र तन्वामहं प्रजापतिरीश्वरो वो युष्मान् संस्थापयामि (इषितो हव्यवाहो हव्याऽवाट्) अयं च जीवात्मा मया प्रेरितो हव्या हव्यान्यादेयानि निजकर्मफलानि युष्मत्स्ववाड् ऊढवान् तस्मात् (युक्ता ईजानं सुकृतां लोके धत्त) ईदृशमीजानं यजमानं सुकृतां श्रेष्ठानां लोके स्थाने स्वरूपे वा धत्त धारयत ॥१॥

भाषार्थ—(जातवेदसो जनित्रीमारोहत) हे प्राण अपान व्यानरूप शरीर अग्नियो! तुम जीवनकला की जन्म देने वाली कायामें स्थिर रहो (पितृयाणैर्वः समारोहयामि) तुमको पालक धर्मोंसे इस कायमें मैं प्रजापति ईश्वर संस्थापित करता हूँ (इषितो हव्यवाहो हव्याऽवाट्) इस जीवात्माने मुझसे प्रेरित हो भोगने योग्य निजकर्मफलों को तुम्हारे अन्दर अर्पित किया है इसलिये (युक्ता ईजानं सुकृतां लोके धत्त) इस यजमानको श्रेष्ठजनोंके स्थान या स्वस्थ स्वरूपमें धारण करो ॥ १ ॥

शिक्षा—शरीर यज्ञमें प्राण अपान और व्यानरूप तीन अग्नियां स्थिर हैं जो पालक धर्मों से वर्तमान हैं। ईश्वरसे प्रेरित जीवात्मा कर्मफलोंका भोग उन के आधार पर करता है इस लिये प्राण, अपान और व्यानरूप प्राणों का विशेष ध्यान रखना चाहिये ॥ १ ॥

देवा यज्ञमृतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यज्ञायुधानि।
तेभिर्याहि पथिभिर्देवयानैर्यैरीजानाः स्वर्गं यन्ति लोकम् ॥ २ ॥

(देवा यज्ञमृतवो हविः पुरोडाशं स्रुचो यज्ञायुधानि कल्पयन्ति) हे जीव! देवा दिव्यगुणा अग्न्यादयो द्योतमानाश्च रश्मयो यज्ञमेतं समष्टिरूप यज्ञमथ च तत्र

यज्ञे ऋतवो वसन्तादयो हविः पुरोडाशं स्रुच एवं यज्ञायुधान्यावश्यकवस्तूनि कल्पयन्ति समर्थयन्ते (तेभिर्देवयानैः पथिभिर्याहि) हे जीव ! त्वं तैर्देवयानमार्गैः संसारयात्रायां प्रकृष्टं गच्छ (यैरीजानाः स्वर्गं लोकं यन्ति) यैरीजाना यज्ञं कुर्वाणाः स्वर्गं सुखनिमित्तं लोकं शरीरं प्राप्नुवन्ति ॥ २ ॥

भाषार्थ—(देवा यज्ञमृतवो हविः पुरोडाशं स्रुचो यज्ञायुधानि कल्पयन्ति) हे जीव दिव्यगुण अग्नि आदि और द्योतमान सूर्यरश्मियां इस समष्टिरूप यज्ञके तथा वसन्तादि ऋतुएं उसके योग्य हविः पुरोडाश और स्रुवा इत्यादि यज्ञ साधनों का सम्पादन करते हैं (तेभिर्देवयानैः पथिभिर्याहि) उन देवयान मार्गोंसे संसारयात्रामें तू भली प्रकार चल (यैरीजानाः स्वर्ग लोकं यन्ति) जिनके अनुसार यज्ञ करने वाले सुखनिमित्त शरीर को प्राप्त करते हैं ॥ २ ॥

शिक्षा—समष्टियज्ञ को दिव्यगुण अग्नि आदि पदार्थ और द्योतमान सूर्यरश्मियां तथा उस समष्टि-यज्ञ में नाना प्रकारके परिणाम तथा विकार हवि आदियोंके रूपमें वसन्त आदि ऋतुएं सम्पादन करती हैं, जीवात्मा उक्त यज्ञमें सृष्टिक्रम के नियमों द्वारा अपने शरीरको धारण करता रहता है ॥ २ ॥

ऋतस्य पन्थामनु पश्य साध्वङ्गिरसः सुकृतो येन यन्ति ।
तेभिर्याहि पथिभिः स्वर्गं यत्रादित्या मधु भक्षयन्ति तृतीये नाके
अधि वि श्रयस्व ॥ ३ ॥

(ऋतस्य पन्थामनु पश्य येन सुकृतोऽङ्गिरसः साधु यन्ति) हे जीव ! ऋतस्यास्य समष्टिरूपस्य यज्ञस्य पन्थां मार्गं सृष्टिक्रममनुपश्य विजानीहि येन सृष्टिक्रममार्गेण बाध्यमाना अङ्गिरसोऽग्नयः "अङ्गिरा वाग्निः" (शत० ६ । ४ । ४ । ४) पूर्वोक्ता जातवेदसोऽग्निविद्युत्सूर्याः सुकृतः सुकर्माणः संसारवाहकाः सन्तः साधु यन्ति सम्यग्गच्छन्ति (तेभिः पथिभिः स्वर्गं याहि) हे ! जीव तेभिरग्न्यादीनां मार्गैस्त्वं प्रथमं तु स्वर्गं स्वरुदकं गमयतीति मेघमण्डलं जलवतीं दिवं याहि गच्छ (यत्रादित्या मधु भक्षयन्ति) यत्रादित्याः सूर्यरश्मयो मधूदकं भक्षयन्ति–उदकेन पूर्णा भवन्तीत्यर्थः (तृतीये नाके अधिविश्रयस्व) तत्र तृतीये नाके पुनर्जन्मार्थमात्मनामाश्रयणीयेऽधि दिवि विश्रयस्वाश्रयस्व "आत्मा वै नाकसदः" (श० ८ । ६ । १ । १२–१३) ॥ ३ ॥

भाषार्थ—(ऋतस्य पन्थामनुपश्य येन सुकृतोङ्गिरसः साधु यन्ति) हे जीव ! इस सृष्टिरूप यज्ञके सृष्टिक्रम का परिचय कर जिस सृष्टिक्रम मार्गसे बाधित हो कर पूर्वोक्त अग्नि, विद्युत्, सूर्य ठीक २ अपना २ कार्य करते हुए संसार वाहक

बनकर समीचीन रूपसे गति करते हैं (तेभिः पथिभिः स्वर्गं याहि) उन अग्नि आदि देवोंके नियमित मार्गोंसे तू प्रथम मेघमण्डल को प्राप्त हो (यत्रादित्या मधु भक्षयन्ति) जहां पर सूर्य रश्मियां जलपूर्ण होती हैं (तृतीये नाके अधिविश्रयस्व) उस तृतीय स्थानमें जोकि पुनर्जन्मार्थ आत्माओंका आश्रयस्थान है वहां तू आश्रय प्राप्त कर ॥ ३ ॥

शिक्षा—जिस प्रकार अग्नि, विद्युत्, सूर्य इस समष्टिमें सृष्टिक्रम के विधायक और उसमें वर्तमान हैं एवं जीवात्मा भी स्वकर्मवश सृष्टिक्रमके साथ २ जन्म धारण करनेके लिये प्रथम मेघमण्डलको प्राप्त होता है ॥ ३ ॥

त्रयः सुपर्णा उपरस्य मायू नाकस्य पृष्ठे अधि विष्टपि श्रिताः ।
स्वर्गा लोका अमृतेन विष्ठा इषमूर्जं यजमानाय दुह्राम् ॥४ ॥

(त्रयः सुपर्णा विष्टप्यधिश्रिताः) त्रयः सुपर्णाः पूर्वोक्तास्त एव त्रयोऽग्नयो विष्टपि भुवनेऽधिश्रिता अधिष्ठिताः सन्ति (नाकस्य पृष्ठेऽधि-उपरस्य मायू) तेषां द्वौ विद्युत्सूर्यौ नाकस्य पृष्ठेऽधि मेघमण्डले–उपरस्य मेघस्य मायू निर्मातारौ स्तः "उपर इति मेघनाम" (नि० १ । १०) (स्वर्गा लोका अमृतेन विष्ठाः) स्वरुदकं गताः पुनर्जन्मप्राप्तये मेघमण्डलस्था लोका जना जायमानस्वभावा जीवा अमृतेन स्वामरधर्मेण विष्ठाः स्थिताः सन्ति (यजमानायेषमूर्जं दुह्राम्) यश्च तेषु यजमानः पुनर्जन्मप्राप्तये स्वात्माहुतिं बीजभावेन प्रयच्छन् सङ्गच्छमानस्तस्मा इमे त्रयोऽग्नय इषमूर्जमुत्पत्तिनिमित्तभूतेऽन्न-रसात्मके शुक्रशोणिते दुह्रां सम्पादयन्ति ॥ ४ ॥

भाषार्थ—(त्रयः सुपर्णा विष्टप्यधिश्रिताः) पूर्वोक्त जो तीनों अग्नियां इस भुवनमें वर्तमान हैं (नाकस्य पृष्ठेऽधि–उपरस्य मायू) उनमें से दो विद्युत् और सूर्य तो मेघमण्डलमें मेघको बनाने वाली हैं (स्वर्गा लोका अमृतेन विष्ठाः) मेघमण्डलस्थ उत्पन्न होने वाले जीवात्मा वहां अपने अमर धर्मसे स्थित हैं (यजमानायेषमूर्जं दुह्राम्) और उनमें जो जीवात्मा पुनर्जन्म प्राप्तिके लिये अपने आत्माकी आहुतिको बीजभावसे त्यागनेको तैयार है उसके लिये यह अग्नियां शुक्रशोणितका सम्पादन करती हैं ॥ ४ ॥

शिक्षा—विद्युत् और सूर्य मेघ बनानेमें हेतु हैं, मेघमण्डलमें जीवात्माएं अपने अमर धर्मसे प्राप्त होते हैं वहां से जब कोई आत्मा जन्मधारण करनेके लिये तैयार होता है तो उसके लिये उक्त अग्नियां शुक्र शोणित यानी वीर्य और रज का सम्पादन करती हैं ॥ ४ ॥

जुहूर्दाधार द्यामुपभृदन्तरिक्षं ध्रुवा दाधार पृथिवीं प्रतिष्ठाम् ।
प्रतीमां लोका घृतपृष्ठाः स्वर्गाः कामं कामं यजमानाय दुह्राम् ॥५॥

(जुहूर्द्यां दाधारोपभृदन्तरिक्षम्) समष्टियज्ञे लौकिकयज्ञवत्साधानि, तत् लौकिके या जुहूर्हविः प्रक्षेपसाधनमस्त्यत्र समष्टियज्ञे द्यां दिवं द्युरूपं दाधार धारयति तयैव जुहूरूपया दिवा प्राणिबीजानि जलानि हूयन्ते, उपभृद् या चोभृदस्ति साऽन्तरिक्षमन्तरिक्षरूपं धारयति (ध्रुवा प्रतिमां प्रतिष्ठां पृथिवीं दाधार) ध्रुवा हविःस्थानरूपा स्थिरा वेदिरत्र समष्टियज्ञे प्रतिमा स्थूला प्राणिनामाधाररूपा या पृथिवी तां तद्रूपं धारयति (स्वर्गा घृतपृष्ठा लोका यजमानाय कामं कामं दुह्राम्) स्वरादित्यंगामिनो लोका लोक्यन्ते ये ते रश्मयो घृतपृष्ठा घृतं जलं पृष्ठे येषा ते जलवाहकाः सन्तो यजमानाय सर्वहुताय गर्भे सङ्गच्छमानाय कामं कामं कर्मानुकूलं योनिफलं दुह्रां दुहन्ति सम्पादयन्ति ॥ ५ ॥

भाषार्थ—(जुहूर्द्यां दाधारोपभृदन्तरिक्षम्) समष्टियज्ञमें होमयज्ञके समान कल्पना है कि होमयज्ञ में जो जुहू हविडालनेका पात्र होता है वह समष्टियज्ञमें द्यौके रूपको धारण करता है उस जुहू रूप द्यौ से प्राणियों के बीज जलमय होकर समष्टि यज्ञमें गिरते हैं और जो होमयज्ञमें उपभृत् है वह यहां अन्तरिक्ष रूपको धारण करती हैं (ध्रुवा प्रतिमां प्रतिष्ठां पृथिवीं दाधार) होमयज्ञमें हवि स्थानरूप जो वेदी है वह यहां समष्टि यज्ञमें प्राणियोंका आधार रूप पृथिवी के रूपको धारण करती है (स्वर्गा घृतपृष्ठा लोका यजमानाय कामंकामं दुह्राम्) आदित्यको प्राप्त होने वाली रश्मियां जलवाहक होती हुई गर्भमें जाते हुए जीवात्मरूप यजमानके लिये कर्मानुकूल योनिफलको सम्पादन करती हैं ॥ ५ ॥

शिक्षा—होमयज्ञमें जिसप्रकार जुहू, उपभृत्, ध्रुवा मुख्यसाधन होते हैं एवं समष्टि यज्ञमें उनके तुल्य द्यौ, अन्तरिक्ष और पृथिवी उनका स्थान लेते हैं क्योंकि इस समष्टि यज्ञमें द्यौ से प्राणिबीज जलमय अवस्थामें गिरता है सूर्यकी रश्मियां जलवाहक उनको लाती हैं और कर्मानुकूल योनिरूप फलोंका सम्पादन करती हैं ॥ ५ ॥

ध्रुव आ रोह पृथिवीं विश्वभोजसमन्तरिक्षमुपभृदा क्रमस्व ।
जुहु द्यां गच्छ यजमानेन साकं स्रुवेण वत्सेन दिशः प्रपीनाः
सर्वा धुक्ष्वाहृणीयमानः ॥६ ॥

(ध्रुवे विश्वभोजसं पृथिवीमारोह) तस्मादत्र समष्टियज्ञे हे ध्रुवे त्वं विश्व-

भोजसं सर्वभोगायतनरूपां पृथिवीमारोह यतस्तव धारणकार्यमत्र समष्टियज्ञे पृथिवी विधास्यति (उपभृदन्तरिक्षमाक्रमस्व) हे उपभृत्त्वमन्तरिक्षमाक्रमस्वारोह यतस्ते मध्यमं कार्यमन्तरिक्षं करिष्यति (जुहु द्यां गच्छ) हे जुहु ! त्वं दिवं गच्छ ते सेचनकार्यं समष्टियज्ञे द्यौर्विधास्यति (यजमानेन वत्सेन स्रुवेण साकं सर्वा दिशः प्रपीनाः) हे यजमान जीव ! त्वया वत्सेन गर्भे शिशुरूपेण स्रुवेण साकं सर्वादिशः प्रपीना व्यक्ता आधानयोग्याः सन्ति (आहृणीयमानो धुक्ष्व) तस्मात्त्वमाहृणीयमानः शान्तः सन्तोषं कुर्वन् । "हृणीयते क्रुद्धयति कर्मा" (नि० २ ।१२) धुक्ष्व स्वानुकूलं रसं मातृदुग्धं वा पिब जन्म धारयेत्यर्थः । ॥ ६ ॥

भाषार्थ—(ध्रुवे विश्वभोजसं पृथिवीमारोह) अतएव इस समष्टि यज्ञमें हे ध्रुवा तू सर्व भोगोंके आयतन रूप पृथिवीको प्राप्त हो क्योंकि तेरा धारण कार्य यहां समष्टि यज्ञमें पृथिवी करेगी (उपभृदन्तरिक्षमाक्रमस्व) हे उपभृत् तू समष्टि-यज्ञमें अन्तरिक्ष को प्राप्त हो क्योंकि तेरा मध्यम कार्यअन्तरिक्ष करेगा (जुहु द्यां गच्छ) हे जुहू ! तू समष्टि यज्ञमें द्यौ को प्राप्त हो क्योंकि तेरा सेचन कार्य द्यौ करेगी (यजमानेन वत्सेन स्रुवेण साकं सर्वा दिशः प्रपीनाः) हे यजमानरूप जीव ! स्रुवा से घृत होमके तुल्य गर्भमें शिशु रूप में वर्तमान तेरे साथ सारी दिशायें आधान योग्य हैं (आहृणीयमानो धुक्ष्व) इसलिये तू सन्तोष करता हुआ स्वानुकूल माताके दूध का पान कर यानी पुनर्जन्मको धारण कर ॥ ६ ॥

शिक्षा—होमयज्ञकी ध्रुवा समष्टि यज्ञमें पृथिवीको अपना प्रतिनिधि बनाती है। उपभृत् अन्तरिक्षको और जुहू द्यौको तथा गर्भगतशिशु यजमानके रूप में हो कर सृष्टिक्रमके नियमोंसे प्रेरित हुआ शान्तिसे स्वानुकूल माताके दूध वा मातृरसका पान करता है ॥ ६ ॥

तीर्थैस्तरन्ति प्रवतो महीरिति यज्ञकृतः सुकृतो येन यन्ति ।
अत्रादधुर्यजमानाय लोकं दिशो भूतानि यदकल्पयन्त ॥ ७ ॥

(प्रवतो महीस्तीर्थेन तरन्तीति येन यज्ञकृतः सुकृतो यन्ति) प्रवतः प्रगता विस्तृता महीर्भूमयो योनयस्तीर्थेन वेदाध्ययनादिशुभकर्मणा तरन्ति पारयन्ति, इति हेतोर्येन तेन तीर्थेन जनाः यज्ञकृतः सुकृतश्च सन्तो यन्ति जीवनयात्रायां गच्छन्ति (दिशो भूतान्यकल्पयन्त) सर्वा दिशा भूतानि वस्तूनि यद्यतोऽकल्पयन्त सम्पादयन्ति तस्मात्(यजमानायात्र लोकमदधुः) यजमानाय जीवायात्र समष्टौ लोकं शरीररूपं स्थानमदधुर्धारयन्ति ॥ ७ ॥

भाषार्थ—(प्रवतो महीस्तीर्थेन तरन्तीति येन यज्ञकृतः सुकृतो यन्ति) विस्तृत योनियां वेदाध्ययनादि शुभकर्मसे जीवको पार करती हैं। अतएव उससे यज्ञ करने वाले पुण्य कर्मी होकर जीवन यात्रा करते हैं (दिशो भूतान्यकल्पयन्त) सारी दिशायें वस्तुओंका निर्माण करती हैं। इसलिये (यजमानायात्र लोकमदधुः) जीवरूप यजमानके लिये यहां समष्टिमें शरीरको धारण करती हैं॥ ७॥

शिक्षा—वेदाध्ययनादि शुभकर्मसे मनुष्य संसार सागरसे तैर सकता है, समष्टिमें सब तरफसे जैसे अन्य वस्तुएं बनती हैं वैसे जीवशरीर की उत्पत्ति भी होती है॥ ७॥

अङ्गिरसामयनं पूर्वो अग्निरादित्यानामयनं गार्हपत्यो दक्षिणा-नामयनं दक्षिणाग्निः। महिमानमग्नेर्विहितस्य ब्रह्मणा समङ्गः सर्व उप याहि शग्मः॥ ८॥

(अङ्गिरसामयनं पूर्वोग्निः) अङ्गिरसामङ्गरसानां प्राणानां प्राणशक्तीना-मयनं स्थानं निमित्तं पूर्वोग्निः सूर्योऽस्ति, अत एव सर्वजीवबीजशक्तिरुत्पद्यते (आदित्यानामयनं गार्हपत्यः) आदित्यानामादानधर्माणां प्रजानां प्राणिनामयनं स्थानं निमित्तं गार्हपत्यः पृथिवीस्थानोऽग्निरस्ति। "आदित्या वै प्रजाः" (तै० १। ८। १) अङ्गिरसः प्राणा आदित्यान् प्राणिनः प्राप्नुवन्ति। "एतेन वा अङ्गिरस आदित्यानाप्नुवन्" (तां० १६। १४। २) (दक्षिणानामयनं दक्षिणाग्निः) दक्षिणानां गमनशीलानामन्तरूष्मणामयनं स्थानं निमित्तं दक्षिणाग्निरन्तरिक्षस्थानो वायुर्वैन्द्रो वास्ति (सर्वः समङ्गः शग्मो ब्रह्मणा विहितस्याग्नेर्महिमानमुपयाहि) सकलः सम्य-गङ्गः सुशरीरः शक्तः संस्त्वं हे जीव! ब्रह्मणा जगदीश्वरेण विहितस्य विरचितस्याग्ने-र्महिमानमुपगच्छ॥ ८॥

भाषार्थ—(अङ्गिरसामयनं पूर्वोग्निः) प्राणशक्तियोंका निमित्त सूर्य है, उसीसे सर्व जीवोंकी बीजशक्तिका आगमन होता है (आदित्यानामयनं गार्हपत्यः) शरीरधारी जीवों का निमित्त पृथिवी स्थान अग्नि है (दक्षिणानामयनं दक्षिणाग्निः) शरीरके अन्दर विचरण करनेवाली उष्मा–हरारत का निमित्त अन्तरिक्ष स्थान वायु सहित विद्युत् है जगदीश्वरकी रची हुई अग्निकी यह महिमा है (सर्वः समङ्गः शग्मो ब्रह्मणा विहितस्याग्नेर्महिमानमुपयाहि) सब कलाओं से युक्त तथा उत्तम अङ्गों वाला समर्थ शरीरधारी बनकर हे जीव तू अग्नि तेजकी महिमाको प्राप्त हो॥ ८॥

शिक्षा—सूर्य, अग्नि और विद्युत्, वायु प्राणीमात्रके प्राण शक्तियों शरीरों

और शरीरके अन्दर की जीवन योग्य उष्माका कारण हैं, जगदीश देव की रची हुई अग्नि की यह महिमा है, इसके अधीन होकर जीव कर्म करनेके लिये संसार में शरीर धारण करता है ॥ ८ ॥

पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात् तपतु गार्हपत्यः ।
दक्षिणाग्निष्टे तपतु शर्म वर्मोत्तरतो मध्यतो अन्तरिक्षाद् दिशो दिशो अग्ने परिपाहि घोरात् ॥ ९ ॥

(पूर्वो अग्निष्ट्वा पुरस्ताच्छं तपतु) पूर्वोऽग्निः सूर्यस्त्वा पुरस्तात् सम्मुखतः शं कल्याणाय तपतु प्राणशक्तिं प्रयच्छतु (गार्हपत्यः पश्चात् शं तपतु) गार्हपत्यः पृथिवीस्थानोऽग्निष्ट्वा शं कल्याणाय पश्चात् तपतु (दक्षिणाग्निष्टे शर्म वर्मोत्तरतो मध्यतः तपतु) दक्षिणाग्निरिन्द्रस्ते शर्म ब्राह्मणस्थानं वक्त्रं मुखं वर्म क्षत्रिय-तुल्यं भुजस्थानं तपतु (उत्तरतो मध्यतोऽन्तरिक्षादिशो दिशो घोरादग्ने परिपाहि) उत्तरतो मध्यतोन्तरिक्षादिशो दिशो हे अग्ने ! त्वं घोराद् दुःखात् परिरक्ष ॥ ६ ॥

भाषार्थ—(पूर्वो अग्निष्ट्वा पुरस्ताच्छं तपतु) हे जीव ! तुझको सूर्य सामनेकी तरफ से कल्याणके लिये तपाये एवं प्राणशक्ति को प्रदान करे, (गार्हपत्यः पश्चात् शं तपतु) पृथिवीकी अग्नि तुझे पृष्ठकी तरफ कल्याणके लिये तपावे एवं तेरे जीवनका आश्रय बने (दक्षिणाग्निष्टे शर्म वर्मोत्तरतो मध्यतः तपतु) वायुके साथ विद्युत् तेरे ब्राह्मण-स्थानीय मुख और क्षत्रियके तुल्य भुजास्थानको तपावें एवं वाणीशक्ति और बलका प्रदान करें (उत्तरतो मध्यतोन्तरिक्षादिशो दिशो घोरादग्नेः परिपाहि) उत्तरसे मध्यसे अन्तरिक्षसे दिशादिशा से हे अग्ने ! दुःख मात्रसे मेरी रक्षा कर ॥ ६ ॥

शिक्षा—सूर्य, अग्नि, वायु-विद्युत् शरीर धारणके लिये सब तरफसे जीव की रक्षा करते हैं ॥ ६ ॥

यूयमग्ने शंतमाभिस्तनूभिरीजानमभि लोकं स्वर्गम् ।
अश्वा भूत्वा पृष्टिवाहो वहाथ यत्र देवैः सधमादं मदन्ति ॥१०॥

(अग्ने यूयं शंतमाभिस्तनूभिरीजानं स्वर्गं लोकं पृष्टिवाहोऽश्वा भूत्वा वहाथ) अग्ने हेऽग्नयः ! 'वचनव्यत्ययः' । यूयं शंतमाभिःकल्याणसाधिकाभिस्तनूभिः स्वज्वालारूपाभिरीजानं जीवनयज्ञं कुर्वाणं जीवात्मनं स्वर्गं लोकं मेघमण्डलं पृष्टिवाहो रेतःसेचनकर्तारः प्राणिबीजवाहका अश्वा भूत्वा वहाथ वहथ स्म "पृष्टयो वै रेतः सिचः" श० ८ । ६ । २ । ७ (यत्र देवैः सधमादं मदन्ति) यत्र मेघमण्डले देवैः सूर्यरश्मिभिः सह सधमादं सहयोगं मदन्ति सेवन्ते ॥१०॥

भाषार्थ—(अग्ने यूयम्) हे अग्नियो ! तुम (शंतमाभिस्तनूभिः) कल्याण साधक स्वदीप्तियों से (ईजानम्) जीवन यज्ञ करनेवाले जीवात्माको (स्वर्गं लोकम्) मेघमण्डलके प्रति (पृष्टिवाहोऽश्वा भूत्वा वहाथ) वीर्यरूप प्राणियोंके बीजके वाहक घोड़े बनकर तुम वहन करते हो (यत्र देवैः) जिस मेघमण्डलमें सूर्य रश्मियोंके साथ सब जीवात्मा (सधमादं मदन्ति) सहयोगका सेवन करते हैं ॥ १० ॥

शिक्षा—अग्नि, विद्युत्, सूर्य तीनोंकी सूक्ष्म दीप्तियां मेघमण्डलमें प्राप्त जीवात्माओंको जन्म धारण करनेके लिये हेतु बनती हैं ॥ १० ॥

शमग्ने पश्चात् तप शं पुरस्ताच्छमुत्तराच्छमधरात् तपैनम् ।
एकस्त्रेधा विहितो जातवेदः सम्यगेन धेहि सुकृतामु लोके ॥ ११ ॥

(अग्न एनं पश्चाच्छं तप) हे अग्ने ! एनमेतं जीवं पश्चात्कल्याणाय तप (पुरस्ताच्छमुत्तराच्छमधराच्छं तप) तथा पुरस्तात्कल्याणायोत्तराच्च कल्याणायाधराच्च कल्याणाय तप (एकस्त्रेधा विहितो जातवेद एनं सुकृतामु लोके सम्यग्धेहि) स्वरूपत एक एव पदार्थस्त्रेधा त्रिधाऽग्निविद्युत्सूर्यनामभिस्त्रिप्रकारो विहितो नियोजितो हे जातवेदोऽग्ने त्वमेनं जीवं सुकृतामु कल्याणवतां हि लोके शरीरे सम्यक् स्थापय ॥ ११ ॥

भाषार्थ—(अग्न एनं पश्चाच्छं तप) हे अग्ने ! इस जीवको पश्चिम दिशामें कल्याणकेलिये अपना तेज दे (पुरस्ताच्छमुत्तराच्छमधराच्छं तप) पूर्व दिशामें उत्तर दिशामें पश्चिमदिशामें कल्याणके लिये तेज दे एवं किसी भी दिशामें इसका जन्म हो सर्वत्र कल्याण सम्पादन कर (एकस्त्रेधा विहितो जातवेद एनं सुकृतामु लोके सम्यग्धेहि) स्वरूपतः एक ही होता हुआ अग्नि, विद्युत, सूर्य नामों से तीन प्रकारके स्वरूपमें पृथिवी, अन्तरिक्ष और द्यौ स्थानके भेदसे नियुक्त है, एवं हे अग्नि ! इस जीवको पुण्यकर्मियोंके शरीरमें अच्छी तरह स्थिर कर ॥ ११ ॥

शिक्षा—जीवका जन्म किसी भी दिशामें क्यों न हो सब जगह अग्नितत्व इसमें निमित्त बनता है, जो कि स्थान भेदसे अग्नि, विद्युत्, सूर्यके नामसे प्रसिद्ध है वही इसको उत्तम से उत्तम शरीरमें भी धारण कराती है ॥ ११ ॥

शमग्नयः समिद्धा आ रभन्तां प्राजापत्यं मेध्यं जातवेदसः ।
शृतं कृण्वन्त इह माव चिक्षिपन् ॥ १२ ॥

(जातवेदसोऽग्नयः समिद्धाः प्राजापत्यं मेध्यं शमारभन्ताम्) जाते जाते विद्यमाना अग्नयः समिद्धाः स्वस्वलोकं पृथिव्यामन्तरिक्षे दिवि प्राप्तबलाः सन्तः प्राजापत्यं प्राणे भवं प्राणप्रयोजनकं प्राणधारणाय जन्मग्रहणाय । "प्राणो हि प्रजापतिः त थः

ह्येवेदं सर्वमनु प्रजायते" (श० ४ । ५ । ५ । १३) मेध्यं शुद्धं शं कल्याणायारभन्तामासमन्तात्सर्वत्र यथायोग्यं नयन्तु नयन्तीत्यर्थः । (शृतं कृण्वन्त इह मावचिक्षिपन्) शृतं पक्वं सम्पन्नं कृण्वन्तः कुर्वन्तोऽग्नय इहात्र संसारे मावचिक्षिपन् न कदापि अस्तं व्यस्तं कुर्वन्तु कुर्वन्ति वा ॥ १२ ॥

भाषार्थ—(जातवेदसोऽग्नयः समिद्धाः) उत्पन्न मात्र वस्तुओंमें विद्यमान अग्नियो तुम अपने २ लोक यानि पृथिवी, अन्तरिक्ष और द्यौ में बलवाली होती हुई (प्राजापत्यं मेध्यम्) प्राणधारणयोग्य शुद्ध गर्भको (शमारभन्ताम्) कल्याणके लिये यथोचित रूपमें आरम्भ करो (शृतं कृण्वन्तः) परिपक्व करते हुए (इह-मावचिक्षिपन्) यहां मध्यमें कदापि न अस्तव्यस्त करो या करते हो ॥ १२ ॥

शिक्षा—अग्नि, विद्युत् और सूर्य अपने २ स्थानमें बलिष्ठ होते हुये प्राण धारण करने योग्य नूतन गर्भको बनाते हैं, तथा पूर्णावस्था तक भी पहुँचाते हैं ॥१२॥

यज्ञ एति विततः कल्पमान ईजानमभि लोकं स्वर्गम् ।
तमग्नयः सर्वहुतं जुषन्तां प्राजापत्यं मेध्यं जातवेदसः ।
शृतं कृण्वन्त इह मावचिक्षिपन् ॥ १३ ॥

(कल्पमानो यज्ञो विततः ईजानं स्वर्गं लोकमभ्येति) कल्पमानः कल्पयमानः कल्पं संसारं कुर्वाणः । 'अन्तर्गतो णिजर्थः' । यज्ञः समष्टियज्ञो विततो विस्तृतः सन्, ईजानमात्मानं स्वर्गं सुखसाधकं लोकं शरीरमभ्येति नयति (तं सर्वहुतं प्राजापत्यं मेध्यं जातवेदसोऽग्नयो जुषन्ताम्) तं सर्वहुतमात्मसमर्पिणं जीवं प्राजापत्यं प्राणप्रयोजनकं मेध्यं शुद्धहवीरूपं जातवेदसोऽग्नयो जुषन्तां सेवन्ताम् (शृतं कृण्वन्त इह मावचिक्षिपन्) पूर्ववत् ॥ १३ ॥

भाषार्थ—(कल्पमानो यज्ञो विततः) कल्प को बनाने वाला समष्टियज्ञ विस्तृत होता हुआ (ईजानम्) आत्मा को (स्वर्ग लोकम्) सुखसाधक शरीरके प्रति (अभ्येति) ले जाता है (तं सर्वहुतम्) उस आत्मसमर्पी जीवको (प्राजापत्यं मेध्यम्) प्राणप्रयोजनवाले शुद्ध हविरूपको (जातवेदसोऽग्नयः) उत्पन्न मात्र वस्तुओंमें विद्यमान अग्नियां (जुषन्ताम्) उपयुक्त करें (शृतं कृण्वन्त इह माव चिक्षिपन्) पूर्व मन्त्रके अनुसार इसका अर्थ समझिये ॥ १३ ॥

शिक्षा—कल्पनिर्माण करनेके लिये समष्टियज्ञ विस्तृत होकर जीवात्माको उसके अनुकूल शरीरमें ले जाता है और इस कार्यमें अग्नि, विद्युत्, सूर्य उपयुक्त होते हैं ॥ १३ ॥

ईजानश्चितमारुक्षदग्निं नाकस्य पृष्ठाद्द दिवमुत्पतिष्यन् ।
तस्मै प्र भाति नभसो ज्योतिषीमान्त्स्वर्गः पन्थाः सुकृते देवयानः ॥१४॥

(ईजानो नाकस्य पृष्ठाद् दिवमुत्पतिष्यन् चितमग्निमारुक्षत्) ईजानः स एव जीवात्मा नाकस्य सूर्यस्य पृष्ठान्मण्डलात् । "नाक आदित्यो भवति नेता रसानां नेता भासां ज्योतिषां प्रणयः" (निरु० २ । १४) दिवं मेघमण्डलमुत्पतिष्यन्नुद्गमिष्यन् सन् चितमग्निं पृथिवीलोकमारुक्षच्छरीरधारणायारोहति । "अयं वाव लोकोऽग्निश्चितः" (श० १० । १ । २ । २) (तस्मै सुकृते नभसो ज्योतिषीमान् देवयानः स्वर्गः पन्थाः प्रभाति) तस्मै सुकृते पुण्यकृते जीवाय नभस आकाशस्य ज्योतिषीमान् प्रकाशयुक्तो देवयानो रश्मियानः स्वर्गः सुखसाधको मार्गः प्रभाति प्रकटी भवति ॥ १४ ॥

भाषार्थ—(ईजानः) पूर्वोक्त जीवात्मा (नाकस्य पृष्ठात्) सूर्यमण्डल से (दिवमुत्पतिष्यन्) मेघमण्डल की ओर पक्षी की तरह उड़ता हुआ (चितमग्निम्) शरीर धारण करनेके लिये पृथिवी लोक को (आरुक्षत्) आता है । (तस्मै सुकृते) उस कर्मशील जीवके लिये (नभसः) आकाश का (ज्योतिषीमान्) प्रकाशमय (देवयानः) रश्मियान (स्वर्गः) सुख साधक (पन्थाः) मार्ग (प्रभाति) प्रकट है ॥ १४ ॥

शिक्षा—जीवात्मा सूर्य रश्मि से जब मेघमण्डलमें चला जाता है तब पुनः वहां से शरीर धारण करनेकी शक्तिको प्राप्त करके आकाशके मध्यसे प्रकाशयुक्त रश्मिमार्ग से पृथिवी पर आता है । ॥ १४ ॥

अग्निर्होताध्वर्युष्टे बृहस्पतिरिन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु ।
हुतोयं संस्थितो यज्ञ एति यत्र पूर्वमयनं हुतानाम् ॥ १५ ॥

(अग्निष्टे होता बृहस्पतिरध्वर्युरिन्द्रो ब्रह्मा दक्षिणतस्तेऽस्तु) 'इतो व्यष्टियज्ञ आरभ्यते' हे जीव ! तव शरीरधारणाय व्यष्टियज्ञे शरीरयज्ञेऽग्निः पृथिवीस्थानोऽग्निर्होताऽस्ति बृहस्पतिर्वर्षाधिपतिर्देवस्तेऽध्वर्युरस्ति, इन्द्रो मध्यवर्ती विद्युद्रूपो देवस्ते दक्षिणतो ब्रह्माऽस्ति । इमे तव यज्ञरक्षका इति मन्तव्यम् । (अयं हुतः संस्थितो यज्ञ एति यत्र हुतानां पूर्वमयनम्) अयं हुतो मया हुतः संस्थितो योनिसम्बन्धे निहितो यज्ञ एति गच्छति हुतानां मया हुतानां जीवानां पूर्वं प्रथममयनं स्थानं यत्र भवति तत्रोषधिगर्भे मातापितृबीजभावे वा ॥ १५ ॥

भाषार्थ—(अग्निष्टे होता) 'इस मन्त्रसे व्यष्टि यज्ञ प्रारम्भ होता है' । हे जीव ! तेरे शरीर धारणके लिये व्यष्टियज्ञमें पृथिवी स्थानो अग्नि होता है (बृहस्पति-

र्ध्वर्युः) वर्षाका स्वामी द्यु स्थानी बृहस्पतिदेव तेरा अध्वर्यु है (इन्द्रो ब्रह्मा दक्षिणतस्तेऽस्तु) मध्यस्थानी विद्युत् यज्ञके दक्षिणमें बैठने वाला ब्रह्मा है। यह सब तेरे शरीरयज्ञके रक्षक हैं। (अयं हुतः संस्थितो यज्ञः) यह व्यष्टियज्ञ हुत होकर योनि सम्बन्धमें नियत हुआ (एति यत्र) जाता है जहां (हुतानां पूर्वमयनम्) व्यष्टि यज्ञमें प्राप्त हुये जीवोंका प्रथम स्थान जो ओषधिगर्भ या मातापिताका बीज भाव है ॥१५॥

शिक्षा—जीवोंके व्यष्टि यज्ञमें पार्थिव अग्नि, वर्षाका स्वामी द्यु स्थानी बृहस्पति, मध्यस्थानी इन्द्र क्रमशः होता अध्वर्यु और ब्रह्माका कार्य करते हैं, उक्त यज्ञ जीवात्माओंके सबसे प्रथम स्थान गर्भरूपमें प्राप्त होता है यानि गर्भ समयसे व्यष्टियज्ञ अथवा शरीरयज्ञका प्रारम्भ हो जाता है॥ १५ ॥

अपूपवान् क्षीरवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥१६॥

(क्षीरवानपूपवांश्चरुरिहासीदतु) अत्र प्राजापत्ये शरीरात्मके व्यष्टियज्ञे क्षीरवान् पयस्वान् रेतस्वान् शुक्रवान्। "रेतः पयः" श० । १२ । ४ । १ । ७) "पयसो वै प्रजाः सम्भवन्ति" (श० २ । ५ । १ । १५) अथवा क्षीरं पय इव रेतो विद्यते यस्मिन् स रेतस्वान् शुक्रवान्–अपूपवान् मधुमक्षिकागृहमिव सछिद्रं जालं विद्यते यस्मिन् स सछिद्रजालवान् "असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशोऽन्तरिक्षमपूपो मरीचयः पुत्राः तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः…" (छान्दो० ६ । १ । १) अत्रोपनिषद्वचने मधुमक्षिकाणां सछिद्रगृहस्यापूप इति नाम स्पष्टी भवति। यश्च लोके खाद्योऽपूपः स खल्वपूप इवापूप उपमयैवास्ति। अद्यश्वीनोऽपि लोके "गुलाबजामन" इति फलं पर्वतेषु तदिव घृतपक्वं यन्मिष्टान्नमुच्यते "गुलाबजामन" इति नाम्ना। चरुर्भाग इहास्मिन् शरीर आसीदतु–आसीदति स्थिरो भवति। अर्थात्—शुक्रवानपूपवांश्चरुः=शुक्रधारककोशो वा शुक्रवान् शरीरकोशो वा शुक्रकोशः "शुक्र Cell" मधुमक्षिकागृहमपूपः, स च कोशशब्देन वेदेऽपि व्यवहृतः "…मधुकोशो अक्षरत्" (ऋ० १ । ११२ । ११) शरीरे स्थिरो भवतीत्यायुर्वेदविज्ञानम्। (ये देवानां हुतभागा लोककृतः पथिकृत इह स्थ यजामहे) ये देवानां दिव्यगुणवतां पदार्थानां हुतभागा गृहीतभागा लोककृतः शरीरसम्पादकाः पथिकृतः सर्वप्राणिजीवनयात्रायाः संस्थापका प्राणापानव्यानरूपा आहवनीयगार्हपत्यदक्षिणाग्नयो यूयमिह शरीरे स्थातो यजामहे यजध्वम् 'पुरुषव्यत्ययः' ॥ १६ ॥

भाषार्थ—(क्षीरवान्) शुक्रवाला या शुक्रमय (अपूपवान् मधुमक्षिका

गृहतुल्य सछिद्र जालवाला (चरुः) टुकड़ा (आसीदतु) शरीर यज्ञमें स्थिर होता है। अर्थात् शुक्रकोश "शुक्र Cell" शरीरमें स्थिर रहता है (ये देवानां हुतभागाः) जा दिव्यगुण वाले पदार्थों के अंश ग्रहण किये हुये (लोककृतः पथिकृतः) शरीर सम्पादक सारेप्राणियों की जीवनयात्राके संस्थापक प्राण अपान व्यान रूप आहवनीय गार्हपत्य दक्षिणाग्नि (इह स्थ यजामहे) इस शरीर यज्ञमें तुम स्थित हो अत एव उक्त शुक्रकोशका यजन करते हो उसको परिणामपर पहुँचाते हो ॥ १६॥

शिक्षा—शरीरयज्ञमें आहवनीय आदि तीन अग्नियोंके रूपमें प्राण, अपान, और व्यान वर्तमान होकर शरीरयज्ञके साधक प्राणियोंकी जीवनयात्राके संस्थापक हैं और उक्त यज्ञमें शुक्रमय कोशकी पहिली आहुतिका परिणाम करते हैं॥ १६॥

अपूपवान् दधिवांश्चरुरेह....... ....॥ १७ ॥

अपूपवान् द्रप्सवांश्चरुरेह.........................॥ १८ ॥

अपूपवान् घृतवांश्चरुरेह.........................॥ १९ ॥

अपूपवान् मांसवांश्चरुरेह.........................॥ २० ॥

अपूपवानन्नवांश्चरुरेह सी.........................॥ २१ ॥

अपूपवान् मधुमांश्चरुरेह.........................॥ २२ ॥

अपूपवान् रसवांश्चरुरेह.........................॥ २३ ॥

अपूपवानपवांश्चरुरेह सी.........................॥ २४ ॥

(१) क्षीरवानपूपवांश्चरुः=रेतस्वान् सछिद्रजालवान् भागः=रेतोधारकशरीरकोशः (रेतः Cell ❀) ॥ १६ ॥

(२) दधिवानपूपवांश्चरुः=धारणात्मकशरीरधातुः श्लेष्मा तद्वान् श्लेष्मवान सछिद्रजालवान् भागः=श्लेष्मधारकशरीरकोशः (श्लेष्म Cell) ॥ १७ ॥

(३) रसवानपूपवांश्चरुः=रसवान् लसिकावान् सछिद्रजालवान् भागः=रसधारकशरीरकोशः (रस Cell) ॥ २३ ॥

(४) द्रप्सवानपूपवांश्चरुः=शोणितविन्दुमान् सछिद्रजालवान् भागः=शोणितविन्दुधारकशरीरकोशः (शोणित Cell) ॥ १८ ॥

(५) मांसवानपूपवांश्चरुः=मांसवान् सछिद्रजालवान् भागः=मांसधारकशरीरकोशः (मांस Cell) ॥ २० ॥

❀ कठिन, मृदु, विलीन तन्तुओंसे पूर्ण शुक्रादि अंश यहां कोश हैं स्यात् Cellसे कहे जा सकें

(६) मधुमानपूपवांश्चरुः = मेदस्वान् सछिद्रजालवान् भागः = मेदोधारक-शरीरकोशः (मेदः Cell) ॥ २२ ॥

(७) अपवानपूपवांश्चरुः = प्राणवान् स्नाववान् सछिद्रजालवान् भागः = प्राणधारकस्नावमयशरीरकोशः (स्नाव Cell) ॥ २४ ॥

(८) अन्नवानपूपवांश्चरुः = अस्थिमान् सछिद्रजालवान् भागः = अस्थिधारकशरीरकोशः (अस्थि Cell) ॥ २१ ॥

(९) घृतवानपूपवांश्चरुः = मज्जवान् सछिद्रजालवान् भागः = मज्जधारक-शरीरकोशः (मज्ज Cell) ॥ १९ ॥

अत्र समन्वयः

"रेतसः[1] श्लेष्मा संभवति, श्लेश्मणो[2] रसः, रसाच्छोणितम्[3], शोणितान्मांसम्[4], मांसान्मेदः[5], मेदसः[6] स्नावा, स्नाव्नोऽस्थीनि[7], अस्थिभ्यो[8] मज्जा[9]" (निरु० १४ । ६) एते नव-पदार्थाः शरीरे सदा कोशेषु वर्तन्ते । तथा "शरीरमिति कस्मात् । अग्नयो ह्यत्र श्रियन्ते ......मुखे आहवनीय उदरे गार्हपत्यो हृदि दक्षिणाग्निः" (गर्भोपनिषत् । ५) ॥१६-२४॥

भाषार्थ—

१—(क्षीरवानपूपवांश्चरुः) रेतोधरक शरीरकोश यानि शुक्र Cell ॥ १६ ॥
२—(दधिवानपूपवांश्चरुः) श्लेष्मधारक शरीरकोश यानि श्लेष्म Cell ॥ १७ ॥
३—(रसवानपूपवांश्चरुः) रसधारक शरीरकोश यानि लसिका Cell ॥ २३ ॥
४—(द्रप्सवानपूपवांश्चरुः) शोणितविन्दुधारक शरीरकोश यानि रक्त Cell ॥ १८ ॥
५—(मांसवानपूपवांश्चरुः) मांसधारक शरीरकोश यानि मांस Cell ॥ २० ॥
६—(मधुमानपूपवांश्चरुः) मेदोधारक शरीरकोश यानि मेदः Cell ॥ २२ ॥
७—(अपवानपूपवांश्चरुः) प्राणस्नायुधारक शरीरकोश यानि स्नायु Cell ॥२४॥
८—(अन्नवानपूपवांश्चरुः) अस्थिधारक शरीरकोश यानि अस्थि Cell ॥२१॥
९—(घृतवानपूपवांश्चरुः) मज्जधारक शरीरकोश यानि मज्ज Cell ॥१९॥

शिक्षा—शुक्र, श्लेष्मा, लसिका, रक्त, मांस, मेदः, स्नायु, अस्थि और मज्जा के कोशों (Cells) को शरीरके अन्दर वर्तमान प्राण, अपान और व्यानरूप अग्नियां शरीरयज्ञ में हवन कर रही हैं अर्थात् शुक्रादि धातुओंका परिणाम शरीर के अन्दर गर्भसे लेकर मृत्यु पर्यन्त प्राणाग्नियां करती रहती हैं अतः प्राणोंकी विद्या का सम्यक् परिचय करके जीवन लाभ लेना चाहिये ॥ १६—२४ ॥

अपूपापिहितान् कुम्भान् यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥ २५ ॥

(देवास्ते यानपूपापिहितान् कुम्भानधारयन्) देवा अग्न्यादयस्ते तुभ्यं यान् पूर्वोक्तान् अपूपापिहितान् कुम्भान् जालान्तर्गतान् शुक्रादिमयान् कोशानधारयन् धारयन्ति (ते ते स्वधावन्तो मधुमन्तो घृतश्च्युतः सन्तु) ते ते तुभ्यं स्वधावन्तोऽन्नवन्तो मधुमन्तो रसवन्तो घृतवन्तः स्नेहवन्तो वृक्षेषु फलरूपेण संसारे सन्तु सन्तीत्यर्थः "रसो वै मधु" (शत० ६ । ४ ।।३ । २) अन्नरसस्नेहपरिणामास्ते कोशाः सन्तीति विज्ञानं प्रकल्प्यते ॥ १५ ॥

भाषार्थ—(देवास्ते यानपूपापिहितान्) अग्नि आदि देव तेरे लिये पूर्वोक्त जिन जालान्तर्गत (कुम्भानधारयन्) शुक्रादि कोशों को धारण करते हैं । ते ते) वे तेरे लिये (स्वधावन्तः) अन्न वाले (मधुमन्तः) रस वाले (घृतवन्तः) स्नेह वाले वृक्षों में फलरूपके समान (सन्तु) संसारमें हों ॥ २५ ॥

शिक्षा—शरीरके अन्दर शुक्रादि कोश, अन्न, रस और स्नेहके आहारसे बनते हैं स्वास्थ्यजनक उक्त वस्तुओंके सेवन करनेसे शरीरान्तर्गत शुक्रादि वस्तुओंका स्वास्थ्यजनक परिणाम हो सकता है ॥ २५ ॥

यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तूद्भ्वीः प्रभ्वीस्तास्ते यमो राजानुमन्यताम् ॥ २६ ॥

(यास्ते तिलमिश्राः स्वधावतीर्धाना अनुकिरामि) हे जीव ! तुभ्यं यास्तिलमिश्रास्तिलमिव मांसग्रन्थिस्तिलस्तेन मिश्राः सहिताः स्वधावतीः स्वधारणाशक्तिमतीर्धाना धारणशीला धमनीरनुकिरामि जाले क्षिपामि तनोमीत्यर्थः । 'ललाटेऽङ्गुष्ठमात्रं चिह्नं तिलं तिलकं वाऽभिधीयते, नेत्रे कृष्णं मध्यचिह्नं नेत्रतिलमुच्यते तदेतादृशमुपमयैव भवति तथैवात्रापि विज्ञेयम् (तास्ते उद्भ्वीः प्रभ्वीः सन्तु) ता धाना धमन्यस्ते तुभ्यमुद्भ्वीरुद्भाविका उत्तानिकाः प्रभ्वीः प्रतानिकाश्च सन्ति (तास्ते यमो राजानुमन्यताम्) तास्ते धमनीर्यमो राजा जीवनकालोऽनुमन्यतामनुकूलं नयतु ॥ २६ ॥

भाषार्थ—(यास्ते तिलमिश्राः) हे जीव ! जो तेरे लिये तिलके समान मांस ग्रन्थियोंसे युक्त (स्वधावतीर्धानाः) स्वधारणशक्तिवाली धमनियोंको (अनुकिरामि) शरीरजालमें फैलाता हूँ । (तास्ते उद्भ्वीः प्रभ्वीः सन्तु) उक्त धमनियां तेरे लिये तानें-बानेंके रूपमें विद्यमान हैं (तास्ते यमो राजा) उनको तेरा जीवनकाल (अनुमन्यताम्) अनुकूलरूपसे जीवनके लियें फैला दे या स्थिर रक्खे ॥ २६ ॥

शिक्षा—शरीरके अन्दर मांसग्रन्थियोंके साथ शिरायें तानें बानेंके रूपमें फैली हुई हैं। जो वातादि वाहक होनेसे जीवनकालको स्थिर रखने वाली हैं ॥ २६ ॥

अक्षितिं भूयसीम् ॥ २७ ॥

(भूयसीमक्षितिम्) भूयसीमत्यधिकामक्षितिं जीवनीम्, यमो राजाऽनुमन्यतामिति वर्तते ॥ २७ ॥

भाषार्थ—(भूयसीम्) अत्यधिक (अक्षितिम्) जीवनीको जीवनकाल अनुकूलरूपमें स्थिर रखे ॥ २७ ॥

शिक्षा—पूर्वोक्त वातादिवाहक शिराओंके नियमित और उचित सञ्चलन व्यवहारसे जिन्दगी उन्नत होती है ॥ २७ ॥

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ २८ ॥

(द्रप्सः पृथिवीं द्याञ्चानु–इमञ्च योनिमनु चस्कन्द) द्रप्सो दृप्यतिमु ह्यतीति द्रप्सः संसारे मुह्यमानो जीवः "अनीशया शोचति मुह्यमानः" (मुण्डके ३।१।२) मोहनार्थादृप धातोः सः प्रत्ययः । द्यावापृथिवीभ्यां सह तयोरुत्पत्तिसमकालमेव । इमं योनिं मनुष्यादिं योनिमनु शरीरंप्रति चस्कन्द स्कन्दति गच्छति (यश्च पूर्वः) यश्च स पूर्वः पुरातनः शाश्वतिकः (समानं योनिमनुसञ्चरन्तं द्रप्सं सप्तहोत्रा अनु जुहोमि) समानं कर्मप्रमाणं कर्मानुसारं यथोचितं योनिं शरीरं प्रति सञ्चरन्तं सम्यग् गन्तारं द्रप्सं जीवं सप्त होत्रा अनु सप्तसंख्याका होत्रा यज्ञान् आदानधर्मान् सुषुम्नाकेन्द्ररूपान् प्राणयज्ञान् "होत्रो यज्ञनाम" (नि० ३। १७) जुहोमि प्रयच्छामि संस्थापयामि ॥२८॥

भाषार्थ—(द्रप्सः) संसारमें मुह्यमान जीव (पृथिवीं द्याञ्चानु) द्यावापृथिवीके साथ अर्थात् उनकी उत्पत्तिके समकाल ही (इमञ्च योनिमनु) और इस मनुष्य आदियोनि को (चस्कन्द) प्राप्त होता है (यश्च पूर्वः) जो कि शाश्वतिक अर्थात् नित्य है (समानं योनिमनु) कर्मानुसार यथोचित योनिके प्रति (संचरन्तं द्रप्सम्) सृष्टिक्रमसे जाते हुए जीवको (सप्त होत्रा अनु) सात संख्या वाले यज्ञों अर्थात् सुषुम्ना नाड़ीके सप्त प्राणचक्ररूपी यज्ञोंके साथ (जुहोमि) संस्थापित करता हूँ ॥ २८ ॥

शिक्षा—द्यावापृथिवीकी उत्पत्तिके साथ ही जीवोंकी उत्पत्ति भी होती है। वह नित्यस्वरूप वाला जीव अपने कर्मानुसार मनुष्यादि योनियोंको प्राप्त होता है। शरीरमें प्राप्त हुए जीवका विशेष आश्रय सुषुम्ना नाड़ीगत सप्त प्राणचक्र हैं ॥ २८ ॥

शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते रयिम् ।
ये पृणन्ति प्र च यच्छन्ति सर्वदा ते दुहते दक्षिणां सप्तमातरम् ॥२९

(नृचक्षसः शतधारं वायुं स्वर्विदमर्कं रयिमभिचक्षते) नृचक्षसो देवा इन्द्रियाणि "देवा वै नृचक्षसः" (शत० ८।४।२।५) शतधारमसंख्यधारायुतमसंख्यनाड़ीप्रवाहयुक्तं वायुं वातं स्वर्विदं तजोविदं सुखहेतुकमर्कमग्नितत्वमुष्माणं पित्तमितियावत् "अग्निर्वा अर्कः" (१०।४।१।२३) रयिमुदकं पुष्टिदं श्लेष्मतत्वम् "अग्निना रयिमश्नवत्पोषमेव दिवे दिवे" इत्युक्तं च । अभिचक्षतेऽभिपश्यन्ति-अनुभवन्ति-अभिगच्छन्ति । शरीरे वातपित्तकफरूपेण वाय्वग्निजलानि वर्तन्ते । उक्तं च सुश्रुतचरकयोः—

विसर्गादानविक्षेपैः सोमसूर्यानिला यथा । धारयन्ति जगद्देहं कफपित्तानिलास्तथा ॥

अत्र जिज्ञास्यं किं पित्तव्यतिरेकादन्योऽग्निरिति ? आहोस्वित्पित्तमेवाग्निरिति ? अत्रोच्यते न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते, आग्नेयत्वात् ॥

"……श्लेष्मा मधुरशीतलः । स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य च उदककर्मणा अनुग्रहं करोति ।" सुश्रुते (सूत्र० अ० २१।८।६।१४)

"वायुस्तन्त्रयन्त्रधरः प्राणोदानसमानव्यानापानात्मा प्रवर्तकश्चेष्टानामुच्चावचानाम् ०।

अग्निरेव शरीरे पित्तान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति तद्यथा पक्तिमपक्तिं दर्शनमदर्शनं मात्रामात्रत्वमुष्मणः० ॥

सोम एव शरीरे श्लेष्मान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति तद्यथा दार्ढ्यं शैथिल्यमुपचयं कार्श्यम्० ।" (चरके । सू० १२।८, ११, १२)

(ये च सर्वदा पृणन्ति प्रयच्छन्ति) ये च वातादय आन्तरिकपदार्थाः सर्वदा शरीरं पृणन्ति प्रकृतिभूताः सन्तः पालयन्ति, प्रयच्छन्ति विकृताश्च प्रशाम्यन्ति, उक्तं यथा "विकृताऽविकृता देहं घ्नन्ति ते वर्तयन्ति च" (अष्टांगहृदये० सू० १।८) (ते सप्तमातरं दक्षिणां दुहते) त एव वातादयः सप्तमातरं सप्तमातारो निर्मातारो यस्यास्तां दक्षिणां भोगरूपां दुहते प्रपूरयन्ति सम्पादयन्ति शुक्रादिभिः सप्तधातुभिः सम्पन्नो भोगोऽत्र दक्षिणा ॥ २६ ॥

भाषार्थ—(नृचक्षसः) प्राणियों को स्व स्व व्यापार में प्रवृत्त करने वाली इन्द्रियाँ (शतधारं वायुम) असंख्य नाड़ी प्रवाहोंसे युक्त शरीरान्तर्गत आयुर्वैदिक वात तत्वको (स्वर्विदमर्कम्) तेजनिमित्तक पित्त तत्त्वको (रयिम्) पुष्टिकारक कफ धातुको (अभिचक्षते) प्राप्त होती हैं (ये च सर्वदा) जो वात, पित्त,कफ सदा (पृणन्ति)

शरीर का पालन करते हैं (प्रयच्छन्ति) विकृत होकर शरीरका शमन करते हैं (ते सप्तमातरम्) वे वात, पित्त, कफ शुक्रादि सात धातुओं से निर्मित (दक्षिणां दुह्रते) भोगार्थ प्राप्त होने वाली कायारूप दक्षिणाको सम्पादन करते हैं ॥ २६ ॥

शिक्षा—शुक्रादि सात धातुओंसे युक्त तथा इन्द्रियोंके आयतन भोगरूप शरीरको वात, पित्त, कफ मूलतत्व जीवनधारण और पोषणकी शक्ति प्रदान करते करते हैं ॥ २६॥

कोशं दुहन्ति कलशं चतुर्बिलमिडां धेनुं मधुमतीं स्वस्तये ।
ऊर्जं मदन्तीमदितिं जनेष्वग्ने मा हिंसीः परमे व्योमन् ॥ ३० ॥

(अग्ने जनेष्विडां धेनुं मधुमतीमूर्जं मदन्तीमदितिं मा हिंसीः) अग्ने हे वैश्वानराग्ने ! त्वं जनेषु जायमानेषु प्राणिषु वर्तमानामिडामिडानाम्नीं धेनुं धेनुरूपां नाडीं मधुमतीं धेनुं पिङ्गलां नाडीमूर्जं मदन्तीं धेनुमूर्जं विराजं चेतनां मदन्तीं हर्षयन्तीम् "उर्ग्विराट्" (तै० १ । २ । २ । २) "वैराजो वै पुरुषः" (तां० २ । ७ । ८ । १६) अदितिं धेनुमखण्डनीयां सुषुम्नानाडीम् । "छिद्यते ध्यानयोगेन सुषुम्नैका न छिद्यते" (छुरिकोपनिषदि १८) "या प्राणेन सम्भवति-अदितिर्देवतामयी गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायते" (कठो० ४ । ७) प्राणेन सह सङ्गच्छतेऽदितिः सुषुम्नानाडी तत्र च सप्तचक्राणि प्राणकेन्द्राणि प्राणमर्माणि मुण्डके यथा "सप्त इमे लोका येषु चरन्ति प्राणाः" (मुण्ड० २ । १ । ८) मा हिंसीर्न विनाशय । यतो हीमा नाड्यः (परमे व्योमन् स्वस्तये कोशं चतुर्बिलं कलशं दुहन्ति) परमे पूर्णे शतवर्षके व्योमन् संवत्सरे काले "व्योमा हि संवत्सरः" (शत० ८ । ४ । १ । ११) स्वस्तये सु-अस्तित्वे समीचीनस्थिरत्वे कोशं प्रत्येकं फुप्फुसयकृत्प्लीहादिकं चतुर्बिलं चतुश्छिद्र कलशं कलनस्वभावं रक्तप्रवेशनिकासशब्दवन्तं जीवनसमयसंख्यानप्रवृत्तिकं हृदयरूपं कलशं दुहन्ति चेतनया प्रपूरयन्ति । 'कल शब्दसंख्यानयोः' ॥ ३० ॥

भाषार्थ—(अग्ने) शरीरके अन्दर वर्तमान हे वैश्वानर अग्ने ! तू (जनेषु) उत्पन्न हुए सभी प्राणियोंके अन्दर वर्तमान (ईडां धेनुम्) ईडा नाम वाली धमनी को या नाड़ी को (मधुमतीम्) पिङ्गला नाड़ी को (ऊर्जं मदन्तीमदितिम्) जीवरूप चेतना को हर्षाती हुई अखण्डनीय सुषुम्ना नाड़ीको (मा हिंसीः) मत हिंसित कर । क्योंकि ये सभी नाड़ियां (परमे व्योमन्) पूर्णकाल अर्थात् सौ वर्षकी आयु तक (स्वस्तये) स्थिरताके लिये (कोशम्) प्रत्येक फुप्फुसयकृत् प्लीहा आदि को (चतुर्बिलं कलशम्) और चारछिद्र वाले रक्तप्रवेश-निकासके कलकल शब्दयुक्त जीवन-

समयकी संख्या करने वाले हृदय को (दुहन्ति) चेतनासे प्रपूरण करती हैं ॥ ३० ॥

शिक्षा—प्राणियोंके अन्दर ईडा, पिङ्गला और सुषुम्ना नाड़ियां प्रधान रूपसे विद्यमान हैं जो प्राणियोंकी पूर्ण आयुपर्यन्त जीवनीके लिये यकृत् प्लीहा आदि पिण्ड और हृदयको जीवनरससे पूर्ण करती हैं ॥ ३० ॥

एतत् ते देवः सविता वासो ददाति भर्तवे ।
तत् त्वं यमस्य राज्ये वसानस्ताप्यँ चर ॥ ३१ ॥

(सविता देव एतद् वासो भर्तवे ते ददाति) सविता उत्पादको देव एतद् वासः शरीरं भर्तवे भर्तुम् 'तुमर्थे तवेन् प्रत्ययः' ते तुभ्यं ददाति "त्वग्वि वासः" (शत ४। ३।४।२६) (त्वं यमस्य राज्ये वसानस्तत्ताप्र्यं चर) हे जीव त्वं यमस्य यमनशीलस्य कालस्य राज्ये वसानो धारयन् तच्छरीरं ताप्र्यं तर्पणीयं सुखमयं चर सम्पादय ॥ ३१ ॥

भाषार्थ—(सविता देवः) उत्पादकदेव (एतद् वासः) इस शरीरको (भर्तवे ते) तेरे लिये धारण करनेको (ददाति) देता है (त्वं यमस्य राज्ये) हे जीव ! तू यमनशील समयके अधीन (वसानः) धारण करता हुआ (तत् ताप्र्यम्) उस शरीर को सुखनिमित्त (चर) सम्पादन कर ॥ ३१ ॥

शिक्षा—ईश्वरने संसारके अन्दर प्रेयः और श्रेयः सुखोंके सम्पादन करनेके लिये जीवात्मा को शरीर प्रदान किया है अतः यावत् जीवनकाल है उसके अन्दर उक्त शरीरको सुखसम्पादन का हेतु बनाना चाहिये ॥३१॥

धाना धेनुरभवद्व वत्सो अस्यास्तिलो भवत् ।
तां वै यमस्य राज्ये अक्षितामुपजीवति ॥ ३२ ॥

(धाना धेनुरभवत् तिलोऽस्या वत्सोऽभवत्) धानाऽस्मिन् शरीरे धारणशीला नाडी धेनुरभवद् । तिलो मांसादिग्रन्थिरस्या अस्या धेन्वा वत्सोऽभवत् (यमस्य राज्ये तां वै अक्षितामुपजीवति) यमस्य राज्ये कालस्य राज्ये तां नाडीरूपां धेनुमेष ग्रन्थिरूपो वत्स उपजीवत्याश्रयति ॥३२॥

भाषार्थ—(धाना धेनुरभवत्) इस शरीरमें धारणशील बन्धनरूप नाड़ी धेनु के समान है (तिलोस्या वत्सोऽभवत्) मांसादि ग्रन्थि उस धेनुका वत्सके तुल्य है (यमस्य राज्ये) कालके अधीन (तां वै अक्षिताम्) उस नाड़ी रूप धेनुका (उपजीवति) उक्त मांसादि ग्रन्थि आश्रय लेती है ॥३२॥

शिक्षा—शरीरके अन्दर रक्तवाहक नाड़ियां विद्यमान हैं और उनके साथ

क्वचित् २ मांस ग्रन्थियां या नाड़ीग्रन्थियां भी हैं । जो उक्त नाड़ियोंमें से रिसते हुए रक्तको अपने अन्दर ग्रहण करती हैं ॥ ३२ ।

एतास्ते असौ धेनवः कामदुघा भवन्तु । एनीः श्येनीः
सरूपा विरूपास्तिलवत्सा उप तिष्ठन्तु त्वात्र ॥ ३३ ॥

(असौ त एता धेनवः कामदुघा भवन्तु) असौ हे जीव ! एता धेनवो धेनुरूपाः शिराः कामदुघा आनुकूल्यसम्पादका भवन्तु (अत्रैनीः श्येनीः सरूपा विरूपास्तिलवत्सास्त्वोपतिष्ठन्तु) अत्र शरीरे एनीररुणा वातवहाः शिराः, श्येनीर्गौर्यः श्वेताः कफवहाः शिराः, विरूपा नीलाः पित्तवहाः शिराः, सरूपा रोहिण्यो रक्तवहाः शिराः । शिराणां चातुर्विध्यं सुश्रुते वर्णितम्—

तत्रारुणा वातवहाः पूर्यन्ते वायुना शिराः ।
पित्तादुष्णाश्च नीलाश्च शीता गौर्यः स्थिराः कफात् ॥
असृग्वहास्तु रोहिण्यः शिरा नात्युष्णशीतलाः ॥ (सुश्रुते ७ । २०)

तिलवत्साः कोशवत्सास्त्वोपतिष्ठन्तु त्वामाश्रयन्तु त्वदधीना भवन्त्वित्यर्थः ॥ ३३ ॥

भाषार्थ—(असौ ते) हे जीव ! तेरे लिये (एता धेनवः) ये धेनुरूप शिरायें (कामदुघा भवन्तु) अनुकूलता की सम्पादक हों (अत्र) इस शरीरमें (एनीः) अरुण रङ्गकी वातवाहक शिरायें (श्येनीः) श्वेत रङ्गकी कफवाहक शिरायें (विरूपाः) नीले रङ्गकी पित्तवाहक शिरायें (सरूपाः) रक्तरङ्गकी रक्तवाहक शिरायें (तिलवत्साः) मांसग्रन्थियोंको वत्सतुल्य साथ रखती हुई (त्वोपतिष्ठन्तु) तेरे शरीरका आश्रय हैं ॥ ३३ ॥

शिक्षा—शरीरके अन्दर चार प्रकारकी शिरायें स्व स्व ग्रन्थियोंके साथ फैली हुई हैं । जो कि वातवाहक, कफवाहक, पित्तवाहक और रक्तवाहक हैं ॥ ३३ ॥

एनीर्धाना हरिणीः श्येनीरस्य कृष्णा धाना रोहिणीर्धेनवस्ते ।
तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः ॥३४॥

(अस्यैनीर्धाना हरिणीः श्येनीः कृष्णा रोहिणीर्धाना धेनवस्तिलवत्सास्तेऽस्मै विश्वहोर्जं दुहाना अनपस्फुरन्तीः सन्तु) अस्य जीवस्य ताः पूर्वोक्ता धानाः शिरा एन्यः श्येन्यः कृष्णा रोहिण्योऽपि तिलवत्सा ग्रन्थिवत्सा अस्मै जीवाय हरिण्यो भरिण्यः पोषिका धाना धारणधर्माः शिरा विश्वाहा सर्वदोर्जं देहरसं रक्तादिं दुहानाः प्रपूरयन्त्योऽनपस्फुरन्तीरुचितं स्फुरमाणाः सञ्चलन्त्यः सन्तु ॥ ३४ ॥

भाषार्थ—(अस्य) इस जीवकी (एनीः धाना हरिणीः श्येनीः कृष्णा रोहिणीर्धाना धेनवरितलवत्साः) पूर्वोक्त अरुण रङ्ग वाली वातवाहक, श्वेतरङ्गकी कफवाहक, नीले रङ्गकी पित्तवाहक, रक्तरङ्गकी रक्तवाहक शिरायें ग्रन्थियोंके साथ (अस्मै ते) इस तुझ जीवके लिये (विश्वाहा) सदा (ऊर्जं दुहानाः) जीवनके लिये आवश्यक रस आदिको सम्पादन करती हुईं (अनपस्फुरन्तीः सन्तु) उचितरूप से स्फुरती हुई अपने २ कार्यके लिये गति करती हुई विद्यमान रहें ॥ ३४ ॥

शिक्षा—पूर्वोक्त रक्तवातादिवाहक शिरायें स्व स्व ग्रन्थियोंके साथ उचित रूपसे स्पन्दन करती रहती हैं ॥ ३४ ॥

वैश्वानरे हविरिदं जुहोमि साहस्रं शतधारमुत्सम् ।
स बिभर्ति पितरं पितामहान् प्रपितामहान् बिभर्ति पिन्वमानः ॥३५॥

(वैश्वानरे-इदं साहस्रं शतधारमुत्सं हविर्जुहोमि) वैश्वानरेऽग्नौ शरीरान्तर्वर्तिन्यग्नौ "अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्य घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैतं घोषं शृणोति" (श० १४।८।१०।१) साहस्रं सहस्रप्रकारं शतधारमसंख्यनाडीशाखमुत्सं कोशाख्यं हविर्जुहोमि स्थापयामि (स पिन्वयानो बिभर्ति) यतः स वैश्वानरः पिन्वमान एवं सेवमानो बिभर्ति त्वां हे जीव ! धारयति पोषयति (पितरं पितामहान् प्रपितामहान् बिभर्ति) तव पितरं पितामहान् प्रपितामहांश्च बिभर्ति धारयति पोषयति ॥ ३५ ॥

भाषार्थ—(वैश्वानरे) शरीरके अन्तर्वर्ती अग्निमें (इदं साहस्रं शतधार मुत्सं हविः) सहस्र प्रकारसे असंख्य नाड़ी शाखाओंसे युक्त कोशरूप हविको (जुहोमि) रखता हूँ (स पिन्वमानो बिभर्ति) जिससे कि वह सेवित हुई अग्नि तुझको धारण करती है (पितरं पितामहान् प्रपितामहान् बिभर्ति) न केवल तुझे ही अपितु वह वैश्वानर अग्नि तेरे पिता, पितामह, प्रपितामहको भी धारण करती रही है ॥ ३५ ॥

शिक्षा—शरीरके अन्दर वैश्वानर नामसे अग्नि विद्यमान है जो अपनी उष्मा सब कोशों आशयों और शिराओंको पहुँचाती हुई मनुष्य का धारण पोषण करती है ॥ ३५ ॥

सहस्रधारं शतधारमुत्समक्षितं व्यच्यमानं सलिलस्य पृष्ठे ।
ऊर्जं दुहानमनपस्फुरन्तमुपासते पितरः स्वधाभिः ॥ ३६ ॥

(सलिलस्य पृष्ठे सहस्रधारं शतधारमुत्सं व्यच्यमानमक्षितमूर्जं दुहान-

मनपस्फुरन्तं पितरः स्वधाभिरुपासते) सलिलस्योदकस्य मेघस्य पृष्ठे वर्तमानं सहस्रं शतधारमुत्सं जलमयं तनुबीजं पितरो जनकाः स्वधाभिः स्वधारणशक्तिभिरक्षितम-विनाशिनं व्यच्यमानं व्यक्तिभावमाप्नुवन्तमूर्जं दुहानं खाद्यरसं गृह्णन्तमनपस्फुरन्तं स्वशक्त्या गतिमन्तमुपासते सेवन्ते ॥ ३६ ॥

भाषार्थ—(सलिलस्य पृष्ठे) मेघमण्डलमें (सहस्रधारं शतधारमुत्सम्) असंख्यजलबिन्दुमयसमूहको, जो गर्भबीज (व्यच्यमानम्) पुरुषादि शरीरके व्यक्तिभावको प्राप्त होनेवाले (अक्षितम्) अविनाशी जीवशक्तिको (ऊर्जं दुहानम्) शरीरधारणार्थ रस ग्रहण करते हुए को (अनपस्फुरन्तम्) कुटिलगतिरहितको (पितरः) अपने जनक (स्वधाभिः) स्वधारण शक्तियोंसे (उपासते) सेवन करते हैं या ग्रहण करते हैं ॥ ३६ ॥

शिक्षा—मेघमण्डलमें सब जीवोंका गर्भबीज है उसको माता-पिता लोग अपने अन्दर निज शक्तियोंसे धारण करते हैं जोकि पुरुषादि व्यक्तिशरीरमें प्रगट होता है ॥ ३६ ॥

यहां पर व्यष्टियज्ञका प्रकरण समाप्त होता है और जन्मसे लेकर मृत्यु-पर्यन्त जीवनचर्याका प्रकरण प्रारम्भ होता है—

इदं कसाम्बु चयनेन चितं तत् सजाता अवपश्यतेत ।
मर्त्योयममृतत्वमेति तस्मै गृहान् कृणुत यावत्सबन्धु ॥ ३७ ॥

(इदं कसाम्बु चयनेन चितं तत्सजाता अवपश्यतेत) इदं कसाम्बु गतिमज्जलमिव पुरुषबीजमात्मतत्त्वं चयनेन स्वकर्मचयनेन निजकर्मानुसारं प्राप्तं तद् यूयं सजाता बन्धवोऽवपश्यत, अत एव-इत-आगच्छत । (अयं मर्त्योऽमृतत्वमेति तस्मै यावत्सबन्धु गृहान् कृणुत) अयं मर्त्यो मनुष्योऽमृतत्वं ध्येयरूपेणामृतत्वं मोक्षपदमेति तस्मात् तस्मै जीवाय यूयं यावत्सबन्धु सर्वेऽपि बन्धवो गृहान् तद्योग्यानि स्थानानि कृणुत कुरुत ॥ ३७ ॥

भाषार्थ—(इदं कसाम्बु) यह गतिशील जलके समान पुरुषबीज (चयनेन चितम्) निजकर्मों से युक्तहुआ हुआ है (तत्सजाताः) तुम बन्धुजन (अवपश्यत) इसको देखो (एत) इसके समीप आओ या प्राप्त होओ (अयं मर्त्यः) यह सन्तान (अमृतत्वमेति) ध्येयरूप मोक्षपदको प्राप्त करता है । इसलिये (तस्मै यावत्सम्बन्धु) उसके लिए तुम सब बन्धुजन (गृहान् कृणुत) योग्य स्थानोंको बनाओ ॥ ३७ ॥

शिक्षा—मनुष्य कर्मानुसार जन्मता है, जन्मे हुए बालकके लिये उसके योग्य स्थानों का प्रबन्ध करना चाहिये संसारमें मनुष्यजन्म का लक्ष्य मोक्षप्राप्ति है इसलिये अपने और अपनी सन्तानके प्रति ऐसे साधन और कर्मोंका सञ्चय करना चाहिए जिससे ध्येयरूप मोक्ष प्राप्त हो सके॥ ३७॥

इहैवैधि धनसनिरिहचित्त इहक्रतुः ।
इहैधि वीर्यवत्तरो वयोधा अपराहतः ॥ ३८ ॥

(इहैव धनसनिरेधि) इहास्मिन्नेव शरीरे त्वं धनसनिरैश्वर्यसम्भागी भव (इहचित्त इहक्रतुः) इह शरीरे चित्तं चेतनत्वं यस्य सोऽयमिहचित्तः शरीरे चेतनशील एधि भव, इहक्रतुः, इह शरीरे क्रतुः कर्म यस्य स इहक्रतुः शरीरे कर्मशीलो भव "क्रतुः कर्मनाम" (नि० २ । १) (इहवीर्यवत्तरो वयोधा अपराहत एधि) हे जीव ! इह शरीरे त्वं वीर्यवत्तरोऽतिवीर्यवान् वयोधा आयुर्धारकोऽपराहतोऽनाघातः स्वस्थ एधि भव इत्याशीर्वादः ॥ ३८ ॥

भाषार्थ—(इहैव धनसनिरेधि) हे बालक ! तू इस शरीरमें ऐश्वर्यका भागी हो (इहचितः) इस शरीरमें तू सावधान बुद्धिमान् हो (इहक्रतुः) इसी शरीरमें तू पुण्यकर्मशील बन (इह वीर्यवत्तरः) इस शरीरमें तू अत्यन्त बलवान् (वयोधाः) आयुवाला (अपराहतः) स्वस्थ (एधि) रह ॥ ३८ ॥

शिक्षा—सन्तानके जन्म होने पर अर्थात् जातकर्म संस्कारके समय बन्धु बान्धव और इष्टमित्र बालकको आशीर्वाद दें कि हे बालक ! तू ऐश्वर्यभागी, बुद्धिमान्, कर्मशील, अतिबलवान्, आयुष्मान्, तथा स्वस्थ रह॥ ३८ ॥

पुत्रं पौत्रमभितर्पयन्तीरापो मधुमतीरिमाः ।
स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयांस्तर्पयन्तु ॥३९॥

(इमा मधुमतीरापः पुत्रं पौत्रमभितर्पयन्तीः) इमा मधुमतीराप ओषधिरसाः "ओषधयो मधुमतीः" (तै० ३ । २ । ८ । २) पुत्रं पौत्रमभितर्पयन्त्यः सत्यः (पितृभ्योऽमृतं स्वधां दुहाना आपो देवीरुभयांस्तर्पयन्तु) अथ च पितृभ्योऽपि स्वधामन्नमन्नशक्तिममृतं प्राणं च दुहानाः प्रपूरयन्त्यः सत्य आपो देवीर्दिव्य उभयान् सन्तानं पितॄंश्च तर्पयन्तु । "प्राणा वा अमृतम्" (श० १४ । ४ । ४ । ३) ॥ ३९ ॥

भाषार्थ—(इमा मधुमतीरापः) यह ओषधि जल (पुत्रं पौत्रमभितर्पयन्तीः) पुत्र पौत्रादि नवजात सन्तानको तृप्त करता है (पितृभ्योऽमृतं स्वधां दुहानाः) और

माता पिता आदिको अन्नशक्ति और प्राणशक्तिको देनेवाला (आपो देवीः) उक्तदिव्य गुणजल (उभयांस्तर्पयन्तु) सन्तान और सन्तानके माता पिता आदिको एवं दोनोंको तृप्त करता है ॥ ३९ ॥

शिक्षा—नवजात बालकको उसकी स्वस्थताके लिये ओषधिजल तथा प्रसूता माता को भी औषधसेवन कराना चाहिये ॥ ३९ ॥

आपो अग्निं प्रहिणुत पितॄँरुपेमं यज्ञं पितरो मे जुषन्ताम् ।
आसीनामूर्जमुप ये सचन्ते ते नो रयिं सर्ववीरं नियच्छान् ॥४०॥

(आपो अग्निं पितॄन् प्रहिणुत) आपः पूर्वोक्ता ओषधिरसा ओषधिसारा अग्निं जठराग्निं पितॄन् प्राणान् प्रति प्रहिणुत प्रेरयन्ति यतो हि ओषधिरसैः जठराग्निः प्रदीप्यते स च प्राणानाप्नोति अत एव (इमं यज्ञं मे पितरो जुषन्ताम्) इमं यज्ञं शरीरे पाकरूपं यज्ञं मे पितरः प्राणा जुषन्तां सेवन्ते (य आसीनामूर्जमुपसचन्ते ते नो रयिं सर्ववीरं नियच्छान्) ये प्राणा आसीनामुपस्थितामूर्जमन्नमात्रामुप सचन्ते परिणमन्ति पचन्ति ते प्राणा अस्मभ्यं रयिं पुष्टिभोगं सर्ववीरं नियच्छान् नियच्छन्तु स्थापयन्ति । लडर्थे लोट् ॥ ४० ॥

भाषार्थ—(आपः) पूर्वोक्त ओषधिरस (अग्निम्) जाठराग्निको (पितॄन्) प्राणोंको (प्रहिणुत) प्रेरित अर्थात् उत्तेजित करते हैं (इमं यज्ञम्) शरीरके अन्दर पाकरूपमें वर्तमान यज्ञ को (मे पितरः) मेरे प्राण (जुषन्ताम्) सेवन करें या सेवन करते हैं (य आसीनाम्) जो उपस्थित (ऊर्जम्) अन्नमात्रा को (उपसचन्ते) पकाते है (ते नः) वे हमारे लिये (रयिं सर्ववीरम्) सब प्रकारसे वीर्ययुक्त पुष्टियुक्त भोग को (नियच्छान्) नियत करते हैं ॥ ४० ॥

शिक्षा—आयुर्वैदिक रीतिसे ओषधियोंका सेवन करके शरीरस्थ जाठराग्नि और प्राणोंकी शक्तिको बढ़ाना चाहिये क्योंकि उक्त ओषधिमात्राके सेवनसे शरीरमें पुष्टि प्राप्त होती है ॥ ४० ॥

समिन्धते अमर्त्यं हव्यवाहं घृतप्रियम् ।
स वेद निहितान् निधीन् पितॄन् परावतो गतान् ॥४१॥

(घृतप्रियममर्त्यं हव्यवाहं समिन्धते) घृतप्रियं रसप्रियममर्त्यं यावज्जीवं तावत्सततं वर्तमानं हव्यवाहं ग्राह्यरसवोढारं जाठराग्निमयं जीवः समिन्धते विविधभोजनैर्दीपयति । यतः (स निहितान् निधीन् परावतो गतान् पितॄन् वेद) सोऽन्तरा-

ग्निर्निहितान् शरीरे स्थितान् निधीन् कोशान् अवयवान् परावतो गतान् सर्वत्र विस्तृ-तान् पितॄन् प्राणान् वेद प्राप्तवानस्ति ॥ ४१ ॥

भाषार्थ—(घृतप्रियम्) अन्न रसको चाहने वाले (अमर्त्यम्) यावज्जीवन वर्तमान (हव्यवाहम्) अन्नरसके वहन करने वाली जाठराग्निको (समिन्धते) यह जीव विविध भोजनद्वारा प्रदीप्त करता है (स निहितान् निधीन्) वह अन्तराग्नि शरीरके अन्दर वर्तमान कोशों को या अवयवोंको (परावतो गतान्) सर्वत्र फैले हुए (पितॄन) प्राणों को (वेद) प्राप्त है ॥ ४१ ॥

शिक्षा—जाठराग्नि जो कि अन्नरसकी क्षुधा उत्पन्न करती और यावज्जी-वन शरीरके अन्दर उक्त खाद्यरसका परिणाम शरीरके प्रत्येक कोश अवयव और प्राणतन्तुओंतकमें पहुँचाती है उसको विविध उचित भोजनोंसे प्रदीप्त करना चाहिये ॥ ४१ ॥

यं ते मन्थं यमोदनं यन्मांसं निपृणामि ते ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥४२॥

(यं ते मन्थं यमोदनं यत्ते मांसं निपृणामि) हे जीव ! ते तव शरीरे यं मन्थं मन्थनीयं रक्तमोदनमुन्दनीयं रेतः "रेतो वा ओदनः" (शत० १३ । १ । १ । ४) यद्वा मांसं निपृणामि यथास्थानं यथावश्यकं नियोजयामि । अतः (ते ते स्वधावन्तो मधुमन्तो घृतवन्तः सन्तु) ते ये स्वधावन्तोऽन्नवन्तो मधुमन्तो रसवन्तो घृतवन्तः स्नेहवन्तस्ते तुभ्यं सन्तु सन्ति तानुपयुङ्क्ष्व ॥ ४२ ॥

भाषार्थ—(यं ते मन्थम्) हे जीव ! तेरे शरीरमें जिस मन्थनीय रक्तको (यमोदनम्) जिस शुक्ररूप सारपदार्थको (यत्ते मांसम्) तथा जिस मांसको (निपृणामि) यथास्थान आवश्यकतानुसार नियुक्त करता हूँ । अतः उनके पोषण के वास्ते (ते स्वधावन्तो मधुमन्तो घृतवन्तः) वे अन्नवाले रसवाले और स्नेहवाले पदार्थ (ते सन्तु) तेरे लिये हैं तू उनका उपयोग कर ॥ ४२ ॥

शिक्षा—मनुष्य के शरीर में रक्त, शुक्र और मांस ये तीन धातुएं विशेषतः जीवनधारणके निमित्त हैं । इनके पोषणार्थ उत्तम अन्न रस और स्नेह वाले पदार्थों को सेवन करना चाहिये ॥ ४२ ॥

यास्ते धाना……॥४३॥ (देखो सूक्तसमन्वय) अथर्ववेद १८।४।२६ (पृष्ठ १६८)

इदं पूर्वमपरं नियानं येना ते पूर्वे पितरः परेताः ।
पुरोगवा ये अभिशाचो अस्य ते त्वा वहन्ति सुकृतामु लोकम् ॥४४॥

(इदं नियानं पूर्वमपरं येना ते पूर्वे पितरः परेताः) हे जीव ! इदं नियानं निरयणं नियतस्थानं शरीरं पूर्वं पूर्वतः प्रवृत्तमपरं परभावरहितमग्रेऽपि प्रवर्तिष्यमाणमस्ति येन शरीरेण ते तव पूर्वे पुरातनाः पितरः परेताः संसारयात्रां प्राप्ताः सन्ति (येऽस्य पुरोगवा अभिशाचः) येऽस्य शरीरस्य पुरोगवा नेतारोऽभिशाचोऽभिसेवमानाः सन्ति (त्वा सुकृतां लोकं वहन्ति) त्वां सुकृतां पुण्यकृतां स्थानं वहन्ति नयन्ति ॥ ४४ ॥

भाषार्थ—(इदं नियानम्) हे जीव ! यह शरीर (पूर्वमपरम्) पहलेसे ही चला आने वाला और आगे भी प्रवृत्त होने वाला है (येना) जिस शरीर के साथ अर्थात् शरीर धारण करके (पूर्वे ते पितराः) तेरे पूर्वज माता पिता आदि कुटुम्बी (परेताः) संसार यात्रा करते हैं और करते थे (येऽस्य पुरोगवाः) जो इस शरीर के पूर्व नेता जीवित कुटुम्बी (येऽभिशाचः) और जो इस शरीरकी सदा देख-भाल करने वाले हैं (त्वा सुकृतां लोकं वहन्ति) तुझे उत्तम पुरुषोंको अवस्थामें ले जाते हैं अर्थात् योग्य बनाते हैं ॥ ४४ ॥

शिक्षा—जीवका शरीरधारण करना केवल इसी समयके लिये ही नहीं है किन्तु आत्माके नित्य होनेसे पहलेसे ही चला आता है और आगे भी चलता रहेगा । अतः माता पिता आदि कुटुम्बी जनोंको चाहिये कि अपनी सन्तानको पुण्यवान् बनानेके लिये उसके शरीरका रक्षण पोषण आदि व्यवहार इस प्रकार करें कि जिससे इस जन्म और भविष्य जन्मके लिये उपयोगी हो सके ॥ ४४ ॥

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ॥४५॥

(देवयन्तः सरस्वतीं हवन्ते) देवयन्त आत्मानं देवं सम्पादयन्तो जनाः सरस्वतीं वाणीं वेदविद्याम् "सरस्वतीति वाङ्नाम" (नि० १ । ११) हवन्ते स्वीकुर्वन्ति । (तायमानेऽध्वरे सरस्वतीम्) तायमाने वर्धमानेऽध्वरे वेदारम्भसंस्कारयज्ञे सरस्वतीं वाणीं स्वीकुर्वन्ति (सुकृतः सरस्वतीं हवन्ते) सुकर्माणः सरस्वतीं धारयन्ति (सरस्वती दाशुषे वार्यं दात्) सरस्वती वाणी विद्या दाशुषे दत्तमनसे जीवाय वार्यं वरणीयं वस्तु दात् ददाति "न विद्यया विना सौख्यम्" इत्युक्तञ्च ॥ ४५ ॥

भाषार्थ—(देवयन्तः) अपने आपको विद्वान् बनानेके इच्छुक जन

(सरस्वतीं हवन्ते) अध्ययनरूप वाणीका स्वीकार करते हैं (तायमानेऽध्वरे सरस्वतीम्) अध्ययनरूप यज्ञमें या वेदारम्भसंस्कारयज्ञमें अभ्यास द्वारा वाणीका स्वीकार करते हैं (सुकृतः सरस्वतीं हवन्ते) सुकर्मी भाग्यशाली जन ही विद्याका स्वीकार करते हैं। (सरस्वती दाशुषे) वाणीरूप विद्या मनदेनेवाले पुरुषके लिये (वार्यं दात्) उत्तम सुखका प्रदान करती है ॥ ४५ ॥

शिक्षा—उच्चकोटि का विद्वान् बननेके लिये विद्यासे अत्यन्त प्रेम करनेकी आवश्यकता है निज अध्ययन और अध्यापन कालमें भी सदा विद्याभ्यास स्वाध्याय विद्याप्रचार करना चाहिये। विद्याप्राप्ति अपने सौभाग्य और पुण्यकर्मसे ही होती है। जो मनुष्य विद्याप्रचारके लिये अपना तन मन धन देता है विद्या उसीके लिये अपूर्व सुख प्रदान करती है ॥ ४५ ॥

सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः ।
आसद्यास्मिन् बर्हिषि मादयध्वमनमीवा इष आधेह्यस्मे ॥ ४६ ॥

(पितरो दक्षिणा यज्ञमभिनक्षमाणाः सरस्वतीं हवन्ते) पितरः शिक्षका दक्षिणा दक्षिणतो यज्ञं ब्रह्मयज्ञं विद्याध्यापनमभिनक्षमाणा अनुतिष्ठन्तः सरस्वतीं वाणीं हवन्ते प्रयुञ्जते (अस्मिन् बर्हिष्यासद्य मादयध्वम्) अस्मिन् बर्हिषि यज्ञ आसद्य मादयध्वं यूयं सर्वेऽपि हर्षयत (अस्मे अनमीवा इष आधेहि) हे सरस्वति ! अस्मेऽस्मभ्यमनमीवा आरोग्यकरा इष इषितव्याः क्रियाः सम्पादय ॥ ४६ ॥

भाषार्थ—(पितरो दक्षिणा) शिक्षक लोग शिष्यके दक्षिणमें बैठकर (यज्ञमभिनक्षमाणाः) विद्याध्यापन रूपी यज्ञका सेवन करते हुए (सरस्वतीं हवन्ते) वाणीका प्रयोग करते हैं (अस्मिन् बर्हिषि) इस अध्यापन स्थानमें (आसद्य) बैठकर (मादयध्वम्) विद्यादानसे प्रसन्न करो (अस्मे अनमीवाः) तथा हमारे लिये आरोग्यकारक (इष आधेहि) इष्ट क्रियाओंका हे सरस्वति ! तू आधान करा अर्थात् उचित आचरणकी तरफ ले चल ॥ ४६ ॥

शिक्षा—शिक्षक लोग शिक्षणालयमें बैठकर विद्यार्थियोंको विद्याध्यापन और सत्याचरणादिके उपदेशसे सर्व प्रकार योग्य बनावें ॥ ४६ ॥

सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि ॥ ४७ ॥

(या सरस्वति देव्युक्थैः स्वधाभिः पितृभिर्मदन्ती सरथं ययाथ) या

सरस्वति सरस्वती देवी वाक्शक्तिरुक्थैर्मन्त्रोच्चारणैः स्वधाभिः सत्कारैः सह पितृभिः शिक्षकैः सङ्गता मदन्ती जनान् हर्षयन्ती सती सरथमेकशरीरं ययाथ याति प्राप्नोति। 'अत्र पुरुषलकारव्यत्ययौ' (अत्र सहस्रार्घमिडो भागं रायस्पोषं यजमानाय धेहि) अत्राध्ययनाध्यापनयज्ञे सा सहस्रार्घं रायस्पोषं भूमानमसंख्यातगुणमिडो भागं स्तवनभागं विद्याप्रकाशं यजमानाय अध्येत्रे जनाय धेहि धारयति। "भूमा वै रायस्पोषः" (श० ३।५।२।१२)॥ ४७॥

भाषार्थ—(या सरस्वति देवि) यह जो अध्ययनाध्यापनरूप विद्या है वह (उक्थैः) मन्त्रोच्चारणों तथा (स्वधाभिः) सत्कारोंके साथ (पितृभिः) शिक्षकोंसे सङ्गत हुई (मदन्ती) मनुष्योंको सुख पहुँचाती हुई (सरथम्) एक शरीर होकर (ययाथ) प्राप्त होती है (अत्र सहस्रार्घं रायस्पोषमिडो भागम्) अध्ययनाध्यापन रूपी यज्ञमें बहुत गुणयुक्त विस्तृत या महान् विद्याप्रकाशको (यजमानाय) अध्ययन करने वालेके लिये (धेहि) धारण कराती है॥ ४७॥

शिक्षा—विद्वानोंका सत्कार और सत्सङ्ग करके विद्याध्ययन करना चाहिये मनुष्यके ज्ञानका विकास विद्याध्ययन से ही होसकता है॥ ४७॥

पृथिवीं त्वा पृथिव्यामा वेशयामि देवो नो धाता प्रतिरात्यायुः।
परापरैता वसुविद्व वो अस्त्वधामृताः पितृषु सं भवन्तु॥ ४८॥

(पृथिवीं त्वा पृथिव्यामावेशयामि) पृथिवीं पृथिवीरूपं पार्थिवशरीरयुक्तं त्वा त्वां हे बालक! पृथिव्यां भूमावावेशयाम्यासयामि (धाता देवो न आयुः प्रतिराति) धाता धारको जगदीशदेवो यश्च नोऽस्माकं गुरुशिष्याणामायुः प्रतिराति विस्तारयति (वसुविद् वोऽस्तु) यश्च वो युष्माकं बालकानां वसुविद् विद्याध्ययनरूपयज्ञवेत्ता भवतु भवति "यज्ञो वै वसुः" (श० १।७।१।६) (अधामृताः पितृषु सम्भवन्तु) अत्र विद्याध्ययनानन्तरं सर्वेऽपि शिष्या अमृताः सन्तः पितृषु अस्मादृशेषु शिक्षकेषु सम्भवन्तु सम्पन्ना भवन्तु। तस्मात् (परापरैत) यूयं गुरुशिष्यपरम्परया व्यवहरत॥ ४८॥

भाषार्थ—(पृथिवीं त्वा) हे बालक तू पार्थिव शरीरको धारण किये हुए है। अत एव तुझे (पृथिव्यामावेशयामि) मैं पृथिवी पर बिठलाता हूँ ब्रह्मचर्यकाल में पृथिवी पर ही सोने आदि की आज्ञा देता हूँ। (धाता देवः) विश्वका धारक जगदीशदेव (आयुर्नः प्रतिराति) हम गुरु शिष्योंकी आयुको बढ़ाता है (वसुविद् वोऽस्तु) जोकि तुम्हारे अध्ययनरूप यज्ञोंका जानने वाला है (अधामृताः पितृषु

सम्भवन्तु) विद्याध्ययन के अनन्तर मरणभयसे रहित हुए हमारे जैसे शिक्षकोंमें हो जाओगे (परापरैत) इसलिये तुम गुरुशिष्य परम्परासे व्यवहार करो ॥ ४८ ॥

शिक्षा—गुरुकुलमें विद्याध्ययन करते हुए विद्यार्थियों को गृहस्थोंके समान उत्तम शय्या आदि का प्रयोग नहीं करना चाहिये । इस प्रकार विद्याध्ययन की तपस्यामें जगद्रक्षक परमेश्वर सहायक होता है । विद्यासमाप्तिके पश्चात् अपने गुरुओंके समान अध्यापन आदि द्वारा विद्या प्रचार करना आवश्यक है ॥ ४८ ॥

आ प्र च्यवेथामप तन्मृजेथां यद्वां वामभिभा अत्रोचुः ।
अस्मादेतमघ्न्यौ तद्वशीयो दातुः पितृष्विहभोजनौ मम ॥ ४९ ॥

(यदभिभा अत्रोचुस्तद्वां प्राच्यवेथामपमृजेथम्) हे दम्पती ! यत्किञ्चिद-भिभा निजोपदेशेन विद्यादानेनान्यान सम्यग् भान्ति ये ते विद्वान्सोऽत्र गृहस्थ-धर्मं उचुरुपदिष्टवन्तस्तद्युवां प्राच्यवेथां प्रकृष्टं गृह्णीतम्, अपमृजेथां विचारेण संशोध्याचरतम् (अघ्न्यावस्मात् पितृष्वेतम्) अघ्न्यौ हे अहिंसनीयौ दम्पती ! युवा-मस्माद्-मार्गात् पितृषूपदेशकेषु निरन्तरं स्थित्वा विद्यां प्राप्नुतम् (मम दातुर्वशीय इह भाजनौ) मम विद्याप्रयच्छतुर्भोग्यमिह पालयितारौ युवां स्थः । वसीय इति सायण-सम्मतपाठः ॥ ४६ ॥

भाषार्थ—(यद्वामभिभा अत्रोचुः) हे पतिपत्नी ! जो तुमको उपदेशक लोग गृहस्थ धर्म के सम्बन्धमें उपदेश करें (तत्प्राच्यवेथामपमृजेथाम्) तुम उसको ग्रहण करो और विचारके द्वारा संशोधन करके उसका आचरण करो (अघ्न्यावस्मात् पितृष्वेतम्) हे दयनीय पतिपत्नी ! इस मार्ग से तुम उपदेशकोंके अन्दर बारम्बार स्थिर होकर विद्या प्राप्त करो (मम दातुर्वसीयः) मुझ विद्यादान देने वालेके इस भोग्य धन के (इहभोजनौ) इस संसार में तुम रक्षा करने वाले होवो ॥ ४६ ॥

शिक्षा—गृहस्थमें पतिपत्नीको धार्मिक विद्वानोंसे उपदेश ग्रहण करना और तदनुसार आचरण करना चाहिये जहां कहीं भी विद्वानोंका सत्सङ्ग प्राप्त हो वहां पहुँचकर लाभ उठाना चाहिये। इस प्रकार धर्मोपदेशोंके अनुसार गृहस्थमें रहने से दुःखोंसे अलग हो सकते हैं। धार्मिक विद्वानोंकी विद्या तथा उनके उपदेशों की रक्षा तन मन धन द्वारा करना गृहस्थजनोंका कर्तव्य है ॥ ४६ ॥

यहां तक जीवनवृत्त था अब कायापरिणाम और देहान्तकी परिस्थितियों का आरम्भ होता है—

एयमगन् दक्षिणा भद्रतो नो अनेन दत्ता सुदुघा वयोधाः ।
यौवने जीवानुपपृञ्चती जरा पितृभ्य उप सं पराणयादिमान् ॥५०॥

(अनेन दत्तेयं दक्षिणा सुदुघा वयोधा नो भद्रत आगन्) अनेनेश्वरेण दत्तेयं दक्षिणा तनुरूपा दक्षिणा या चैकोनत्रिंशत्तममन्त्रोक्ता "दक्षिणां सप्तमातरम्" वयोधा आयुर्धरा नोऽस्मभ्यं भद्रतः कल्याणहेतोरागन् आगच्छति (यौवने जीवानुपपृञ्चती जरा इमान् पितृभ्य उपसम्पराणयात्) सा तनुरूपा दक्षिणा कर्मफलरूपा तनुः यौवने युवावस्थायां जीवान सर्वान् प्राणिन उपपृञ्चती सम्यक् प्राप्नुवती सा जरा जीर्णा सती पितृभ्य ऋतुसहचरितसूर्यरश्मिभ्य उपसम्पराणयादुपसमर्पयेत्। लिङर्थे लेट् ॥५०॥

भाषार्थ—(अनेन दत्तेयम्) इस सर्वव्यापक जगदीश देव की प्रदानकी हुई (दक्षिणा सुदुघा वयोधाः) कायारूप दक्षिणा जोकि कर्म फल को दोहन करती है वह आयुको धारण करने वाली (भद्रतो न आगन्) हमको कल्याणके हेतु प्राप्त हुई है (यौवने जीवान् उपपृञ्चती) यौवनकालमें जीवों को उत्तम रूपसे प्राप्त होती है (जरा-इमान् पितृभ्यः) जीर्ण हुई काया इन सब प्राणियोंको ऋतुसहचरित सूर्यरश्मियोंके लिये (उपसम्पराणयात्) समर्पण कर देती है ॥ ५० ॥

शिक्षा—प्राणियोंके कर्मफल भोगार्थ देह प्राप्त होतो है जो प्राणी को उस की आयु का सेवन कराते हुए यौवन काल में सम्यक् पूर्ण होकर जब जीर्ण होजाती है तब इन प्राणियों को अर्थात् जीवात्माओं को सूर्यरश्मियों के प्रति समर्पण कर देती है अर्थात् देहपात के अनन्तर जीव पुनर्जन्म आदि के लिये सूर्यरश्मि को प्राप्त होते हैं ॥ ५० ॥

इदं पितृभ्यः प्र भरामि बर्हिर्जीवं देवेभ्य उत्तरं स्तृणामि ।
तदारोह पुरुष मेध्यो भवन् प्रति त्वा जानन्तु पितरः परेतम् ॥५१॥

(पितृभ्य इदं बर्हिः प्रभरामि) पितृभ्यः सूर्यरश्मिभ्यो जीवात्मानमिदं बर्हिरिदं मेघमण्डलं मेघोदकं शरीरबीजं प्रभरामि प्रधरामि प्रस्थापयामि "बर्हिरुदकनाम" (नि० १।१२) (उत्तरं जीवं देवेभ्यः स्तृणामि) उत्तरं तदनन्तरं जीवं देवेभ्योऽन्यादिभ्यः स्तृणामि क्षिपामि त्यजामि । एवमत्रोदकेन जीवोत्पत्तिर्दर्श्यते "तोयेन जीवान् विससर्ज भूम्याम् (महानारायणोपनिषद् १।४) (तदा मेध्यो भवन् पुरुष आरोह) तदा मेध्यो यज्ञियो गर्भाधानयज्ञयोग्यो भवन् हे पुरुष ! आरोह-उत्पद्यस्व 'रुह बीजजन्मनि प्रादुर्भावे च' (पितरस्त्वा परेतं प्रतिजानन्तु) पितरस्ते जनकादयस्त्वां परेतं परागतं प्रगतं प्राप्तं प्रकटीभूतं प्रतिजानन्तु स्वीकुर्वन्ति । ईश्वरोक्तिरियं विज्ञेया ॥५१॥

भाषार्थ—(पितृभ्यः) देहपातानन्तर सूर्यरश्मियोंमें प्राप्त जीवात्माको उन सूर्यरश्मियोंसे (इदं बर्हिः) इस मेघमण्डल में (प्रभरामि) पहुँचाता हूँ (उत्तरं जीवम्) इसके अनन्तर जीवात्माको (देवेभ्यः स्तृणामि) अग्नि आदि देवोंके प्रति पुनर्जन्म धारण करानेके लिये छोड़ देता हूँ (तदा मेध्यो भवन्) उस समय गर्भाधान के योग्य होता हुआ (पुरुष आरोह) हे जीव ! तू उत्पन्न हो। (पितरस्त्वा परेतं प्रतिजानन्तु) माता पिता आदि जनक शरीरमें प्रकट हुये तुझको स्वीकार करें ॥५१॥

शिक्षा—देहान्तके पश्चात् जीवात्मा सूर्यरश्मियोंको पहुंचकर पुनः मेघमण्डलमें जाता है। वहां गर्भाधानके योग्य बनकर जन्मधारण करता है। माता पिता आदि उसको अपना लेते हैं ॥ ५१ ॥

एदं बर्हिरसदो मेध्यो भूः प्रति त्वा जानन्तु पितरः परेतम् ।
यथापरु तन्वं सं भरस्व गात्राणि ते ब्रह्मणा कल्पयामि ॥ ५२ ॥

(इदं बर्हिरासदः) हे जीव ! त्वमिदं बर्हिरुदकं शरीरबीजमासद आसीदसि (मेध्यो भूः) अत एव मेध्यो गर्भयोग्योऽभूर्भवसि (पितरः परेतं त्वा प्रतिजानन्तु) पितरस्ते जनकादयः परेतं प्राप्तं त्वां प्रतिजानन्तु स्वीकुर्वन्ति (यथापरु तन्वं संभरस्व) यथापरु यथासन्धि यावत्सन्धि सन्ध्यनुसारं समग्रोचितसन्ध्यनुसारं तन्वं शरीरं सम्भरस्व धारय (गात्राणि ते ब्रह्मणा कल्पयामि) गात्राण्यङ्गानि तेऽहमीश्वरो ब्रह्मणा स्वकीयब्रह्मरूपेणोत्पादनशक्त्या कल्पयाम्युत्पादयामि ॥ ५२ ॥

भाषार्थ—(इदं बर्हिरासदः) हे जीव ! तू इस मेघमण्डलको प्राप्त होता है (मेध्यो भूः) अत एव गर्भयोग्य होता है (पितरः परेतं त्वा प्रतिजानन्तु) तेरे माता पिता आदि जनक तुझे अपनाते हैं इसलिये निश्चिन्त होकर (यथापरु तन्वं सम्भरस्व) जैसी और जितनी सन्धि होनी चाहियें उन समग्र सन्धियोंके साथ शरीर को धारण कर (गात्राणि ते) तेरे अङ्गोंको (ब्रह्मणा कल्पयामि) मैं ईश्वर स्वकीय ब्रह्मरूप उत्पादन शक्तिसे उत्पन्न करता हूँ ॥ ५२ ॥

शिक्षा—जीव गर्भमें पहुँचकर शरीरकी सन्धियों और अङ्गोंको निजयोनि के अनुसार प्राप्त होता है। सम्पूर्णप्राणियोंके शरीररूपी कलाओंका निर्माण सर्वज्ञ सर्वशक्तिमान् जगदीश देव करता है ॥ ५२ ॥

पर्णो राजापिधानं चरूणामूर्जो बलं सह ओजो न आगन् ।
आयुर्जीवेभ्यो विदधद् दीर्घायुत्वाय शतशारदाय ॥ ५३ ॥

(पर्णो राजा चरूणामपिधानम्) पर्णो राजा पर्णवती सोमौषधिश्चरूणा

सर्वेषां चरणीयानां भक्षणीयानामपिधानमपिधीयन्त आश्रियन्ते यस्मिंस्तद्रक्षकमस्ति। यतः (ऊर्जो बलं सह ओजो न आगन्) ऊर्जो रसो बलं सह उत्साह ओजस्तेजश्च नोऽस्मभ्यं जीवेभ्य आगन्-आगच्छति । 'लडर्थे लेट्' (जीवेभ्यः आयुर्विदधत् शतशारदाय दीर्घायुत्वाय) स च सोमो जीवेभ्य आयुर्विदधाति शतशारदाय शत-वार्षिकाय दीर्घजीवनाय ॥ ५३ ॥

भाषार्थ—(पर्णो राजा) पर्णवालो सोम ओषधि (चरूणामपिधानम्) समग्र भक्षणीय ओषधियों का आश्रयीभूत है। क्योंकि इसीसे (ऊर्जो बलं सह ओजो न आगन्) रस, बल, उत्साह और तेज हमारे लिये प्राप्त होता है (जीवेभ्य आयुर्विदधत्) जो कि जीवोंके लिये जीवन प्रदान करती है (शतशारदाय दीर्घायु-त्वाय) सौ वर्षकी लम्बी आयु के लिये ॥ ५३ ॥

शिक्षा—सोम ओषधिके अन्दर सभी सेवनीय ओषधियोंका सार है क्योंकि सोम ओषधि सेवन करनेसे मनुष्यके शरीरमें रस, बल, उत्साह और तेज प्राप्त होते हैं जो मनुष्यको स्वास्थ्यपूर्ण शतवार्षिक आयुको प्रदान करते हैं ॥ ५३ ॥

ऊर्जो भागो य इमं जजानाश्मान्नानामाधिपत्यं जगाम ।
तमर्चत विश्वमित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात् ॥५४॥

(ऊर्जो भागो योऽश्मा-इमं जजान) ऊर्जो रसस्य भागो योऽश्मा स्थिरो-ऽश्मेवेमं जीवं जज्ञानोत्पादितवान् कृतवानित्यर्थः (अन्नानामाधिपत्यं जगाम) सोऽ-न्नानामद्यमानानामाधिपत्यं स्वामित्वं जगाम प्राप्तवान् (स यमो नः प्रतरं जीवसे धात्) स यमो यमनशीलो नोऽस्मान् प्रतरं जीवसे जीवनाय प्रकृष्टं धारयेत् (विश्वमित्रास्तं हविर्भिरर्चत) अतो यूयं विश्वमित्राः सन्तस्तं हविर्भिराहुतिभिरर्चत सेवध्वम् ॥५४॥

भाषार्थ—(ऊर्जो भागो योऽश्मा) इस सोम ओषधिका जो रस भाग स्थिर या वज्रतुल्य प्रभावशाली है (इमं जजान) इस सेवन करने वालेको सामर्थ्यवान् बना देता है (अन्नानामाधिपत्यं जगाम) क्योंकि सोम सभी खाद्य ओषधियोंके आधिपत्यको प्राप्त हुआ २ है (स यमो नः प्रतरं जीवसे धात्) वह यमनशील हमको उत्तम जीवन के लिये धारण करता है । अतः (विश्वमित्रास्तं हविर्भिरर्चत) सबके हितचिन्तक बनते हुए उस सोम को आहुतियोंसे यज्ञमें उपयुक्त करो ॥ ५४ ॥

शिक्षा—सोम ओषधि का रस वज्रतुल्य प्रभावशाली है । जहां वह प्राप्त करनेसे उत्कृष्टजीवन प्रदान करता है वहां इसकी आहुतियां यज्ञमें देनेसे सर्वहित सिद्ध होता है ॥ ५४ ॥

यथा यमाय हर्म्यमवपन् पञ्च मानवाः ।
एवा वपामि हर्म्यं यथा मे भूरयोसत ॥५५॥

(यथा पञ्च मानवा यमाय हर्म्यमवपन्) यथा पञ्च मानवाः पञ्चजना ब्राह्मणक्षत्रियविट्शूद्राश्चत्वारो वर्णा निषादः पञ्चमः "पञ्चजनाः······चत्वारो वर्णा निषादः पञ्चमः" (निरु० ३ । ८) यमाय यन्तुं शीलाय जीवाय सन्तानार्थं हर्म्यं हर्तुं धारयितुं योग्यं जीवगृहं गर्भबीजं स्त्रियामवपन् वपन्ति । 'सामान्ये काले लङ्' । "हर्म्यं गृहनाम" (नि० ३ । ४) (एवा हर्म्यं वपामि) एवमहमीश्वरो हर्म्यं तदेव जीवगृहं गर्भबीजं सृष्ट्यां वपामि (यथा मे भूरयो असत) यथा मे प्रजारूपा यूयं भूरयो बहवोऽसत भवत । अल्पपाठभेदेनैष मन्त्रस्तैत्तिरीयारण्यके पठ्यते—

"यथा यमाय हार्म्यमवपन्पञ्च मानवाः । एवं वपामि हार्म्यं यथाऽसाम जीवलोके भूरयः" पूर्वञ्चैतस्मात्—

"प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते सुवः । इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसाऽवति" (तै० आ० ६ । ६ । २)

अत्र प्रकरणे वृष्टिद्वारेण काचिदुत्पत्तिविद्या लक्ष्यते तद्वच्चास्माभिर्व्याख्यातम् ॥ ५५ ॥

भाषार्थ—(यथा पञ्च मानवाः) जिस प्रकार ब्राह्मण, क्षत्रिय, वैश्य, शूद्र और निषाद पांचों (यमाय हर्म्यमवपन्) शरीर का नियन्त्रण करने वाले जीव के लिये यानि सन्तानके लिये गर्भ बीजको स्त्रीके अन्दर बोते हैं (एवा हर्म्यं वपामि) इसी प्रकार मैं ईश्वर उक्त गर्भ बीजको सृष्टिके अन्दर बोता हूँ (यथा मे भूरयोऽसत) जिससे तुम जीवरूप मेरी प्रजायें बहुत हो सको ॥ ५५ ॥

शिक्षा—जिस प्रकार मनुष्योंकी ओरसे शरीर उत्पत्तिके लिये स्त्रियोंमें शरीरोंका बीजारोपण किया जाता है । एवं सृष्टिके अन्दर नाना प्रकार की प्रजाकी उत्पत्तिका बीजरोपण पृथक् २ ईश्वर करता है ॥ ५५ ॥

इदं हिरण्यं बिभृहि यत् ते पिताबिभः पुरा ।
स्वर्गं यतः पितुर्हस्तं निर्मृड्ढि दक्षिणम् ॥ ५६ ॥

(इदं स्वर्गं हिरण्यं बिभृहि) इदं स्वर्गं सुखप्रापकं हिरण्यं पूर्वोक्तं हर्म्यं जीवगृहं गर्भबीजं रेतो वा शुक्रं वा बिभृहि धारय "रेतो हिरण्यम्" (तै० ३ । ८ । २।४) "शुक्रं हिरण्यम्" (तै० १ । ७ । ६ । ३) (यत्ते पिता पुराऽबिभः) यद्रेतस्ते पिता

जनकः पूरा पूर्वमबिभो निजशरीरे धारितवान् (यतः पितुर्दक्षिणं हस्तं निमृड्ढि) जीव ! अतस्त्वमेवं जन्म गृहीत्वा पितुर्जनकस्य दक्षिणं हस्तं संसारकृत्यसम्पादनाय तद्वंशपरम्पराचालनाय निमृड्ढि स्वलङ्कुरु शोभस्व । 'मृजू शौचालङ्करणयोः' ॥५६॥

भाषार्थ—(इदं स्वर्गं हिरण्यम्) इस सुखहेतु गर्भबीज शुक्रको (बिभृहि) हे जीव ! तू धारण कर (यत्ते पिता) जिसको तेरे जनक पिता ने (पुराऽबिभः) प्रथम निज शरीरमें धारण किया था (पितुर्दक्षिणं हस्तम्) हे जीव ! तू इस प्रकार जन्मधारण करके स्वजनक पिताके दक्षिण हाथको संसारकृत्यसम्पादनार्थ या वंशपरम्परा चलानेके लिये (निमृड्ढि) शोभायमान कर ॥ ५६ ॥

शिक्षा—जीव अपने कर्मफल भोगनेके लिये मनुष्य शरीरमें गर्भको प्राप्त होता है, जिस गर्भका मूलस्वरूप शुक्र पिताके शरीरमें स्थिर होता है अत एव सन्तान निजपिताके कर्तव्यभारको हाथमें लेकर अपनी वंशपरम्पराको अलङ्कृत करता है ।॥ ५६ ॥

ये च जीवा ये च मृता ये जाता ये च यज्ञियाः ।
तेभ्यो घृतस्य कुल्यैतु मधुधारा व्युदन्ती ॥ ५७ ॥

(ये जीवा ये च मृता ये च जाता ये च यज्ञियाः) ये जीवा मृता मृत्युंगता ये च जाता विद्यमाना ये च यज्ञिया गर्भाधानयज्ञार्हा गर्भाधानान्तर्गता जनिष्यमाणा एवं कालत्रये वर्तमानाः सर्वेऽपि ये जीवाः सन्ति (तेभ्यो मधुधारा व्युन्दती घृतस्य कुल्यैतु) तेभ्यो जीवेभ्यो घृतस्य कुल्या जलवृष्टिः "घृतमुदकनाम" (नि० १।१२) मधुधारा प्राणसम्पादिका "प्राणो वै मधुः" (शत० १४ । १ । ३ । १०) व्युदन्ती पृथिवीमार्द्रीं कुर्वती सत्येतु गच्छतु ॥ ५७ ॥

भाषार्थ—(ये जीवा ये च मृताः) जीवोंमें जो मृत्युको प्राप्त हो गए हैं (ये च जाताः) और जो विद्यमान हैं (ये च यज्ञियाः) तथा जो गर्भाधानान्तर्गत अर्थात् उत्पन्न होने वाले हैं । इस प्रकार तीनों कालोंमें वर्तमान जितने भी जीव हैं (तेभ्यो घृतस्य कुल्या) उनके लिये जलवृष्टि (मधुधारा) प्राण सम्पादन करने वाली (व्युन्दती) पृथिवीको गीला करती हुई (एतु) प्राप्त होती है ॥ ५७ ॥

शिक्षा—मेघवृष्टि मृतजीवों को पुनर्जन्म देने, विद्यमान जीवोंको जीवित रखने, गर्भगत उत्पन्न होनेवाले जीवोंको प्राणशक्ति प्रदान करनेके लिये पृथिवी पर प्राप्त होती है ॥ ५७ ॥

वृषा मतीनां पवते विचक्षणः सूरो अह्नां प्रतरीतोषसां दिवः।
प्राणः सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषया ॥५८॥

(मतीनां वृषा विचक्षणः पवते) अस्मिन् शरीरे मतीनां मननक्रियाणां नेत्रादीन्द्रियवृत्तीनां च वृषा वर्षितृरूपं सञ्चारनिमित्तं मनः । "वृषा हि मनः" (श० १।४।४।३) विचक्षणो विविधतया द्रष्टृ सत् पवते गच्छति प्राप्नोति "पवते गतिकर्मा" (नि० २।१४) (दिव उषसामह्नां प्रतरिता सूरः) 'अत्र लुप्तोपमाऽलङ्कारः' यथा दिवो रश्मिमण्डलादन्तरिक्षादुषसामह्नां दिवसानां च प्रतरिता प्रतारकः सूरः सूर्य्योऽस्ति । तथा (प्राण इन्द्रस्य हार्दिमाविशन् मनीषया सिन्धूनां कलशानचिक्रदत्) प्राणः प्राणवायुरिन्द्रस्य जीवात्मनो हार्दिं हृत्कमलमाविशन्-अन्तः स्थितः सन् । 'हृदयशब्दाच्छान्दस इञ् ताद्धितः' मनीषया हृच्छक्त्या सह सिन्धूनां स्यन्दमानानां रक्तवाहिनीनां नदीरूपाणां नाडीनां कलशान् रक्ताशयानचिक्रदत् पुनः पुनः कम्पयति 'क्रद वैक्लव्ये वैकल्ये चेत्यन्ये भ्वादिः' "तद्यदेतैरिदं सर्वं सितं (बद्धम्) तस्मात्सिन्धवः" (जै० उ० १।२६।६) "प्राणो वै सिन्धुश्छन्दः" (श० ८।२।२।४) ॥५८॥

भाषार्थ—(मतीनां वृषा) मननक्रियाओं नेत्रादि-इन्द्रियवृत्तियों का सञ्चार निमित्त मन (विचक्षणः पवते) विविध रूपसे उनका द्रष्टा प्राप्त होता है (दिव उषसामह्नां प्रतरिता सूरः) जैसे रश्मि-मण्डल से दिनों का प्रेरक सूर्य है । तथा (प्राण इन्द्रस्य हार्दिमाविशन्) प्राणवायु जीवात्मा के हृदयकमल में स्थित होकर (मनीषया हिन्धूनाम्) हृदय की शक्तिसे स्यन्दमान रक्तवाहिनो नाड़ियों के (कलशानचिक्रदत्) रक्ताशयोंको बारम्बार कम्पाता है ॥ ५८ ॥

शिक्षा—सारी मनन क्रियाओं और इन्द्रिय वृत्तियों का वहनकर्ता और आधार मन है । जिस प्रकार सूर्य अपनी किरणोंसे दिनके प्रकाशका निमित्त या प्रेरक है एवं प्राण जीवात्माके हृदयमें प्रवेश करके सभी रक्तवाहिनियोंके व्यापारप्रकाशनका निमित्त है ॥ ५८ ॥

त्वेषस्ते धूम ऊर्णोतु दिवि षंछुक्र आततः ।
सूरो नहि द्युता त्वं कृपा पावक रोचसे ॥ ५९ ॥

(शुक्रस्ते त्वेषो धूमः सन दिव्याततः, ऊर्णोतु) हे जीव ! शुक्रः शुक्रम् । 'लिङ्गव्यत्ययः' । तव त्वेषो धूमो देदीप्यमानोऽर्चिरिव सद् दिवि मस्तिष्के स्थितं तच्च ते शरीरमृर्णोतु-आच्छादयतु (सूरो न द्युता त्वं पावक कृपा रोचसे) सूरो न द्युता

सूर्यो यथा दीप्त्या तथा त्वं पावक हे स्वभावतः शुद्धस्वरूप जीव ! कृपा निजसामर्थ्येन । 'कृपू सामर्थ्ये' । रोचसे प्रतिभासि ॥ ५६ ॥

भाषार्थ—(शुक्रस्ते त्वेषो धूमः) हे जीव ! तेरा शुक्र अर्चिके समान दीप्त होता हुआ (दिव्यातत ऊर्णोतु) मस्तिष्कमें स्थित हुआ सारे शरीरको व्याप्त होता है (सूरो न द्युता) जिस प्रकार सूर्य अपनी दीप्तिसे वर्तमान है वैसे (त्वं पावक कृपा रोचसे) स्वरूपसे शुद्ध हुआ तू भी निज सामर्थ्यसे प्रकाशमान है ॥५६॥

शिक्षा —मनुष्यका शुक्र तेजस्वी होकर मस्तिष्कमें स्थिर होता है जोकि सम्पूर्ण शरीरमें व्याप जाता है इस प्रकार शुक्ररूपी सामर्थ्यसे ब्रह्मचारी मनुष्य सूर्य की भांति तेजस्वी बनता है ॥ ५६ ॥

प्र वा एतीन्दुरिन्द्रस्य निष्कृतिं सखा सख्युर्न प्र मिनाति संगिरः ।
मर्य इव योषाः समर्षसे सोमः कलशे शतयामना पथा ॥ ६० ॥

(इन्द्रस्य निष्कृतिं वै-इन्दुः प्रैति) इन्द्रस्य जीवस्य निष्कृतिं वै प्रतिष्ठापनं प्रति इन्दुर्जीवनोदकं रक्तं प्रैति प्रकर्षेण गच्छति । "इन्दुरुदकनाम" (नि० १ । १२) (सखा सख्युर्न प्रमिनाति सङ्गिरः) यथा कश्चन सखा निजसख्युः सङ्गिरः संवादानुज्ञाश्च प्रमिनाति प्रमाणयति-अनुसरति वा तथा (मर्य्य इव योषाः सोमः कलशे शतयामना पथा समर्षसे) अथवा यथा मनुष्यो भार्य्याः समभ्येति तथा सोमो रसः रक्तमिति यावत् । कलशे हृत्कोशे वर्तमानं शतयामना शतं यामानो यातव्यस्थानानि यस्मिन् तेन पथा । समभ्येति ॥ ६० ॥

भाषार्थ—(इन्द्रस्य निष्कृतिं वै) शरीर के अन्दर जीव की प्रतिष्ठाके लिये (इन्दुः प्रैति) रक्त प्रगति करता है (सखा सख्युर्न सङ्गिरः) जैसे कोई मित्र अपने मित्र की अनुज्ञाओं और संवादोंको (प्रमिनाति) प्रमाणित और स्वीकार करता है । तथा (मर्य्य इव योषाः) जैसे मनुष्य भार्य्याके प्रति प्राप्त होता है एवं (सोमः कलशे) पूर्वोक्त रक्त हृदयकोशमें वर्तमान हुआ (शतयामना पथा समर्षसे) असंख्य यातव्य स्थानों वाले मार्गसे सम्पूर्ण शरीरको प्राप्त होता है ॥ ६० ॥

शिक्षा—जीवात्माकी शरीरमें विद्यमानता रक्तसंचार पर निर्भर है । रक्त हृदयकोशमें वर्तमान होता हुआ अन्य सभी रक्ताशयोंको सूक्ष्म तथा असंख्य तन्तुओं वाले मार्गमें से होता हुआ सम्पूर्ण शरीरमें प्रगति करता है । एक रक्ताशय का दूसरे रक्ताशयमें रक्तसंचारका क्रम या अनुकूलता इस प्रकार वर्तमान है जैसे

एक मित्र दूसरे मित्रकी अनुज्ञाका पालन करते और संवाद एक से दूसरे तक पहुँचाते हैं। या जैसे पतिपत्नी आपस में सहमत होकर वर्तते हैं ॥ ६० ॥

अक्षन्नमीमदन्त ह्यव प्रियाँ अधूषत ।

अस्तोषत स्वभानवो विप्रा यविष्ठा ईमहे ॥ ६१ ॥

(अक्षन्नमीमदन्त हि प्रियानवाधूषतास्तोषत) एवं सति शतयामनि पथि प्राणा अक्षन् भक्षितवन्तोऽमीमदन्तोपचितवन्तश्च प्रियानङ्गानवाधूषतावकम्पितवन्तोऽस्तोषत निजसञ्चरणशब्दैरनुष्ठितवन्तः (स्वभानवो विप्रा यविष्ठा ईमहे) एवं प्राणसुसञ्चारे वयं स्वभानवो निजदीप्तिमन्तश्चेतनावन्तो विप्रास्तथा यविष्ठा युवतमाः सन्त ईमहे प्रार्थयामहे। "ईमहे याच्ञाकर्मा" (नि० ३ । १९) ॥ ६१ ॥

भाषार्थ—(अक्षन्नमीमदन्त हि) पूर्वोक्त शतयामन् रक्तमागमें शरीरके अन्दर सारे प्राण उक्त रक्तको भक्षण करते हैं और वे बढ़ते हैं। (प्रियानवाधूषतास्तोषत) पुनः वे अपने २ प्रिय अङ्गों को कम्पित करते और निज सञ्चरणशब्दों से उनको प्राप्त होते हैं (स्वभानवो विप्रा यविष्ठा ईमहे) अतः उक्त प्राणों को हम सावधान हुवे बुद्धि के साथ और विद्वान् तथा बलवान् होते हुवे शरीर में सदा स्थिर रखना चाहते हैं ॥ ६१॥

शिक्षा—रक्ताशयों में रक्त घूमता हुआ शरीरके अन्दर वर्तमान सभी प्राणों को प्राप्त होता है जिससे वे प्राण बलवान् होकर अपने २ सम्बन्ध के अङ्गों को चलाते और निज संचार शब्दों से प्राप्त होते हैं। अतः मनुष्योंको बड़ी सावधानी बुद्धिमत्ता आदि उत्तम व्यवहारोंसे उक्त प्राणोंकी सुस्थितिका ध्यान रखना चाहिए ॥ ६१ ॥

आ यात पितरः सोम्यासो गम्भीरैः पथिभिः पितृयाणैः ।

आयुरस्मभ्यं दधतः प्रजां च रायश्च पोषैरभि नः सचध्वम् ॥६२॥

(सोम्यासः पितरो गम्भीरैः पितृयाणैः पथिभिरायात) हे सोमसम्पादिनो रससम्पादिनः पितरः प्राणा गम्भीरैः सुरक्षितैः पितृयाणैः प्राणनाडीयानैः पथिभिर्मार्गैरायातः शरीरे प्राप्नुत (अस्मभ्यमायुः प्रजां दधतः) अस्मभ्यमायुः प्रजां प्रजननशक्तिम्। 'एकवचनत्वात्' दधतो धारयन्तः (रायश्च पोषैर्नोऽभिषचध्वम्) यूयं रायो धनरूपाः सन्तो हे प्राणा नोऽस्मान् पोषैः पोषणैरभिषचध्वं संसेवध्वम् ॥ ६२ ॥

भाषार्थ—(सोम्यासः पितरः) शरीरके अन्दर रस बनाने वाले प्राणो

(गम्भीरैः पितृयाणैः पथिभिरायात) सुरक्षित प्राण नाडीरूप मार्गों से शरीरमें प्राप्त हो (अस्मभ्यमायुः प्रजां दधतः) हमारे लिए स्वजीवन तथा सन्तानोत्पादक-शक्तिको धारण कराते हुए (रायश्च पोषैर्नोऽभिषचध्वम्) तुम सुख दायक होते हुवे हमको विविध पोषणों से युक्त करो ॥ ६२ ॥

शिक्षा—शरीरके अन्दर प्राण सुरक्षित प्राणतन्तुओं द्वारा सम्पूर्ण शरीर को प्राप्त होते हैं और शरीरके अन्दर जीवनशक्ति तथा प्रजननशक्तिको स्थिर करते हुवे हर प्रकारसे पुष्ट करते हैं ॥ ६२ ॥

परा यात पितरः सोम्यासो गम्भीरैः पथिभिः पूर्याणैः ।
अधा मासि पुनरायात नो गृहान् हविरत्तुं सुप्रजसः सुवीराः ॥६३॥

(सोम्यासः पितरो गम्भीरैः पूर्य्याणैः पथिभिः परायात) सोमसम्पादिनो रससम्पादिनः शुद्धरक्तनिर्मातारः पितरः प्राणा गम्भीरैर्गहनैः पूर्याणैः पुरं शरीरं समग्रदेहं यान्ति यैस्तैः पथिभिर्मार्गैः प्राणतन्तुभिः परायात सर्वत्र विस्तृता भवत । पूः शरीरमत्र प्रमाणानि—"नवद्वारे पुरे देही" (श्वेताश्वतरो० ३ । १८) "पुरमेकादशद्वारम्" (कठो० ५ । १) "अयं पुरुषः सर्वासु पूर्षु पुरिशयः" (बृहदा० २ । १५ । १८) "प्राणाग्नय एवैतस्मिन् पुरे जाग्रति" (प्रश्नो ४ । ३) (अधा मासि पुनरायात) अधा अनन्तरं मासि । 'मस् परिणामे ततो णिजन्तात् क्विप्' । मासयति परिणमयति रक्तं शोधयतीति तादृशि फुप्फुसाद्यङ्गे मांसपिण्डे पुनरायात पुनरागच्छत (सुप्रजसः सुवीरा नो गृहान् हविरत्तुं पुनरायात) सुप्रजसः सुप्रजायन्ते—इति सुप्रजसः सम्यगुत्पत्ति-शक्तिमन्तः सुवीराः सुबलिष्ठाः सन्तो नो मम "अस्मदो द्वयोश्च" (अष्टा० १ । २ । ५६) गृहान् पूर्वोक्तान् कोशान् हविरन्नमत्तुं ग्रहीतुं पुनरायात वारं वारं प्राप्नुत । 'मास् शब्दो-मांसवाची सायणेनापि मतः "माः मांसानि" (ऋ० ५ । २६ । ८) ॥ ६३ ॥

भाषार्थ—(सोम्यासः पितरो गम्भीरैः पूर्य्याणैः पथिभिः परायात) शुद्ध रक्तके निर्माण करने वाले प्राणो ! शरीरके अन्दर तन्तुरूप गहन मार्गों से इस सम्पूर्ण शरीरमें फैल जाओ (अधा मासि पुनरायात) पश्चात् रक्तका परिणाम करने वाले फुप्फुसादि अङ्गमें फिर प्राप्त होवो (सुप्रजसः सुवीरा नो गृहान् हविरत्तुं पुनरायात) इस प्रकार अङ्गादिकोंकी उत्तम उत्पत्ति शक्ति वाले तथा सुबलिष्ठ होते हुए मेरे शारीरिक कोशोंको रसादि धातुओंके ग्रहण करनेके लिये बारम्बार प्राप्त होवो ॥६३॥

शिक्षा—रक्तका शोधन तथा निर्माण करने वाले प्राण शरीरमें वर्तमान सूक्ष्मतन्तुमार्गों से रक्तको साथ लेकर सम्पूर्ण शरीरमें भ्रमण करते हैं पुनः उक्त

रक्तका परिणाम उत्तम बनानेके साधनरूप फुप्फुस जैसे अङ्गमें प्राप्त होते हैं। वहां रक्त शुद्धि होती है जिससे प्राण बलवान् हो अङ्गोंकी निर्माण शक्तिको प्राप्त करके पुनः रक्त बननेके सामग्रीरूप रसको साथ लेकर गतिचक्र चलाते हैं ॥ ६३ ॥

यद्व वो अग्निरजहादेकमङ्गं पितृलोकं गमयँ जातवेदाः ।
तद्व व एतत् पुनरा प्याययामि साङ्गाः स्वर्गे पितरो मादयध्वम् ॥६४॥

(यदग्निर्वः पितृलोकं गमयन्नेकमङ्गमजहात्) हे प्राणाः ! यद्यतोऽग्निर्वैश्वानरः शरीरचालकोग्निः पितृलोकं प्राणस्थानं देहं गमयन् युष्मान् प्रापयन्नेकमङ्गमेकमप्यङ्गमजहात् त्यजेत पूरणं न कुर्यात् (तद्व एतत् पुनराप्याययामि) तद्वो युष्माकमेतदङ्गं पुनराप्याययामि पुनः पूरयामि (पितरः साङ्गाः स्वर्गे मादयध्वम्) पितरो हे प्राणाः! साङ्गाः सर्वैरङ्गैः सह सङ्गता यूयं स्वर्गेऽस्मिन् सुखहेतुके मे शरीरे मादयध्वं मां प्रसादयत ॥ ६४॥

भाषार्थ—(यदग्निर्वः पितृलोकं गमयन्) हे प्राणो ! जिससे कि वैश्वानर अग्नि देहके प्रति तुमको पहुँचाती हुई (एकमङ्गमजहात्) एक भी अङ्गको छोड़ देवे तो (तद्व एतत् पुनराप्याययामि) मैं जीवात्मा अपनी इच्छाशक्तिसे तुम्हारे उस अङ्गको पूर्ण कर दूंगा (पितरः साङ्गाः स्वर्गे मादयध्वम्) अतः हे प्राणो ! तुम सभी अङ्गोंके साथ सङ्गत हुए सुख निमित्त शरीरमें मुझको स्वस्थ रक्खो ॥ ६४ ॥

शिक्षा—शरीरकी वैश्वानर अग्नि प्राणोंको अङ्ग २ में पहुँचाती है, कदाचित् किसी अङ्गमें प्राणक्रियाकी न्यूनतासे अस्वस्थता प्रतीत हो तो फिर उसको चिकित्सा आदिसे स्वस्थ बनाना चाहिये, मनुष्य तभी तक स्वस्थ कुशल और प्रसन्न रह सकते हैं जब तक प्राण अङ्ग २ में विद्यमान होकर काम करते रहते हैं ॥६४॥

अभूद्व दूतः प्रहितो जातवेदाः सायं न्यह्न उपवन्द्यो नृभिः ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥६५॥

(जातवेदाः प्रहितो दूतोऽभूत्) जातवेदा वैश्वानरो जाठराग्निः प्रहितः शरीरे प्रधृतः सन् दूतो दूत इवान्नरसादीनां प्रेषकोऽभूत् (सायं न्यह्ने नृभिः स्वधयोपवन्द्यः) स जाठराग्निः सायं सायन्तने न्यह्नेऽह्नः प्रकाशीभावादनन्तरमुपमध्याह्ने नृभिर्जनैः स्वधयाऽन्नेनान्नभोजनेनान्नखादनेनोपवन्द्यः सेव्यः। उक्तञ्चान्यत्रापि धर्मग्रन्थे "कालयोर्भोजनम्" (आपस्तम्बीयधर्मं० २।१।१।२) "स्वधान्ननाम" (नि० २।७ (देव प्रयता हवींषि त्वमद्धि) हे अग्निदेव ! प्रयतानि दत्तानि हवींषि-अत्तुं भक्षयितुं योग्यानि वस्तूनि। 'हु धातुरत्र-अदनार्थः' अद्धि भक्षय। पुनः (पितृभ्यः

प्रादा:) पूर्वोक्तप्राणेभ्यो रसरूपं सारपदार्थं प्रदानं कुरु । यतः (ते अक्षन्) ते प्राणाः तं रसं भक्षयन्तु भक्षयन्ति वा ॥ ६५ ॥

भाषार्थ—(जातवेदा: प्रहितो दूतोभूत्) पूर्वोक्त वैश्वानर जाठराग्नि शरीरके अन्दर स्थित हुई अन्न रसको प्राणादिकोंके प्रति दूतके समान तत् २ स्थान पर पहुँचाने वाली है (सायं न्यह्ने) सायं और मध्याह्नमें (नृभिः स्वधयोपवन्द्यः) अन्न भोजनसे मनुष्योंको उसका सेवन करना चाहिये अर्थात् जाठराग्निकी स्थिरता भोजन खानेसे होती है (देव प्रयत हवींषि त्वमद्धि) हे अग्निदेव ! तू खाने की वस्तुका भक्षणकर अर्थात् पचा । पुनः (पितृभ्यः प्रादाः) प्राणोंके लिये उस भोजनका रस बनाकर दे । जिससे (ते अक्षन्) प्राण उसको खा सकें अर्थात् रससे रक्तादि परिणाम कर सकें ॥ ६५ ॥

शिक्षा—शरीरके अन्दर जाठराग्नि दूतका काम करती है क्योंकि रस आदि वस्तुओंको अङ्ग २ में पहुँचाती है । अत एव सायं और मन्याह्न उस अग्निकी दीप्तिके लिये मनुष्योंको उत्तम २ भोजन करने चाहिएं भोजनका पचकर जब रस बन जाता है तो उस रसको अग्नि प्राणोंके प्रति पहुँचा देती है । उस रसको वे प्राण पूर्वमंत्रके अनुसार सूक्ष्म मार्गों से रक्ताशयोंकी ओर ले जाते हैं ॥ ६५ ॥

असौ हा इह ते मनः ककुत्सलमिव जामयः ।
अभ्येनं भूम ऊर्णुहि ॥ ६६ ॥

(जामयः ककुत्सलमिव) जामय उदकानि नद्यः "जामिरुदकनाम" (नि० १।१२) ककुत्सलमिव यथा ककुत्सलं समुद्रम् । 'ककुदि सलं सलिलं यस्य स समुद्रः ।अत्र लिलोपश्छान्दसः' अभिगच्छन्ति पूर्वमन्त्रोक्ता रसनाड्यो रक्तनाड्यो वा प्राणप्रेरिता रक्ताशयं हृदयमभिगच्छन्ति (इह ते मनो है भूमे असावेनमभ्यूर्णुहि) अत्र रक्ताशये हृत्कमले ते मनो मननसामर्थ्यं चेतनत्वमस्ति तस्माद् हे भूमे बहुशक्ते जीवात्मन् ! एनं हृदयमभ्यूर्णुहि-अभिस्वीकुरु ॥ ६६ ॥

भाषार्थ—(जामयः ककुत्सलमिव) नदियां जिस प्रकार समुद्रको जाती हैं एवं पूर्वमन्त्रोक्त रसनाड़ियां तथा रक्तनाड़ियां प्राणोंसे प्रेरित हुई रक्तके आधारभूत हृदय कमलकी ओर जाती हैं (इह ते मनो है भूमे असावेनमभ्यूर्णुहि) इसी रक्ताधार हृदयकमलमें तेरी चेतनशक्ति स्थिर है अतः हे बहु-विधशक्तिवाले जीवात्मन् ! तू इस हृदयदेशको स्वीकार कर ॥ ६६ ॥

शिक्षा—रक्त वाहिनी नाड़ियां रक्ताधार हृदयकी ओर रस और रक्तको

बहाती हुई चली जाती हैं। जैसे नदियां जलको बहाती हुई समुद्रमें फेंकती हैं। एवं उस रक्ताधार हृदयकमलके अन्दर जीवकी चेतनता स्थिर है अतएव जीवका संयोजन हृदयदेशमें हुआ है ॥ ६६ ॥

शुम्भन्तां लोकाः पितृषदनाः पितृषदने त्वा लोक आ सादयामि ॥६७॥

(पितृषदना लोकाः शुम्भन्ताम्) पितृषदनाः पितॄणां प्राणानां सदनं येषु ते पितृषदना लोकाः प्राणकोशा गुदोपस्थनाभिहृदयकण्ठभ्रुकुटीब्रह्मरन्ध्ररूपाः सुषुम्नागताः सप्तप्राणाशयाः। यथा मुण्डके। "सप्तेमे लोका येषु चरन्ति प्राणाः" (मुण्डको० २।१।८) शुम्भन्तां शोभन्ताम्। अतः (पितृषदने लोके त्वा आसादयामि) तेषां मध्ये प्रत्येकस्मिन् प्राणस्थाने हे मनश्चेतने! त्वामासादयाम्यास्थापयामि ॥ ६७ ॥

भाषार्थ—(पितृषदना लोकाः शुम्भन्ताम्) गुदा, उपस्थ, नाभि, हृदय, कण्ठ, भ्रुकुटी और ब्रह्मरन्ध्र सुषुम्नागत प्राणकोश शरीरके अन्दर भली प्रकार अपना २ काम कर सकें इसलिए (पितृषदने लोके त्वा आसादयामि) उनमें प्रत्येक प्राणाशय या प्राणकोशके अन्दर हे चितिशक्ति! तुझे स्थिर करता हूँ ॥ ६७ ॥

शिक्षा—हृदयसे चेतनाशक्तिका प्रसार होकर प्राणाशयोंको तरफ जाता है जिससे वे अपना २ काम अच्छी तरह कर सकें ॥ ६७ ॥

येऽस्माकं पितरस्तेषां बर्हिरसि ॥ ६८ ॥

(अस्माकं ये पितरस्तेषां बर्हिरसि) यतः। अस्माकं ये पितरः प्राणास्तेषां त्वं हे मनश्चितिशक्ते! बर्हिर्बर्हणमुद्यामकं पदमाश्रयणमायतनमसि। 'बृहू उद्यमने' "बर्हिरितिपदनाम" (नि० ५। २) ॥ ६८ ॥

भाषार्थ—(अस्माकं ये पितरः) हमारे जो शरीरके अन्दर प्राण हैं (तेषां बर्हिरसि) हे चेतना! तू उनको उत्तेजन करने वाली तथा आश्रयरूप है ॥ ६८ ॥

शिक्षा—जीव की चेतनाके अधीन शरीरके अन्दर प्राणों का व्यापार होता है ॥ ६८ ॥

इस मंत्र से जीव की गर्भ से लेकर भावनाओं और सामान्य कर्तव्यों का वर्णन है:—

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अधा वयमादित्य व्रते तवानागसो अदितये स्याम ॥६९॥

(वरुणास्मदुत्तमं पाशमुच्छ्रथाय) वरुण हे जन्माधिष्ठातृदेव! अस्मत्तः

उत्तममुपरिष्टात्पाशं गर्भबन्धनमुच्छ्रथायोद्गमय (मध्यमं वि-) मध्यमं गर्भमध्यान्तगतं पाशं विश्रथाय विगमय (अधममव-) अधमं नीचैर्गतं पाशमवश्रथायावगमय "छन्दसि शायजपि" (अष्टा० ३ । १ । ८४) (अधादित्य वयं तव व्रतेऽनागसोऽदितये स्याम) अधानन्तरं हे आदित्य ! अदितेरखण्डनीयसुखस्य मोक्षाख्यस्य स्वामिन् परमात्मदेव ! वयं तव व्रते नियमेऽनागसः स्वस्था निष्पापाः सन्तोऽदितयेऽखण्डनीयसुखस्वरूपायै मुक्तये स्याम भवेम ॥ ६९ ॥

भाषार्थ—(वरुणास्मत्) हे जन्मदाता जगदीश देव ! मुझ से (उत्तमं पाशम्) ऊपर वाले गर्भके बन्धनको (उच्छ्रथाय) ऊपरसे हटा दे (मध्यमं वि-) गर्भके मध्यवर्ती बन्धनको ढीला कर दे (अधममव-) गर्भके नीचे वाले बन्धन को नीचे गिरा दे (अधादित्य) इसके अनन्तर हे मुक्ति के स्वामिन् (वयं तव व्रते) मैं तेरे नियमके अन्दर (अनागसः) निष्पाप होकर (अदितये स्याम) मुक्तिके लिये योग्य हो सकूं ॥ ६९ ॥

शिक्षा—गर्भ के अन्दर जीव जब सब इन्द्रियों और अन्तःकरण आदिसे व्यक्तिभावको प्राप्त हो जाता है तब गर्भसे बाहर आना चाहता है और गर्भके अन्दर ही उसकी यह भावना होती है कि हे परमात्म देव ! तू मेरे गर्भके ऊपर मध्य और नीचे के सभी बन्धनोंको हटा दे, मैं गर्भ से बाहर आ सकूं और तेरे नियममें रहता हुआ ऐसे शुभ कर्म करूं जिससे कि मुक्ति प्राप्त हो, पुनः इस गर्भबन्धन में न आ सकूं ॥ ६९ ॥

प्रास्मत् पाशान् वरुण मुञ्च सर्वान् यैः समामे बध्यते यैर्व्यामे ।
अधा जीवेम शरदः शतानि त्वया राजन् गुपिता रक्षमाणाः ॥ ७० ॥

(वरुणास्मत् सर्वान् पाशान् प्रमुञ्च) हे वरुण ! अस्मत् सर्वानपि पाशान् प्रमुञ्च पृथक्कुरु (यैः समामे व्यामे बध्यते) यैः पाशैः समामे समसूत्रे व्यामे विरुद्धसूत्रे गर्भे जीवो बध्यते (अधा राजन् त्वया गुपिता रक्षमाणाः शरदः शतानि जीवेम) अधानन्तरं हे राजन् ! त्वया गुपिता रक्षिता रक्षमाणा रक्ष्यमाणाश्च । 'छान्दसो यगभावः' । शतवर्षाणि जीवेम ॥ ७० ॥

भाषार्थ—(वरुणास्मत्सर्वान् पाशान् प्रमुञ्च) हे वरुण मुझसे सभी पाशोंको पृथक् करदे (यैः समामे व्यामे बध्यते) जिनसे समसूत्र और विरुद्ध सूत्रमें जीव बंधता है (अधा राजन् त्वया गुपिता रक्षमाणाः) अनन्तर हे सर्वत्र प्रकाशमान जगदीश्वर तुझ से रक्षित हुआ और भविष्यमें रक्ष्यमाण होकर (शरदः शतानि जीवेम) सौ वर्ष तक संसारमें जी सकूं जो कि मनुष्यको पूर्णायु है ॥ ७० ॥

शिक्षा—जीव गर्भके बाहर सब प्रकारके बन्धनोंसे छूटकर आता है जो बन्धन उसको समसूत्र और विरुद्ध सूत्रमें बांधते थे । पुनः ईश्वरीय नियमोंमें ठीक ठीक वर्तमान होकर जीव मानवीयपूर्णायुको प्राप्त होता है ॥ ७० ॥

अग्नये कव्यवाहनाय स्वधा नमः ॥ ७१ ॥

(कव्यवाहनायाग्नये स्वधा नमः) कव्यवाहनायान्नवोढ्रेऽग्नये जठराग्नये नमोऽन्नमदनीयं वस्तु स्वधोपहारः ॥ ७१ ॥

भाषार्थ—(कव्यवाहनायाग्नये स्वधा नमः) अन्नादि पदार्थोंका वहन करने वाली जठराग्नि के लिये अदनीय भोजन उपहार हो ॥ ७१ ॥

शिक्षा—जीव गर्भसे बाहर आकर जठराग्निको अनुभव करता है ॥७१॥

सोमाय पितृमते स्वधा नमः ॥ ७२ ॥

(पितृमते सोमाय स्वधा नमः) पितृमते प्राणवते प्राणनिमित्ताय सोमाय रसाय नमोऽन्नं स्वधोपहारः ॥ ७२ ॥

भाषार्थ—(पितृमते सोमाय स्वधा नमः) प्राणसम्पादक रसके लिए उपहार हो ॥ ७२ ॥

शिक्षा—जाठराग्निके अनुभव होनेपर बालक दुग्धपानकी ओर प्रवृत्त होता है ॥ ७२ ॥

पितृभ्यः सोमवद्भ्यः स्वधा नमः ॥ ७३ ॥

(सोमवद्भ्यः पितृभ्यो नमः स्वधा) सोमा रसा येष्वधिष्ठिताः सन्ति तेभ्यः पितृभ्यः प्राणेभ्यो रसाभिभावकेभ्यो नमोऽन्नं स्वधोपहारः ॥ ७३ ॥

भाषार्थ—(सोमवद्भ्यः पितृभ्यो नमः स्वधा) रस प्रेरक प्राणोंके लिये उपहार हो ॥ ७३ ॥

शिक्षा—दुग्धपानके अनन्तर प्राण-शक्तिका विशेष संचार होता है ॥ ७३ ॥

यमाय पितृमते स्वधा नमः ॥ ७४ ॥

(पितृमते यमाय नमः स्वधा) प्राणाधिष्ठात्रे यमाय यमनशीलाय जीवनकालाय नमोऽन्नमदनीयं वस्तु ॥ ७४ ॥

भाषार्थ—(पितृमते यमाय स्वधा नमः) प्राणोंके अधिष्ठानरूप जीवनकालके लिये अदनीय वस्तु उपहार हो ॥ ७४ ॥

शिक्षा—जैसे २ प्राणशक्ति बढ़ती जाती है वैसे २ बालक जीवनकालको प्राप्त होता है, अर्थात् बड़ा होता है ॥ ७४ ॥

एतत् ते प्रततामह स्वधा ये च त्वामनु ॥ ७५ ॥

(प्रततामहैतत्ते स्वधा ये च त्वामनु) प्रततामह हे प्रपितामह ! एतदेव नमः, तुभ्यं स्वधोपहारो ये च त्वामनुगताः सन्ति तेभ्यश्चेत्यपि ॥७५॥

भाषार्थ—(प्रततामहैतत्ते स्वधा ये च त्वामनु) हे प्रपितामह ! यह अन्न और उपहार तेरे लिए हो और जो तेरे जैसे या तेरे पीछे हों उनके लिये भी ॥७५॥

शिक्षा—बालक जब अपने जीवनकालमें आगे बढ़ते हैं कुछ वर्षोंके हो जाते हैं तो उनका सबसे प्रथम सेवादिका कर्त्तव्य अतिवृद्ध प्रपितामहके लिए हो जाता है क्योंकि कुलके अन्दर प्रपितामह जैसे वृद्धपुरुषको छोड़कर सेवाका पात्र दूसरा कोई नहीं होता । उसके जीनेके भी थोड़े दिन ही शेष रहते हैं, एवं प्रपितामह की सेवाका अवसर न खोना चाहिए । वस्तुतः प्रपितामहको नवजात बालकसे अधिक प्रेम और उसके बहलाने आदि में रुचि भी होती है । अतः इस पुण्य प्रेमके प्रतिकार में उसकी सेवा या प्रेमोपहार बालककी ओरसे होना आवश्यक है । उस महा-नुभावकी सेवा में उपस्थित होकर बालकको उसके अनुकूल अन्नपान और व्यवहार आदिसे सेवा करनी चाहिए ॥७५॥

एतत् ते ततामह स्वधा ये च त्वामनु ॥ ७६ ॥

(ततामहैतत्ते स्वधा ये च त्वामनु) ततामह हे पितामह ! एतदेवान्नं तुभ्यं स्वधोपहारो ये च त्वामनु त्वदनुगताः सन्ति ॥ ७६ ॥

भाषार्थ—(ततामहैतत्ते स्वधा ये च त्वामनु) हे पितामह ! यह अन्न और उपहार तेरे लिये हों और जो तेरे अनुगत हों उनके लिये भी ॥ ७६ ॥

शिक्षा—प्रपितामहके अनन्तर पितामहकी सेवाका अवसर है, क्योंकि प्रपि-तामहसे नीचे वृद्धसंख्यामें पितामह है अतः उसकी भी पूर्वोक्त अन्नपान और अन्य व्यवहारों द्वारा सेवा करना आवश्यक है ॥ ७६ ॥

एतत् ते तत स्वधा ॥ ७७ ॥

(तत एतत्ते स्वधा) तत हे पितः ! एतदेवान्नं तुभ्यं स्वधोपहारश्चास्तु ॥७७॥

भाषार्थ—(तत एतत्ते स्वधा) हे पिता ! यह अन्न और उपहार तेरे लिये है ॥ ७७ ॥

शिक्षा—पितामहके पश्चात् पिताकी सेवाका अवसर है इसलिये सन्तानोंका कर्त्तव्य पिताकी सेवा करनेका भी आवश्यक है ॥ ७७ ॥

स्वधा पितृभ्यः पृथिविषद्भ्यः ॥ ७८ ॥

(पृथिविषद्भ्यः पितृभ्यः स्वधा) पृथिविषद्भ्यो ये पृथिवीं गार्हपत्यं सीदन्ति गृहकर्मणा कर्त्तव्यकर्मणा वा प्राप्नुवन्ति तेभ्यो गार्हपत्यसद्भ्यो गृहस्थ-पितृभ्यः कुटुम्बस्थेभ्यो वा स्वधा यथासामर्थ्यं सत्कारोऽस्तु । "यद् गार्हपत्यमुपतिष्ठते पृथिवीं तद् उपतिष्ठते" (श० २ । ३ । ४ । ६) "गृहा वै गार्हपत्यः" (श० १ । १ । १ । ११) "कर्मेति गार्हपत्यः" (जै० ४ । २६ । १५) ॥ ७८ ॥

(पूर्व्यासः कवय ऋतावानः पितरो देवानां सधमादा आसन्) ये हि पूर्व्यासः प्राचीनाः कवयो बुद्धिमन्त ऋतं ज्ञानमनुतिष्ठन्तः पितरः पालकजना देवानां ब्रह्मविदां सधमादाः सहमादो मदनं ज्ञानं गतिर्वा येषां त एवं सधमादाः सहयोगिन आसन् (त इत् सत्यमन्त्रा गूढं ज्योतिरन्वविन्दन्—उषासमजनयन्) ते हि पितरः सत्यमन्त्राः सत्यज्ञानवन्तः सन्तो गूढं ज्योतिरन्तर्हितं ब्रह्मज्योतिरन्वविन्दन् प्राप्तवन्तोऽत एवोषासमात्मदीप्तिमजनयन् प्रकाशितवन्तः ।

भाषार्थ—(पूर्व्यासः कवय ऋतवानः पितरो देवानां सधमामादा आसन्) जोकि प्राचीन बुद्धिमान ज्ञानका अनुष्ठान करते हुए पालकजन ब्रह्मवेत्ताओंके सहयोगी हुए हैं (त इत् सत्यमन्त्रा गूढं ज्योतिरन्वविन्दन्नुषासमजनयन्) वे ही

सत्य ज्ञान वाले होकर अन्तर्हित ब्रह्मरूप ज्योतिको प्राप्त हुए हैं अत एव उन्होंने अपनी आत्मदीप्तिको प्रकाशित किया है ॥

शिक्षा—विद्याप्रेमी बुद्धिमान् सर्वहितैषी विद्वान् जन ही अन्तर्यामी परमात्मदेवका साक्षात्कार करके अपनी आत्मशक्तिका विकास करते हैं ॥

इस मन्त्रमें पितर शब्द सर्वहितैषी, ज्ञानी पालक जनोंके अर्थमें आया है और इनका कार्य विद्याध्यन और ब्रह्मसङ्गतिसे आत्मविकास करना है ॥

अरायान् ब्रूमो रक्षांसि सर्पान् पुण्यजनान् पितॄन् ।
मृत्यूनेकशतं ब्रूमस्ते नो मुञ्चन्त्वंहसः ॥ अथ० ११ । ६ । १६ ॥

(अरायान् रक्षांसि सर्पान् पुण्यजनान् पितॄनेकशतं मृत्यून् ब्रूमः) अरायान् वञ्चकान् साहसिकान् रक्षांसि रोगोत्पादककृमीन् सर्पान् विषमयजन्तून् पुण्यजनान् पितॄन् कुशलान् सैनिकानेकशतं मृत्यून् मारणोपायान् ब्रूमः (ते नोऽहसो मुञ्चन्तु) ते नोऽस्मानंहसः पापान्मुञ्चन्तु पृथक्कुर्वन्तु ॥

भाषार्थ—(अरायान्) वञ्चकों (रक्षांसि) रोगोत्पादक कृमियों (सर्पान्) विषमयजन्तुओं (पुण्य जनान् पितॄन्) कुशल सैनिकजनों (एकशतं मृत्यून्) एक सौ एक मारणोपायोंको (ब्रूमः) कहते हैं (ते नोऽहंसो मुञ्चन्तु) वे ये हमें पापसे पृथक् करें ॥

शिक्षा—संसारमें मनुष्योंको जो लुटेरों-डाकुओं, रोगोत्पादक कीड़ों, विषमयजन्तुओं, युद्धमें कुशल सैनिकों और १०१ विषादि द्वारा मृत्यु उपायोंसे जो कष्ट मिलते हैं वे सब पापके फल हैं ॥

इस मन्त्रमें शत्रुओंका हनन करने वाले सैनिकोंके अर्थमें पितर शब्द आया है। इनका कार्य पाप करने वालेको परास्त करने या मृत्युदण्ड देकर पापका फल भुगानेका है ॥

गन्धर्वाप्सरसः सर्पान् देवान् पुण्यजनान् पितॄन् ।
दृष्टानदृष्टानिष्णामि यथा सेनाममूं हनन् ॥ अथ० ८ । ८ । १५ ॥

(गन्धर्वाप्सरसः सर्पान् देवान् पुण्यजनान् पितॄन दृष्टानदृष्टानिष्णामि) युद्धप्रकरणे पठितो मन्त्र एष तस्मादत्र गन्धर्वादिभिर्युद्धोपकरणैर्भवितव्यम् । अत एवात्र पितृशब्दो न मृतजनार्थः । अर्थवस्तुत्वञ्चैवं यत्—उपद्रवकारिणो गन्धवतो वातान् तथैवोपद्रवकारिणस्तेजोरूपवतः कैश्चित्प्रकारैरुत्पादितान् सूर्यरश्मीन् "प्रजा-

पतिरुपद्रवं गन्धर्वाप्सरोभ्यः प्रायच्छत्" (जै० उ० १ । १२ । १) "अथो गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्चरन्ति" (श० ६ । ४ । १ । ४) "वातो गन्धर्वः (श० ६ । ४ । १ । ४०) "तस्य सूर्यस्य मरीचयोऽप्सरसः" (श० ६ । ४ । १ । ८) सर्पान् प्रसिद्धान् सर्पणशीलान् विषमयान् जन्तून् देवानग्न्यादीन् पुण्यजनान् कुशलान् पितॄन् सैनिकान् । 'मुख्यशब्दार्थसमन्वये द्रष्टव्या पितृसंख्या ११' एवं दृष्टान् प्रसिद्धान् शस्त्रादियुक्तान् अदृष्टान् गुप्तानस्त्रादियुक्तान् इष्णाम्यहं राजा युद्धक्षेत्रे प्रेरयामि (यथाऽमूं सेनां हनन्) एवं प्रेरयामि यथामूं सेनां विपक्षां शत्रुसेनां हनन् हन्यासुः । लिङर्थे लेट ॥

भाषार्थ—(गन्धर्वाप्सरसः) विषगन्धि हवाओं और जलानेवाली सूर्य-किरणोंको (सर्पान्) तीव्र विषवाले जन्तुओंको (देवान्) अग्नि आदि युद्धोपयोगी पदार्थों को (पुण्यजनान् पितॄन्) कुशल सैनिक जनोंको (दृष्टान्) प्रसिद्ध शस्त्रादि युक्तोंको (अदृष्टान्) गुप्त अस्त्रादि युक्तोंको (इष्णामि) मैं राजा युद्ध क्षेत्रमें प्रेरित करता हूँ (यथा अमूं सेनां हनन्) जिससे कि शत्रुसेनाको हनन कर डालें ॥

शिक्षा—राजाको युद्धक्षेत्रमें लड़नेके लिये शत्रुसेनाका पराजय जिस प्रकार हो ऐसे विषगन्धिहवा, यन्त्र द्वारा जलादेनेवाली तीक्ष्ण सूर्यरश्मियों और विषमयजन्तुओं के योग तथा अच्छे २ वीर सैनिकोंसे काम लेना चाहिये जो कि शस्त्र और अस्त्र साधनोंसे युक्त हों ॥

इस मन्त्रमें पितरशब्द सैनिकजनोंके अर्थमें प्रयुक्त है। क्योंकि यह सङ्ग्रामप्रकरणका मन्त्र है इसमें सभी साधन सङ्ग्रामके उपयोगी हैं और (सैनिक-रूप) पितरोंका कार्य यहां शत्रु सेना का हनन करना है ॥

वनस्पतीन् वानस्पत्यानोषधीरुत वीरुधः ।
गन्धर्वाप्सरसः सर्पान् देवान् पुण्यजनान् पितॄन् ।
सर्वांस्ताँ अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्रदर्शय ॥

अथ० ११ । ९ । २४

(वनस्पतीन् वानस्पत्यानोषधीरुत वीरुधः) युद्धोपयुक्तान् विषमयान् वनस्पतीन् फलवतो वृक्षान् वानस्पत्यान् पुष्पफलवतस्तरून् ओषधीः फलकान्तान् तरुकानुत वीरुधः प्रतानानि "फलैर्वनस्पतिः पुष्पैर्वानस्पत्यः फलैरपि । ओषधयः फलपाकान्ताः प्रतानैर्वीरुधः स्मृताः" (चरक० सूत्र० १ । ७१) (गन्धर्वाप्सरसः सर्पान् देवान् पुण्यजनान् पितॄन् सर्वांस्तान्) पूर्वमन्त्रवदुपद्रवकारिणो गन्धवतो वातानुपद्रव-

कारिणस्तीक्ष्णरूपवतो दाहकरश्मीन् विषजन्तून् अग्न्यादीन् युद्धकुशलसैनिकान् सर्वान् तान् (अर्बुदे त्वममित्रेभ्यो दृशे कुरु) 'अर्व हिंसायां तत औणादिक उः प्रत्ययः' । अर्बून् हिंसकान् द्यति खण्डयतीत्यर्बुदिर्वीरो राजा अर्बुदे हे वीर राजन् ! त्वममित्रेभ्यः शत्रुभ्यो दृशे व्यक्तीभावं कुरु (उदारांश्च प्रदर्शय) अथोदारांश्च युद्धे-उन्नतान् प्रवृत्तांश्च प्रदर्शय भावय । 'अत्र मन्त्रे वनस्पत्याद्युद्भिज्जविषजन्तुवाता-ग्न्यादीनां पदार्थानां कश्चिदस्त्रयोगो लक्ष्यते ।' उक्तं यथा कौटिल्यार्थशास्त्रे—"चित्रभेककौण्डिन्यकक्रकणपञ्चकुष्ठशतपदीचूर्णमुच्चिदिङ्गकम्बलिशतकन्देध्मकृकलासचूर्णं गृहगोलिकान्धाहिकक्रकणकपूतिकीटगोमारिकाचूर्णं भल्लातकावल्गुकारसयुक्तं सद्यः प्राणहरमेतेषां वा धूमः ।" कौटिल्यार्थशास्त्रे (अ० १४६) ॥

भाषार्थ—(वनस्पतीन् वानस्पत्यानोषधीरुत वीरुधः) युद्धोपयोगी विषमय फलवाले वृक्ष, फूलफल वाले पौदे, फलपाकान्त ओषधि और फैलने वाली बेलोंको (गन्धर्वाप्सरसः सर्पान् देवान् पुण्यजनान् पितॄन् सर्वांस्तान्) पूर्वमन्त्रके अनुसार उपद्रवकारी विषगन्धि हवाओं, दाहकसूर्यरश्मियों, विषैले जन्तुओं, अग्न्यादि पदार्थों और कुशल सैनिक जनोंको इस प्रकार सभी युद्ध साधनोंको (अर्बुदे त्वम-मित्रेभ्यो दृशे कुरु) हे वीर राजा ! तू शत्रुओंके लिये तय्यार कर (उदारांश्च प्रदर्शय) और उनको युद्धमें उन्नत अर्थात् कार्यसाधक रूपमें छोड़ ॥

शिक्षा—वीर राजाको चाहिये कि युद्धविजयके लिए नाना प्रकारकी प्रभावशाली विषमयी वनस्पतियों और विषैले जन्तुओंके योग तय्यार करे तथा कुशल सैनिकों द्वारा विजय प्राप्त करे ॥

इस मन्त्रमें पूर्व मन्त्रके तुल्य सैनिक जनोंके अर्थमें पितर शब्द आया है यहां पितरों (सैनिकों) का कार्य शत्रुओंके साथ युद्ध करना है ॥

विशेष—इस मन्त्रमें "वानस्पत्यान्" शब्द आया है । सायण तथा स्वाध्याय मण्डलके विद्वान्ने वनस्पतिओंसे उत्पन्न पदार्थों का अर्थ किया है जो ठीक नहीं है । क्योंकि मूलमन्त्र में वानस्पत्यके सहयोगी वनस्पति ओषधि और वीरुध शब्द आए हैं । जो भूमिसे स्वतन्त्र उत्पन्न हुए पदार्थ हैं । तथा चरक आयुर्वैदिक ग्रन्थमें उक्त चारों वस्तुएं एक ही श्लोकमें लक्षण सहित पढ़ी हैं । अतः इस मन्त्रमें इन चारों वस्तुओंका स्वरूप वही है जो चरकमें वर्णित है ।

२—विदित हो कि जो विद्वान् वैदिक शब्दोंके अर्थकरनेंमें स्वरका इस प्रकार आग्रह करते हैं कि वेदोंमें स्वरव्यत्यय न माना जाय केवल यथास्वं स्वरके

अनुसार ही अर्थ करना चाहिये। यह इस प्रकार उनका आग्रह उचित नहीं है। क्योंकि यथावत् अर्थ करनेके लिए जैसे व्याकरणके सभी नियमोंमें यथावसर व्यत्यय होजाता है। एवं स्वरशास्त्र भी व्याकरणान्तर्गत होनेसे व्यत्ययका पात्र है। महर्षि पाणिनि और महाभाष्यकार पतञ्जलि मुनिने स्वरव्यत्ययकी स्थापनाकी है। प्रातिशाख्य ग्रन्थों में भी स्वरव्यत्यय को माना है। निरुक्तकार श्री यास्क मुनिने भी वस्तुतः अर्थ निरीक्षणमें प्रकरणविद्याको प्रधान माना है। स्थान २ पर स्वरकी तरफ ध्यान न देकर निर्वचन किया है। जैसे 'मेहना' एक पदमें 'म इह न' बहु पदमें। एवं इस प्रस्तुत मन्त्रमें "वानस्पत्यान्" शब्द अन्तोदात्त है। यदि स्वर प्रक्रियाको सर्वथा प्रधान मानकर अर्थ करें तो "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" (अष्टा० ४।१।८५) से विकारादि अर्थ करना पड़ेगा। क्योंकि इस सूत्रसे पत्यन्त वनस्पति मूलशब्द से 'ण्य' प्रत्यय होकर प्रत्ययस्वरसे वानस्पत्य पद अन्तोदात्त है, किन्तु प्रकरणविद्याकी दृष्टिसे जो कि चरक श्लोक और मूल मंत्रके द्वारा दर्शाया गया है उसके विरुद्ध पड़ेगा। क्योंकि स्वरको प्रधानता से विकारादि ही अर्थ करना पड़ेगा। किन्तु यहां इस स्वरदृष्टिकी उपेक्षा करना ही यथावत् अर्थका कारण है। एवं अन्यत्र भी विद्यासम्बन्धी अर्थों में उपस्थित स्वर का तिरस्कार और स्वर-व्यत्ययका स्वीकार आवश्यकीय है॥

पुन र्नः पितरो मनो ददातु दैव्यो जनः।
जीवं व्रातं सचेमहि॥ १०।५७।५, यजु० अ० ३।५५

(पितरो दैव्यो जनः पुनर्नो मनो ददातु) पितरो हेऽन्नसुशिक्षाभ्यां पालकजनाः! दव्यो देवेषु विद्वत्सु जातो विद्वान्। "अत्र देवाद्यञञौ" (अ० ४।१।८५) इति वार्तिकेन प्राग्दीव्यतीयान्तर्गते जातेऽर्थे यञ् प्रत्ययः। जनो विद्यापरोपकाराभ्यां जनयति प्रकटयति स पुनर्नोऽस्मभ्यं मनो धारणावतीं बुद्धिं ददातु प्रयच्छतु (जीवं व्रातं सचेमहि) जीवं ज्ञानसाधनयुक्तं जनमथ च व्रातं व्रतसमूहं सचेमहि समवेयाम। इति दयानन्दः॥

भाषार्थ—(पितरो दैव्यो जनः पुनर्नो मनो ददातु) हे अन्न सुशिक्षासे पालक जनो! तुम विद्वान् विद्या और धर्मके परोपकारसे प्रकट करने वाली फिर हमारे लिये सुधारणावती बुद्धिको प्रदान करे (जीवं व्रातं सचेमहि) ज्ञान साधन युक्त पुरुषको और उसके व्रत समूहको हम प्राप्त हों॥

शिक्षा—विद्वानोंमें जो सबसे बड़ा विद्वान् हो उसका यह कर्तव्य है कि वह मनुष्योंके अन्दर उत्तम बुद्धिको उत्पन्न करे और पितर जनों को भी आवश्यक है कि वे उस विद्वान्की सेवा करते हुवे उसके उपदिष्ट आचरणोंका पालन करें॥

इस मंत्रमें पालक अर्थमें पितर शब्दका प्रयोग है और इनका कार्य विद्यादि के प्रचारसे मानवसमाजकी रक्षा करना है ॥

त्वेह यत् पितरश्चिन्न इन्द्र विश्वा वामा जरितारो असन्वन् ।
त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥

ऋ० ७ । १८ । १

(इन्द्र त्वे यन्नः पितरश्चिज्जरितारो विश्वा वामा असन्वन्) इन्द्र हे राजन् ! त्वयि यद्ये नोऽस्माकं पितरः पालयितारश्चिदपि जरितारः स्तावका विश्वा सर्वाणि वामा प्रशस्यान्यसन्वन् याचन्ते । यतः (त्वे ह सुदुघा गावस्त्वे ह्यश्वाः) त्वे त्वयि त्वत्पार्श्वे ह सुदुघाः सुष्ठुकामप्रपूरका गावस्त्वे त्वय्यश्वाः सन्ति (त्वं वनिष्ठो वसु देवयते) त्वं वनिष्ठोऽतिशयेन वनिता सम्भाजकः सन् वसु ददतीति शेषः । इति दयानन्दः ॥

भाषार्थ—(इन्द्र त्वे यन्नः पितरश्चिज्जरितारो विश्वा वामा असन्वन्) हे राजन् ! तेरे आश्रय जो हमारे पालन करने वाले तथा ईश्वरकी स्तुति करने वाले जन राष्ट्रके लिये प्रशंसनीय सुखोंकी याचना करते हैं (त्वेह सुदुघा गावस्त्वे ह्यश्वाः) क्योंकि तेरे अधीनही अच्छी गौवें और घोड़े हैं (त्वं वनिष्ठो वसुदेवयते) तू ही हे सेवनीय राजन् ! प्रजामें यथावश्यकता धन देता है ॥

शिक्षा—राष्ट्रके मुख्य प्रजानेता अपनी आवश्यकताओंको राष्ट्रपति अथवा राष्ट्रसभापतिको समझाकर उचित प्रबन्ध करावें ॥

इस मन्त्रमें प्रजापालक जनोंके अर्थमें पितर शब्द आया है जिनका कार्य प्रजाकी आवश्यकताओंको पूरा कराना है ॥

मनो न्वा हुवामहे नाराशंसेन सोमेन । पितॄणां च मन्मभिः ॥

ऋ० १० । ५७ । ३

मनो न्वा ह्वामहे नाराशंसेन स्तोमेन । पितॄणां च मन्मभिः ॥

यजुः अ० ३ । ५३

(नाराशंसेन स्तोमेन पितॄणां च मन्मभिर्मनो न्वाह्वामहे) नराणां समन्ताच्छंसः प्रशंसनं नराशंसः, नराशंसेन निर्वृत्तस्तेन स्तोमेन स्तुतियुक्तव्यवहारेण पितॄणां पालकानामृतूनां ज्ञानवतां मनुष्याणां वा चापि मन्मभिर्मननैर्ज्ञानैर्विचारैश्च "सर्वधातुभ्यो मनिन्" (उणा० ४ । १४८) मनो मननशीलं सङ्कल्पविकल्पात्मकं न्वाह्वामहे प्रस्पर्द्धामहे । इति दयानन्दः ॥

भाषार्थ—(नाराशंसेन स्तोमेन पितृणां च मन्मभिर्मनो न्वाह्वामहे) मनुष्यों के वास्तविक गुण विद्या कथन व्यवहारसे और ऋतुओंके तथा ज्ञानी मनुष्योंके रहस्य विचारोंसे सङ्कल्पविकल्पात्मक मनको उद्बोधित करते हैं ॥

शिक्षा—ऋतुविज्ञान और विद्वत्सङ्गतिसे मानसिक विकास करना चाहिये॥

इस मंत्रमें ऋतुओं तथा ज्ञानी जनोंके लिये पितर शब्दका प्रयोग है और इनका कार्य मानसिक विकास करना है ॥

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषो असत् ॥

यजुः अ० २ । ३३

(पितरो गर्भं पुष्करस्रजं कुमारमाधत्त) पितरो विद्यादिदानेन पालका ज्ञानिनो जना गर्भं गर्भमिव पुष्करस्रजं विद्याग्रहणाय पुष्पमालाधारिणं कुमारं ब्रह्मचारिणमाधत्त धारयत (यथेह पुरुषोऽसत्) यथेह यथाऽत्रायं कुमारः पुरुषो विद्यापुरुषार्थयुक्तो मनुष्योऽसद् भवेत् । इति दयानन्दः ॥

आध्यात्मिकदृष्ट्या तु—

(पितरः पुष्करस्रजं कुमारं गर्भमाधत्त) पितर ऋतवः प्राणा वा पुष्करस्रजं पुष्करं फुफ्फुससहितं हृदयकमलं सृजति धारयति तं कुमारं कुत्सितमारं नित्यस्वरूपं जीवात्मानं शिशुं वा गर्भं गर्भरूपं वाऽऽधत्त समन्ताद्धारयत (यथेह पुरुषोऽसत्) यथेह यथात्र पुरुषः पुरिशयः शरीरधारी पूर्णोऽसद् भवेत् ॥

भाषार्थ—(पितरो गर्भं पुष्करस्रजं कुमारमाधत्त) विद्यादानसे पालक ज्ञानी जनों ! गर्भके तुल्य विद्याग्रहण के लिये पुष्पमाला धारण किये हुए ब्रह्मचारीको धारण करो (यथेह पुरुषोऽसत्) जिससे इस संसारमें यह कुमार विद्यापुरुषार्थसे युक्त मनुष्य बन जावे ॥

आध्यात्मिक दृष्टि से—

(पितरः पुष्करस्रजं कुमारं गर्भमाधत्त) ऋतुएं या प्राण फुफ्फुससहित हृदय कमलको धारण करने वाले अविनाशी जीवात्मा या बालक को गर्भरूपमें भलीप्रकार धारण करते हैं (यथेह पुरुषोऽसत्) जिससे कि यहां यह शरीरधारी पूर्ण पुरुष बन सके ॥

शिक्षा—(१, २) इस मन्त्रमें श्लेषालङ्कारसे आदिभौतिक और आध्यात्मिक दृष्टिसे यह सिद्ध होता है कि मनुष्य के दो जन्म होते हैं एक योनिजन्म दूसरा विद्याजन्म । विद्याजन्ममें गुरुजन ब्रह्मचारी को विद्यायुक्त पुरुष बनाने के लिए धारण

करते हैं दूसरे योनिजन्म में ऋतुएं और प्राण जीवात्माको शिशुरूपसे गर्भमें धारण करते हैं।

इस मन्त्रमें गुरुजनों या ऋतुओं तथा प्राणोंके लिये पितर शब्द आया है। इनका कार्य ब्रह्मचारीको विद्याग्रहण करनेके लिये अपने पास रखना तथा जीवात्मा को शिशुरूपमें गर्भ धारण कराना है॥

विश्वामित्र वसिष्ठ जमदग्ने भरद्वाज गोतम वामदेव।
शर्दिर्नो अत्रिरग्रभीन्नमोभिः सुसंशासः पितरो मृडता नः॥

अथ० १८।३।१६

इस मंत्रमें प्राणोंके लिये पितर शब्द है। और वे विश्वामित्रादि नामसे श्रोत्रादिगत हैं। इनका कार्य शरीरको शासनमें रखते हुये स्वस्थ और सुखी बनाना है विवरणके लिए देखो सूक्त० अथ० १८।३।१६ (पृष्ठ १५६)

वर्चसा मां पितरः सोम्यासो अञ्जन्तु देवा मधुना घृतेन।
चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धन्तु॥

अथ० १८।३।१०

इस मंत्रमें ऋतुओंके लिये पितर शब्द आया है। और उनका कार्य शरीर कान्ति, प्राण और रक्त द्वारा रक्तोत्पत्तिसे प्राणियोंकी पुष्टता करना है। विवरणके लिए देखो सूक्त० अथ० १८।३।१० (पृष्ठ १५२)

पितरः परे ते मावन्तु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा॥

अथ० ५।२४।१५

(परे ते पितरो मावन्तु) परे, आगमिष्यन्तस्ते पितर ऋतवो मां रक्षन्तु। सूक्ते-इन्द्रचन्द्रादिभौतिकपदार्थप्रकरणादत्र मन्त्रे पितर ऋतवः सन्ति। ते चेमे (अस्मिन् ब्रह्मणि) अस्मिन् वेदाध्ययने (अस्मिन् कर्मणि) अस्मिन् कर्तव्यकर्मणि (अस्यां पुरोधायाम्) अत्र पूर्वनिश्चित्यां पूर्वसङ्कल्पे (अस्यां प्रतिष्ठायाम्) अत्र प्रतिष्ठाने सुनिश्चिते कृत्ये (अस्यां चित्याम्) अस्यां वेद्यां (अस्यामाकूत्याम्) आह्वानेऽत्र (अस्यामाशिषि) अत्राशीर्वृद्ध्यां (अस्यां देवहूतौ) अत्र विद्वन्निमन्त्रणे (स्वाहा) सुभाषणमेवेदमस्ति॥

भाषार्थ—(परे ते पितरो मावन्तु) आने वाली ऋतुएं मेरी रक्षा करें (अस्मिन् ब्रह्मणि) इस वेदाध्ययनमें (अस्मिन् कर्मणि) इस कर्तव्य कर्ममें (अस्यां पुरोधायाम्) इस पूर्वधारणामें (अस्यां प्रतिष्ठायाम्) इस सुनिश्चितिमें (अस्यां चित्याम्) इस वेदीमें (अस्यामाकूत्याम्) इस पुकारमें (अस्यामाशिषि) इस इच्छा वुद्धिमें (अस्यां देवहूतौ) इस विद्वानोंके निमंत्रणमें (स्वाहा) ये सम्यक् उक्तियां हैं ॥

शिक्षा—हमारे वेदाध्ययन, शारीरिक कर्म, संकल्प, निश्चय, होम, आह्वान इच्छा और विद्वानों तथा उत्तम गुणोंकी प्राप्ति ऋतुओंके अनुसार जीवनचर्या पर निर्भर है ॥

इस मंत्रमें पितर शब्दका अर्थ ऋतुएं हैं। यहां सूक्तमें इन्द्र चन्द्रादि भौतिक पदार्थोंका प्रकरण है। उनके साथ ऋतु अर्थ ही उपयुक्त है। उनका कार्य मानवीय आन्तरिक भावनाओं वाणीकी क्रियाओं और शारीरिककर्म पर प्रभाव डालना है॥

तमूषु समना गिरा पितॄणां च मन्मभिः ।
नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा।
मध्यमो नभन्तामन्यके समे ॥ ऋ० ८ । ४१ । २

(सिन्धूनामुपोदये य सप्तस्वसा मध्यमः) सिन्धूनां स्यन्दमानानामान्तरिक्ष्यापामपोदये वृष्टिरूपेऽपसरणे यः सप्तस्वसा सप्तविधविद्युद्गर्जनावान्। "वाताय कपिला विद्युदातपायातिलोहिनी०" (महाभाष्ये २।३।१३) इति चानुमानशास्त्रम्। मध्यमो मध्यमस्थानीयो वरुणो मेघकारणं वृष्टिप्रवर्तको देवोऽस्ति (तमूषु समना गिरा पितॄणां च मन्मभिर्नाभाकस्य प्रशस्तिभिः) तं वरुणं मेघकारणमवश्यं समना समानया वृष्ट्युपयोग्याहुतिपरिणामेन सह गिरा गीत्या मन्त्रोचारणरूपस्तवनेन मेघरागेणेत्यर्थः। पितॄणामृतूनामृतुसम्बन्धिनां मन्मभिर्मननीयैः स्तोमैर्यज्ञैः। "यदु ह किञ्च देवाः कुर्वते स्तोमेनैव तत्कुर्वते यज्ञो वै स्तोमो यज्ञेनैव तत्कुर्वते" (श० ८। ४। ३। २) नाभाकस्य नभकं मेघावृताकाशः" नभ्नाति व्याप्नोति मेघेन। नभ—अकः "पिनाकादयश्च" (उणा० ४। १५। इति शब्द कल्पद्रुमः) 'नभाति न प्रकाशत इति नभाकं मेघयुक्तमाकाशमिति दयानन्दस्तत्रैवोणादौ'। नभाकस्य मेघवृताकाशस्य शास्त्रं नाभाकम्। तस्येदमिति ताद्धितोऽण्। तस्य नभाकस्य मेघावृताकाशसम्पादननिमित्तशास्त्रस्य प्रशस्तिभिः प्रशंसनीयक्रियाभिरभिष्टौम्याह्वयाम्यनुतिष्ठामि वा (अन्यके समे नभन्ताम्) अन्यकेऽन्ये समे सर्वे विघ्नकारिणः पदार्था वा नभन्तां मा भुवन्। घनवृष्टिपातान्धकारेण न दृश्येरन् वेति वृष्टिपातनसिद्धान्तोऽत्र, तथा च निरुक्तम् "वरुणो वृणोतीति सतः।

तस्यैषा भवति—नीचीनवारं कबन्धं प्रससर्ज रोदसी अन्तरिक्षम् । तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥ नीचीनद्वारं कबन्धं मेघमित्येवं प्रकृत्य तस्यैषाऽपरा भवति—तमूषु··· तं स्वभिष्टौमि समानया गिरा गीत्या स्तुत्या पितॄणां च माननीयैः स्तोमैर्नाभाकस्य प्रशस्तिभिः (ऋषिर्नाभाको बभूव) यः स्यन्दमानानामासामपामपोदये सप्तस्वसारमेनमाह वाग्भिः स मध्यम इति निरुच्यते अथैष एव भवति नभन्तामन्यके समे । मा भुवन्नन्यके सर्वे ये नो द्विषन्ति दुर्धियः पापधियः पापसङ्कल्पाः (निरुक्त १० । ५) ॥

विशेष—"ऋषिर्नाभको बभूव" इति पाठो दुर्गाचार्य्यसम्मतः । कथंचिद् भवेदप्यृषीणामुपाधिवादेन शक्यो वर्णयितुं विशेषं तु वैदिकेतिहासप्रकरणे दर्शयिष्यामः ॥

भाषार्थ—(सिन्धूनामपोदये यः सप्तस्वसा मध्यमः) स्यन्दमान अन्तरिक्ष जलों के वृष्टिरूप अपसरणमें जो सात प्रकार की विद्युद्गर्जनावाला मेघका कारण वृष्टिप्रवर्तक देव है (तमूषु समना गिरा पितॄणां च मन्मभिर्नाभाकस्य प्रशस्तिभिः) उस मेघके कारणको अवश्य उचितनियम या वृष्ट्युपयोगीपरिमाणसे मन्त्रोच्चारणरूप गीति और ऋतुसम्बन्धी सिद्धान्तों तथा यज्ञों और मेघावृताकाश सम्पादननिमित्त-शास्त्रकी प्रशंसनीय क्रियाओंसे वृष्टिका आह्वान करता हूँ (अन्यके समे नभन्ताम्) अन्य सब विघ्नकारी पदार्थ न हों घने वृष्टिपातके अन्धकारसे न दिखलाई पड़ें । इस प्रकार मैं वृष्टिशास्त्रका जानने वाला विद्वान् वृष्टिको भूमि पर लाता हूँ ॥

शिक्षा—वृष्टिशास्त्रका जानने वाला विद्वान् आकाशकी जलधाराओं को मेघके रूपमें सम्पादन करके उचित परिमाणसे ऋतुके अनुकूल यज्ञ और मेघरागमें वृष्टिस्तोत्रोंके गानसे पृथिवी पर घन वृष्टिपात करे ॥

इस मन्त्रमें ऋतुओंके लिए पितर शब्द आया है । और उनका कार्य वृष्टिपातके लिये ऋतुसिद्धान्त और ऋतुक्रमका ज्ञान आवश्यक है ॥

इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु विश्वकर्मा त्वादित्यैरुत्तरतः पात्विदमहन्तप्तं वा बहिर्द्धा यज्ञान्निःसृजामि ॥ यजु० अ० ५।११ ॥

(इन्द्रघोषो वसुभिस्त्वा पुरस्तात्पातु) इन्द्रस्य विद्युतो घोषो विविध-शब्दार्थसम्बन्धो यस्य स इन्द्रघोषो वसुभिरग्न्यादिभिस्त्वा तां पुरस्तात्पूर्वस्मात्पातु रक्षतु (प्रचेता रुद्रैस्त्वा पश्चात्पातु) प्रचेताः प्रकृष्टसन्ताननिमित्तः प्रकृष्टज्ञानो वा रुद्रैः प्राणैः पश्चाद्रक्षतु (मनोजवाः पितृभिस्त्वा दक्षिणतः पातु) मनोवज्जवो यस्य

स पितृभिर्ज्ञानिभिर्ऋतुभिर्वा त्वा तां रक्षतु (विश्वकर्मादित्यैस्त्वोत्तरतः पातु) विश्वानि कर्माणि यस्य स आदित्यैर्मासैस्त्वा तामुत्तरतो रक्षतु (अहं यज्ञात् तप्तमिदं वा बहिर्द्धा निःसृजामि) अहं यज्ञाद् होमलक्षणादिदमन्तर्जलम् "इदं जलनाम" (नि० १।१२) वा बहिस्थं जलं बहिर्द्धा बाह्यदेशे निःसृजामि प्रक्षिपामि । इति दयानन्दः ॥

भाषार्थ—(इन्द्रघोषो वसुभिस्त्वा पुरस्तात् पातु) विद्युत् का घोष विविध शब्दार्थ सम्बन्ध जिसका है ऐसा वह अध्वर्युरूप सूर्य अग्नि आदि पदार्थोंके साथ पूर्वकी ओरसे रक्षा करे (प्रचेता रुद्रैस्त्वा पश्चात् पातु) उत्तम चेतावनीका निमित्त स्वयं सचेत हुआ होता रूप वरुण प्राणोंके द्वारा पश्चिमकी ओरसे रक्षा करे। (मनोजवः पितृभिस्त्वा दक्षिणतः पातु) मनके समान वेग वाला वायुरूप ब्रह्मा ऋतुओंके द्वारा दक्षिणसे रक्षा करे (विश्वकर्मा आदित्यैस्त्वोत्तरतः पातु) सब प्रकारके कर्म जिसके हों वह सोमरूप उद्गाता मासोंके द्वारा उत्तरकी ओरसे रक्षा करे (अहं यज्ञात्तप्तमिदं वा बहिर्द्धा निःसृजामि) मैं ईश्वर होमयज्ञसे तप्त हुये इस भीतरके जलको बाहर वाले जलमें बाहरकी ओर फेंकता हूँ ॥

शिक्षा—यज्ञके अनुष्ठानसे बिजलीके समान ध्वनि वाली वाणी या अध्वर्यु यजमानकी पूर्वदिशासे, सम्यक् चेतावनी देनेवाली वाणी या होता पश्चिमसे और मनके तुल्य वेगवाली वाणी या ब्रह्मा दक्षिणसे सत्रकर्मोंकी विधायक वाणी या उद्गाता उत्तरसे रक्षा करते हैं । एवं ईश्वर भी यज्ञसे उष्ण हुये जलको नीचे गिराता है॥

इस मन्त्रमें पितर शब्दका वसन्तादि ऋतु अर्थ है । वस्तुविज्ञानकी चर्चा इस मन्त्रमें है । अतः ऋतुक्रमविज्ञान सङ्गत है । इनका कार्य उत्पन्न होने वाले पदार्थों की रक्षाका है ॥

यत्ते अङ्गमतिहितं पराचैरपानः प्राणो य उ वा ते परेतः ।
तत्ते सङ्गत्य पितरः सनीडा घासाद्घासं पुनरावेशयन्तु ॥

अथ० १८ । २ । २६

इस मन्त्रमें ऋतु सहचरित रश्मियोंके अर्थ में पितर शब्द है । और इनका कार्य जीवात्माओं को एक शरीरसे दूसरे शरीरमें जन्म देना है । विवरणके लिए देखो सूक्त० अथ० १८ । २ । २६ (पृष्ठ १२६)

अरुरुचदुषसः पृश्निरग्रिय उक्षा बिभर्त्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥

ऋ० ९ । ८३ । ३

(पृश्निरग्रिय उषसोऽरुरुचत्) पृश्निरादित्यः "पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति" (निरुक्त २ । १४) अग्रियो मुख्यः सन्नुषसोऽरुरुचद्रोचयति प्रकाशयति (उक्षा वाजयुर्भुवनानि विभर्त्ति) उक्षा वृष्टिजलसेक्ता वाजयुः प्राणिभ्योऽन्नमिच्छन् सन् भुवनानि लोकान् विभर्त्ति धारयति (अस्य मायया मायाविनो नृचक्षसः पितरो गर्भमादधुर्ममिरे) अस्यादित्यस्य मायया निर्माणशक्त्या ये मायाविनो निर्माणशक्तिमन्तो नृचक्षसः प्राणिमात्रस्य दर्शयितारोऽभिव्यक्तिहेतवो वा पितरः सूर्यरश्मयः । तथा च सायणः । "पितरो जगद्रक्षका रश्मयः" गर्भमादधुः पृथिव्यामुत्पत्तुं योग्यस्य गर्भमाधत्तवन्तः । अथ च तं गर्भं ममिरे निर्मितवन्तः ॥

भावार्थ—(पृश्निरग्रिय उषसोऽरुरुचत्) आदित्य सब लोकलोकान्तरोंमें मुख्य होकर दिनका प्रकाश करता है (उक्षा वाजयुर्भुवनानि विभर्त्ति) जलका सींचन करने वाला प्राणिमात्रके लिये मानो अन्नको चाहता हुवा पृथिवी आदि लोकोंको धारण करता है (अस्य मायया मायाविनो नृचक्षसः पितरो गर्भमादधुर्ममिरे) इस आदित्यकी निर्माणशक्तिवाले जो भी प्राणीमात्रके दर्शनशक्तिके हेतु सूर्यरश्मियां उत्पत्ति योग्य गर्भको धारण करती हैं और उस गर्भको निर्माण करती हैं ॥

शिक्षा—सूर्यका प्रकाश सब लोगोंकी स्थितिका कारण है और उसकी निर्माणशक्तिसे शक्तिवाली रश्मियां संसारके गर्भमात्रको धारण तथा उत्पन्न करती हैं ॥

इस मन्त्रमें सूर्यरश्मियोंके लिये पितर शब्द आया है और उनका कार्य संसारके जीवमात्रके गर्भको पुष्ट और उत्पन्न करना है ॥

उदीरतामवर उत्परास उन्मध्यमाः पितर सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ ऋ० १०।१५।१
यजु० अ० १४ । ४९, अथ० १८ । १ । ४४

इस मन्त्रमें प्रातः, मध्य और तृतीयसवनके यज्ञमें प्राप्त सूर्यरश्मियोंके लिये तीन बार पितर शब्द का प्रयोग है । इनका कार्य प्राणिमात्रके जीवनका विकास करना है । विवरणके लिये देखो सूक्त० ऋ० १० । १५ । १ (पृष्ठ ४१)

वीळु चिद्दृढा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण ।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमस्राः ॥ ऋ० १।७१।२

(पितरो नो दृढा वीळु चिदुक्थैरद्रिं रुजन्) पितर उत्पत्तिनिमित्ताः पालनहेतवो वा प्रावृषेण्याः सूर्यरश्मयो नोऽस्मभ्यं जीवेभ्यो दृढा दृढेन वीळुना बलेन "वीळु बलनाम" (नि० २ । ९) दृढा-वीळु 'सुपांसुलुक्पूर्वसवर्णाच्छे०' इत्य-

नेनाकारलापौ भवतः'। चिदप्युक्थैः परिभाषणैर्महद्ध्वनिभिर्गर्जनैरद्रिं मेघं रुजन् भञ्जयन्ति। 'रुज भङ्गे तुदादिस्ततः सामान्यकाले लुङ्' (अङ्गिरसो रवेण चक्रुः) अङ्गिरसो देदीप्यमाना ग्रीष्मर्तुकाः सूर्यरश्मयो रवेण रेषणेन निजभेदनशक्त्या। 'रुङ् गतिरेषणयोः' चक्रुर्यमद्रिं मेघं निर्मितवन्तः (उस्रा अस्मे बृहतो स्वः केतुमहर्गातुं विविदुः) उस्रा वर्षाकालानन्तरं विविधगुणानां वासयितारः शारदाः सूर्यरश्मयः "उस्रेति रश्मिनाम" (नि० १। ५) अस्मेऽस्मभ्यं बृहतो महतो दिवो मेघमण्डलान्निवृत्य महत आकाशस्य मध्ये वा स्वरादित्यं विविदुर्लब्धवन्तः। अत एव केतुमुषसं विविदुर्लब्धवन्तस्तदैवाहर्दिनं विविदुर्लब्धवन्तोऽथ गातुं पृथिवीं पुनर्विविदुर्लब्धवन्तः "गातुः पृथिवी नाम (नि० १। १)

भाषार्थ—(पितरो नो दृढा वीलु चिदुक्थैरद्रिं रुजन्) उत्पत्तिके निमित्त पालनहेतु वर्षाकालकी सूर्यरश्मियां जीवोंके लिए दृढ़ बलसे गर्जनशब्दोंके साथ मेघको छिन्न भिन्न करती हैं (अङ्गिरसो रवेण चक्रुः) ग्रीष्म ऋतु की देदीप्यमान रश्मियां निज रसग्रहण शक्तिसे जिस मेघको बनातीं हैं (उस्रा अस्मे बृहतो स्वः केतुमहर्गातुं विविदुः) वर्षाकालके अनन्तर विविध गुणोंका वास करानेवाली शीतकालकी रश्मियां हमारे लिये बड़े भारी मेघमण्डलसे निवृत्त होकर या विस्तृत आकाश के बीचमें वर्तमान आदित्यको प्राप्त करती हैं अर्थात् निर्मल आकाशमें सूर्य को प्रकाशित करती हैं। अत एव उषा को प्राप्त होती हैं पुनः दिन को प्राप्त होती हैं अनन्तर पृथिवीको प्राप्त होती हैं।

शिक्षा—ग्रीष्मकालकी देदीप्यमान सूर्यरश्मियां रस-भेदन शक्तिसे मेघ बनाती हैं पुनः वर्षाकालकी सूर्य रश्मियां दृढ़ बलसे उस मेघको गर्जन शब्दोंके साथ छिन्न भिन्न कर नीचे गिराती हैं पुनः वर्षाकालके अनन्तर शीतकालकी रश्मियां विस्तृत आकाशमें वर्तमान सूर्यको प्राप्त हुई उषा (प्रभात वेला) दिनका प्रकाश करके पृथिवीको प्राप्त होती हैं। ये इस प्रकार त्रैकालिक अथवा ग्रीष्म वर्षा और शरद की प्रधान ऋतुओं का रश्मिविज्ञान है॥

इस मन्त्रमें वर्षा ऋतुकी सूर्य रश्मियोंके लिये पितर शब्द आया है। इन का कार्य मेघको तोड़ फोड़कर वृष्टि करना है॥

आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि॥

ऋ० १०। १०७। १

(एषां माघोनं महि-आविरभूत) एषां सूर्यरश्मीनां माघोनमैन्द्रं सौरं महि महत्वमाविरभूत् प्रकटितमभवत् (विश्वं जीवं तमसो निरमोचि) विश्वं सकलं जीवं जीवमात्रं जीवसंसारं तमसोऽन्धकारान्निरमोचि पृथक्कृतवान् (पितृभिर्दत्तं महि ज्योतिरुदगात्) पितृभी रश्मिभिर्दत्तं महि महज्ज्योतिरुदगात्प्रकटमभूत् (दक्षिणाया उरुः पन्था अदर्शि) दक्षिणायास्त्यागस्य "त्यागं दक्षिणा" (प्राणाग्निहोत्रोप० ३) उरुर्महान् पन्था मार्गोऽदर्शि दृष्टोऽभूत् ।

भाषार्थ—(एषां माघोनं महि, आविरभूत) इन सूर्य रश्मियोंका सूर्य-सम्बन्धि महत्व अर्थात् तेज प्रकट हुआ (विश्वं जीवं तमसो निरमोचि) सकल जीवसंसारको अन्धकारसे छुड़ाया (पितृभिर्दत्तं महि ज्योतिरुदगात्) एवं रश्मियों द्वारा दिया हुआ सूर्यका प्रकाश प्रकट हुआ (दक्षिणाया उरुः पन्थाऽदर्शि) त्याग का बड़ा मार्ग दिखलाई पड़ा ॥

शिक्षा—सूर्यका स्वतःप्रकाश रश्मियों द्वारा जब प्रकट होता है तो सकल जीवसंसार अन्धकारसे छूट जाता है। यह एक प्रकाशका दान मनुष्योंके लिये त्यागका मार्ग दिखलाता है ॥

इस मन्त्रमें सूर्यरश्मियोंके लिये पितर शब्द है। इनका कार्य सूर्यप्रकाश को सब जीवों तक पहुँचा कर अन्धकारसे छुड़ाना है ॥

अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।
अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ ॥

ऋ० ६ । ५२ । ४

(जायमाना उषसो मामवन्तु) उत्पद्यमाना उषोवेला मां रक्षन्तु (पिन्वमानाः सिन्धवो मामवन्तु) सिञ्चन्त्यो नद्यो मां रक्षन्तु । 'पिवि सेवने सेचने च' "सिन्धु-नदीनाम" (नि० १ । १३) (ध्रुवासः पर्वतासो मामवन्तु) स्थिराः शैला मां रक्षन्तु (देवहूतौ पितरो मामवन्तु) देवानामग्न्यादीनां हूतौ हूत्यै निवेशाय 'निमित्तसप्तमी' पितरो रश्मयो मां रक्षन्तु । अत्र मूर्तिमत्प्रकरणात्सहचाराद्वा पितृशब्दो न मृतजनार्थः कश्चिद् ग्रहीतुं शक्यः ॥

भाषार्थ—(जायमाना उषसो मामवन्तु) प्रति दिन उदय होने वाली उषाएं मेरी रक्षा करें (पिन्वमानाः सिन्धवो मामवन्तु) जल सींचन करती हुवी नदियां मेरी रक्षा करें (ध्रुवासः पर्वतासो मामवन्तु) स्थिर हुवे पहाड़ मेरी रक्षा करें (देव-

हूतौ पितरों मामवन्तु) अग्नि आदि पदार्थोंकी स्थापनाके लिए सूर्य रश्मियां मेरी रक्षा करें ॥

शिक्षा—वस्तुविज्ञान द्वारा मनुष्यको प्रातः कालकी उषाओं, नदियों, पर्वतों और सूर्यकिरणोंसे अनेक लाभदायक उपयोग लेने चाहिये ॥

इस मंत्रमें भौतिक वस्तुओंका वर्णन होने से पितर शब्दका अर्थ सूर्य रश्मियां हैं। जिनका कार्य अग्नि आदि द्योतमान तथा दिव्यगुण पदार्थोंकी स्थिरता करनी है ॥

अभिश्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।
रात्र्यां तमो अदधुर्ज्योतिरहन् बृहस्पतिर्भिनदद्रिं विदद्गाः ॥
ऋ० १० । ६८ । ११, अथ० २० । १६ । ११

(कृशनेभिः श्यावमश्वं न पितरो नक्षत्रेभिर्द्यामभिपिंशन्) कृशनेभिः कृशनैर्हिरण्यैः सुवर्णभूषणैः श्यावं कृष्णमश्वं न यथा जना भूषयन्ति तथा पितरः सूर्यरश्मयो नक्षत्रेभिर्नक्षत्रैर्द्यां द्युलोकमभिपिंशन्नभिरूपयन्ति । यावन्ति प्रकाशमानानि नक्षत्राणि दृश्यन्ते तानि सूर्यरश्मिभिः प्रकाश्यन्त इति ज्यौतिषसिद्धान्तो ज्ञाप्यते (रात्र्यां तमोऽदधुरहन् ज्योतिः) रात्रौ तमोऽन्धकारमदधुः स्थापितवन्तोऽहन् दिने ज्योतिः स्थापितवन्तः (बृहस्पतिरद्रिं भिनद्गाविदत्) बृहस्पतिः सूर्योऽद्रिं मेघं भिनद् भित्तवान् तदा च गा निजरश्मीन् प्राप्तवान् ॥

भाषार्थ—(कृशनेभिः श्यामवश्वं न पितरो नक्षत्रेभिर्द्यामभिपिंशन्) सुवर्ण भूषणोंसे काले घोड़े को जैसे लोग सजाते हैं एवं सूर्यरश्मियां नक्षत्रोंसे द्युलोकको शोभायमान करती हैं अर्थात् जितने भी प्रकाशमान नक्षत्र दिखाई पड़ते हैं वे सब सूर्यरश्मियोंसे प्रकाशित होते हैं यह एक ज्योतिष्सिद्धान्त है (रात्र्यां तमोऽदधुरहन् ज्योतिः) वे रश्मियां रात्रिमें अन्धकारको स्थापित करती हैं और दिनमें प्रकाशको (बृहस्पतिरद्रिं भिनद्गाविदत्) सूर्य मेघको छिन्न भिन्न करके स्वरश्मियों से प्रकाशमान होता है ॥

शिक्षा—आकाशके अन्दर जितने प्रकाशवाले नक्षत्रादि दीखते हैं, वे सब सूर्यरश्मियोंसे प्रकाशित हैं। रश्मियोंके अवर्तमानसे रात्रिमें अन्धकार और प्रकाशसे दिन प्रकट होता है ॥

इस मन्त्रमें सूर्यरश्मियोंके लिये पितर शब्द आया है। इनका कार्य नक्षत्र तारागणको प्रकाश देना और दिनको प्रकाशित करना है ॥

परिणाम— इस प्रकरणमें ७ वस्तुओंके अर्थमें पितर शब्द आया है जिनमें—

(१) माता पितादि कुटुम्बी जन हैं जिनका कार्य होम द्वारा धर्मानुष्ठान, निज सम्पत्तिका सन्तानके प्रति समर्पण, स्वजीवन उपयोगी अनुभवों का सन्तानको उपदेश देना है।

(२) शिक्षकादि ज्ञानी जन हैं जिनका कार्य ब्रह्मचारियोंको विद्यालयमें या अपने पास रखकर विद्याप्राप्ति कराके मनोविकास करना तथा अन्य लोगोंको भी सभा या सम्मेलनमें उपदेश करके उल्टे मार्ग से हटाना, ब्रह्मसंगतिसे आत्मविकास कराना है।

(३) सैनिक जन हैं जिनका कार्य शत्रुसेनासे युद्ध करना, उनको मारना तथा पापियोंको परास्त करना और मृत्युदण्ड भी देना है।

(४) पालकजन हैं जिनका कार्य मानव समाजको रक्षा तथा प्रजाकी आवश्यकताएं पूरी करना है।

(५) सूर्य किरणें हैं उनका कार्य प्राणीमात्रके गर्भको पुष्ट करना और बाहर निकालना, जीवनका विकास करना, अन्धकार हटाना, मेघ बनाना, वृष्टि करना, पृथिवीको विविध गुणोंसे युक्त करना, नक्षत्र तारागण और दिनका प्रकाश करना है।

(६) प्राण हैं जिनका कार्य जीवात्माको गर्भ में धारण करना है।

(७) ऋतुएं हैं उनका कार्य जीवात्माको गर्भमें पहुँचाना, धारण करना, मानवीय भावनाओं-वाणीव्यापार-शारीरिकक्रिया पर प्रभाव डालना और मनोविकास करना, उत्पन्न होने वाले पदार्थों को रक्षा करना तथा वृष्टिके लिये ऋतुक्रम विज्ञानका परिचय है।

पितरों के प्रति कर्तव्य

इस प्रकरणमें वे मन्त्र होंगे जिनमें पितरोंके प्रति कर्तव्यों का निर्देश है।

यदा गार्हपत्यमसपर्य्यैत् पूर्वमग्निं वधूरियम्।
अधा सरस्वत्यै नारि पितृभ्यश्च नमस्कुरु॥ अथ० १४। २। २०

(यदेयं वधूः पूर्वं गार्हपत्यमग्निमसपर्य्यैत्) यदैषा वधूर्नवविवाहिता पूर्वं प्रथमं गार्हपत्यं गृहस्थसम्बन्धिनमग्निमसपर्यैत् प्राप्ता भवेत् (अधा नारि सरस्वत्यै पितृभ्यश्च नमस्कुरु) अथानन्तरं तदा सा वधूरेवं वरेणाज्ञापनीया यद् हे नारि! त्वं

सरस्वत्यै-आज्ञारूपायै मे वाण्यै तथा मम पितृभ्यश्च नमस्कुरु स्वागतं कुरु। न कदाचिद्विरुद्धा स्याः ॥

भाषार्थ—(यदेयं वधूः पूर्वं गार्हपत्यमग्निमसपर्य्यैत्) जब यह नवविवाहिता वधू प्रथमवार ही गार्हपत्य अग्निको प्राप्त होवे अर्थात् पतिके घरमें जावे (अथा नारि सरस्वत्यै पितृभ्यश्च नमस्कुरु) तब वरकी ओरसे उसको आदेश किया जावे कि हे पत्नि ! तू आज्ञारूप मेरी वाणीके लिए तथा मेरे माता पिता आदि कुटुम्बी जनोंके लिए स्वागत कर। कभी विरुद्ध न हो ॥

शिक्षा—जिस समय नव-विवाहिता स्त्री घरमें आवे तो उसके पतिकी ओर से शिष्टाचार सम्बन्धी बातोंका आदेश करना चाहिये। जिससे कि वह उसके लिये तथा उसकी माता पिता आदिके लिये यथावत् वर्ताव कर सके।

इस मंत्रमें पितर शब्द कुटुम्बी जनोंके अर्थमें आया है। और उनके लिये पुत्र वधूकी ओरसे आदर करनेका आदेश है ॥

पुत्रं पौत्रमभितर्पयन्तीरापो मधुमतीरिमाः ।
स्वधां पितृभ्य अमृतं दुहाना आपो देवीरुभयांस्तर्पयन्तु ॥
अथ० १८ । ४ । ३९

इस मन्त्रमें पितर शब्द माता पिता आदि पूर्वज कुटुम्बी जनोंके अर्थमें आया है, और गोधूम आदि ओषधिरस उनके पोषणके लिये भी हैं और पुत्र पौत्रादि के लिये भी, ऐसा वर्णन है, विवरणके लिये देखो सूक्त० १८ । ४ । ३६ (२०६)

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधाः स्थ तर्पयत मे पितॄन् ॥ यजु० २ । ३४

(ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधाः स्थ) ऊर्जं रसं वहन्तीः प्रापयन्त्य आपोऽमृतं सर्वरोगहरं मिष्टादिकं वस्तु घृतं पयो दुग्धं कीलालमन्नम्, "कीलालमन्ननाम" (नि० २ । ७) परिस्रुतं परिपक्वं फलम् । इत्येवं यूयं स्वधाः स्थ स्वधानामभिर्वक्तव्याः स्थ, यतो हि मे पितॄन् तर्पयतोपहारदानेन मम पालकजनान् प्रसादयत । अथवा घृतादिसहिताः शुद्धा आपः स्वधावाच्याः सन्तीति विज्ञेयम् ॥

भाषार्थ—(ऊर्जम्) रसको (वहन्तीः) प्राप्त कराते हुए जल (अमृतम्) सर्वरोगोंको हरनेवाली मिष्टादि वस्तु (घृतम्) घी (पयः) दूध (कीलालम्) अन्न (परिस्रुतम्) परिपक्वफल ये सब पदार्थ मिलकर (स्वधाः स्थ) स्वधा नामसे कहे

जाने वाले हो या हैं। (पितृन् मे तर्पयत) मेरे पालकजनों को तृप्त करो, या तृप्त करते हैं ॥

शिक्षा—पूजनीय माता पिता आदि वृद्ध जनों और गुरु आदि विद्वान् महानुभावोंकी सेवा जल तथा विविध रसीले पदार्थों मिष्टादि वस्तु घी, दूध, अन्न और फलोंके उपहारद्वारा करनी चाहिये ॥

इस मन्त्रमें कुटुम्बीजनों और गुरु आदि विद्वान् महानुभावोंके लिये पितर शब्द आया है और उनके लिये उत्तमोत्तम भोजनोंका प्रदान करना इष्ट है। यहां जलतर्पणका कोई प्रसङ्ग नहीं है, और न ही मन्त्रमें इसका लेश है, किन्तु घृतादि छः पदार्थों का स्पष्ट नाम लिखा है, जो कि मनुष्य जीवनके लिये उपयोगी पदार्थ हैं अत एव इनके द्वारा पूज्य पालकजनोंकी सेवा करने का उपदेश है ॥

यत् ते पितृभ्यो ददतो यज्ञे वा नाम जगृहुः।
संदेश्यात् सर्वस्मात् पापादिमा मुञ्चन्तु त्वौषधीः ॥

अथर्व० १० । १ । ११

(यज्ञे वा पितृभ्यो ददतस्ते यन्नाम जगृहुः) यज्ञे पितृयज्ञे वृद्धजनानां सेवाकर्मणि वा पितृभ्यो वृद्धपालकजनेभ्यो ददतोऽन्नादि समर्पयतस्तव यन्नाम प्रशंसापूर्वकं यशोरूपं जगृहुस्ते पितरो गृहीतवन्तः प्रकाशितवन्तः (सन्देश्यात्सर्वस्मात्पापादिमा ओषधीस्त्वा मुञ्चन्तु) अतस्त्वां संदेश्याद्वक्तुं योग्यात् स्पष्टाद् व्यक्तात् सर्वस्मात् पापाद्रोगादिमा मया चिकित्सकेन दीयमाना ओषधीरोषधयो मुञ्चन्तु ॥

भाषार्थ—(यज्ञे वा पितृभ्यो ददतस्ते यन्नाम जगृहुः) पितृयज्ञमें वृद्ध पालक जनों की सेवाके निमित्त अन्नादि पदार्थको समर्पण करते हुवे तुझ सेवकका नाम प्रशंसापूर्वक यशके साथ उक्त पालक जनोंने जब कहीं प्रसंगमें प्रकाशित किया है (सन्देश्यात्सर्वस्मात् पापादिमा ओषधीस्त्वा मुञ्चन्तु) अत एव तुझको प्रसिद्ध हुवे सर्व-पाप अर्थात् रोगसे मुझ चिकित्सक द्वारा दी हुई ओषधियां छुड़ा देवें ॥

शिक्षा—पालक वृद्ध जनोंके लिये जो उत्तमोत्तम अन्नादि ओषधियोंका दान करता है उसका वे महानुभाव प्रशंसापूर्वक यशोगान करते हैं। और उसका नाम प्रसिद्ध करते हैं अत एव वे दानकी ओषधियां उसको पापसे अथवा किसी चिकित्सक द्वारा दी हुई रोगसे छुड़ाती हैं।

इस मंत्रमें कुटुम्बीवृद्ध तथा ज्ञानीपालक जनोंके अर्थमें पितर शब्द आया

है। उनके लिये नानाविध भोजनोंका दान तथा दाताका प्रशंसापूर्वक नाम प्रसिद्ध करनेका वर्णन है ॥

पितृभ्यः स्वधायिभ्यः स्वधा नमः। पितामहेभ्यः स्वधायिभ्यः स्वधा नमः। प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त। पितरः पितरः शुन्धध्वम् ॥ यजु० १९। ३६॥

(स्वधायिभ्यः पितृभ्यः स्वधा नमः) ये स्वधामुदकमन्नं वैतुं प्राप्तुं शीलास्तेभ्यः "स्वधेत्युदकनाम" (नि० १। १२) "स्वधेत्यन्ननाम" (नि० २। ७) पितृभ्यः पालकेभ्यो जनकाध्यापकादिभ्यः स्वधाऽन्नं नमः सत्करणमस्तु (स्वधायिभ्यः पितामहेभ्यः स्वधा नमः) अन्नाद्याप्तुं शीलेभ्यः पितॄणां पितृभ्योऽन्नं सत्करणमस्तु (स्वधायिभ्यः प्रपितामहेभ्यः स्वधा नमः) अन्नाद्याप्तुं शीलेभ्यः पितामहानां पितृभ्योऽन्नं सत्कारश्चास्तु (पितरोऽक्षन्नमीमदन्त) पितरो ज्ञानिनोऽक्षन्नदन्तु-अत्त। 'पुरुष लकारव्यत्ययौ' अमीमदन्तास्मान् हर्षयत (पितरोऽतीतृपन्त) पितरोऽतिशयेन तर्पयत (पितरः पितरः शुन्धध्वम्) ये सर्वे पितरस्ते यूयं पवित्री कुरुत। इति दयानन्दः ॥

स्पष्टीकरणम्—(स्वधायिभ्यः पितृभ्यः स्वधा नमः) स्वधायिभ्यः स्वं स्वकीयं कृतकर्मण उपहारभागं धातुं धारयितुं सेवितुं वृतं येषां तेभ्यः। "वृते" (अष्टा० ३। २। ८०) इति णिनिप्रत्ययस्तद्वच्च स्वरः। ते च द्विविधाः पितरो योनिसम्बन्धेनैके जनकादयो विद्यासम्बन्धेनापरे गुर्वादयस्तेभ्यः पितृभ्योऽन्नविद्यादिदानैः पालकेभ्यः स्वधाऽन्नं पक्वान्नमथ नमश्च। यथासम्भवं फलादिदानरूपसत्कारोऽस्तु। इति विशेषः ॥

भाषार्थ—(स्वधायिभ्यः पितृभ्यः स्वधा नमः) जल या अन्न प्राप्त करने का शील जिनका है ऐसे उन पालक जनों जनकाध्यापक आदिकोंके लिये अन्न और सत्कार हो (स्वधायिभ्यः पितामहेभ्यः स्वधा नमः) अन्नादि प्राप्तिशील पालकोंके भी पालकोंके लिये अन्न और सत्कार हो (स्वधायिभ्यः प्रपितामहेभ्यः स्वधा नमः) अन्नादि प्राप्तिशील पितामहोंके पालकोंके लिये अन्न और सत्कार हो (पितरोऽक्षन्नमीमदन्त) हे ज्ञानी जनो! हमको प्रसन्न करो अत एव (पितरोऽतीतृपन्त) हे पालकजनो! अतिशय करके तृप्त करो (पितरः पितरः शुन्धध्वम्) तुम सभी पालक महानुभावो पवित्र करो ॥

स्वकीय कृतकर्म का उपहार भाग धारण करने का वृत या धर्म जिनका हो वे महानुभाव स्वधायी कहलाते हैं। अर्थात् जो विना किसीका उपकार किये दूसरे का

मुफ्त माल न खाते हों। वे दो प्रकारके पितर होते हैं एक योनिसम्बन्ध से जनकादि और दूसरे विद्यासम्बन्ध से गुरु आदि। सो वे दोनों प्रकारके पितर हमारा अन्न और विद्यादानसे पालन करते हैं। उनका प्रत्युपकार हमको पक्वान्न फलादिसे यथासम्भव सेवा सत्कारसे करना चाहिये ॥

शिक्षा—जिन महानुभावोंने हमको उत्पन्न करके प्रत्येक प्रकारसे पाला तथा जिन्होंने विद्योपदेशसे मानवीय जीवनका सुखप्राप्त कराया उन पालक महानुभावोंकी सदा उत्तम अन्न और सत्कारादिसे सेवा करनी चाहिये जिससे वे महानुभाव भी हमको अपने आशीर्वादों और अनुभवोंसे हितचिन्तन कर सकेंगे ॥

इस मन्त्रमें माता पिता आदि कुटुम्बी जन और गुरु आदि ज्ञानीजन के अर्थमें पितर शब्द आया है। और इनका कार्य हमारा हित चिन्तन करना और अच्छे मार्ग पर डालना तथा हमारा कर्तव्य उनके प्रति उनकी अन्नादिसे सेवा करना है॥

व्याकरोमि हविषाहमेतौ तौ ब्रह्मणा व्यहं कल्पयामि।
स्वधा पितृभ्यो अजरां कृणोमि दीर्घेणायुषा समिमान्त्सृजामि ॥

अथ० १२।२।३२

(तावेतावहं हविषा व्याकरोमि ब्रह्मणा व्यकल्पयामि) तावेतौ देवयज्ञं ब्रह्मयज्ञं च हविषा व्याकरोमि सम्पादयामि ब्रह्मणा ब्रह्मध्यानेन वेदेन वा व्यकल्पयामि समनुतिष्ठामि (पितृभ्योऽजरां स्वधां कृणोमि) पितृभ्यः पितृयज्ञेन पितृभ्योऽजरां स्थिरां स्वधामुपहारभक्तिं कृणोमि सम्पादयामि (इमान् दीर्घेणायुषा संसृजामि) स्वधां दत्त्वा इमान् पितॄन् दीर्घेणायुषाऽधिकजीवनकालेन संसृजामि संयोजयामि ॥

भाषार्थ—(तावेतावहं हविषा व्याकरोमि ब्रह्मणा व्यकल्पयामि) इन देवयज्ञ और ब्रह्मयज्ञ को मैं आहुतिद्वारा सम्पादन करता हूँ तथा ब्रह्मध्यान या वेदाध्ययनसे अपने जीवनके अन्दर घटाता हूँ। तथा (पितृभ्योऽजरां स्वधां कृणोमि) पितृयज्ञसे पितर महानुभावों माता पिता और गुरुजनोंके लिये जीवननिर्वाहक स्थिरोपहार अर्थात् स्थायी आजीविका निश्चित करता हूँ और उस स्थिर आजीविका-द्वारा (इमान् दीर्घेणायुषा संसृजामि) इन पूर्वोक्त पालक महानुभावोंको अधिक जीवन के लिये सब साधनोंसे युक्त करता हूँ ॥

शिक्षा—प्रत्येक मनुष्यका कर्तव्य है कि वह ब्रह्मध्यान और वेदाध्ययनसे ब्रह्म-

यज्ञ तथा अग्निमें होमकर देवयज्ञ और उत्तम अन्नादिसे अपने मातापिता आदि कुटुम्बी जनों और गुरु आदि महानुभावोंकी स्थिर आजीविकाका प्रबन्ध करके पितृयज्ञका सेवन करे ॥

इस मन्त्रमें पितृशब्द माता पिता आदि कुटुम्बीजनों और गुरु आदि महानुभावोंके लिये आया है। उनके लिये स्थिर आजीविकारूप कर्तव्यका विधान है॥

अग्ने वाजजित् वाजन्त्वा सरिष्यन्तं वाजजितं सम्मार्ज्मि ।
नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥

यजु० २ । ७

(अग्ने वाजजिद् वाजजितं त्वा वाजं सरिष्यन्तं सम्मार्ज्मि) अग्ने हे अग्ने! वाजजिद् वाजमन्नं जयति सुपाकेन सूक्ष्मीकरणेन वा स सम्बुद्धौ। "वाज इत्यन्ननाम" (नि० २ । ७) वाजजितं त्वां वाजमन्नं सरिष्यन्तं प्राप्नुवन्तं पाकेन हवनेन च परिणमयन्तं सम्मार्ज्मि संशोधयामि समलङ्करोमि संसाधयामित्यर्थः। यत् (देवेभ्यो नमः पितृभ्यः स्वधा) वाजश्च देवेभ्योऽग्न्यादिभ्यो विद्वद्भ्यश्च नमः स्वागतं नम्रीभूतं वा सूक्ष्मं भवतु पितृभ्यः स्वधोपहारः सूपाकोऽस्तु (सुयमे मे भूयास्तम्) तेऽन्नपरिणामे नमःस्वधारूपे मे मह्यं सुयमे सुधर्मे भूयास्तं भूयास्ताम् ॥

भाषार्थ—(अग्ने वाजजिद् वाजजितं त्वा वाजं सरिष्यन्तं सम्मार्ज्मि) हे अग्ने! तू अन्नको सुपाकसे सूक्ष्म करने वाली तथा अन्न प्रभावक, अन्न का पाक अथवा होमसे परिणाम करने वाली है अतः मैं तुझको सिद्ध करता हूँ (देवेभ्यो नमः पितृभ्यः स्वधा) अग्नि आदि तथा विद्वानोंके लिये वह अन्न स्वागतरूप और कुटुम्बी जनोंके लिये उपहाररूप हो (सुयमे मे भूयास्तम्) वे अन्न और परिणाम दोनों नमः और स्वधा लाभदायक हों॥

शिक्षा—अग्नि अन्नका पाक तथा होम द्वारा परिणाम करती है। वह परिणाम होमरूपमें भौतिक दिव्य पदार्थों और विद्वानोंके सत्कारका निमित्त तथा पाक रूपमें पालक जनों का उपहार बनता है ॥

इस मन्त्रमें पालक जनोंके अर्थमें पितर शब्द आया है। उनके लिये पक्वान्न का उपहार करने का विधान है ॥

यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितृणाम् ।
अधास्मा यच्छ तन्वे तने च छर्दिरचित्तं यावय द्वेषः ॥ ऋ० ६।४६।१२

(यत्र शूरासस्तन्वो वितन्वते) यत्र युद्धे शूरासस्तन्वो निजशरीराणि वितन्वते युद्धार्द्धं सज्जीकुर्वन्ति युद्धवेशेन शोभयन्ति (पितृणां प्रिया शर्म) पितृणां मुख्यसैनिकानां प्रिया सुन्दराणि शर्म शर्माणि गृहाणि मण्डलानि शिविराणि वितन्वते सज्जीकुर्वन्ति (अधास्मा तने तन्वे च छर्दिर्यच्छ) अधानन्तरं तेषां तने तन्यमाने मण्डले मण्डलनिमित्ते 'निमित्तसप्तमी' तन्वे शरीराय च छर्दिर्युद्धक्षेत्रं यच्छ देहि (द्वेषोऽचित्तं यावय) द्वेषः शत्रून् प्रत्यचित्तं मूढत्वं यावय प्रापय ॥

भाषार्थ—(यत्र शूरासस्तन्वो वितन्वते) जिस युद्धमें शूरवीर जन अपने शरीरोंको युद्धार्थ शस्त्रास्त्रादिधारणसे सुशोभित करते हैं (पितृणां प्रिया शर्म) और अपने मुख्य सैनिकोंके मण्डलों छावनियोंको भी यथोचित शस्त्रास्त्रादिसे युद्धार्थ अलङ्कृत करते हैं (अधास्म तने तन्वे च छर्दिर्यच्छ) अनन्तर उनके तन्यमान मण्डल और शरीरके लिये युद्धक्षेत्रको दे (द्वेषोऽचित्तं यावय) इस प्रकार साधनसम्पत्तिके अनन्तर शत्रुओं के प्रति युद्धमें घबराहटको पैदा कर ॥

शिक्षा—संग्राममें वीर राजा या सेनापति शत्रुओंको घबरा देने और उन पर विजय प्राप्त करनेके लिये अपने सैनिकोंको शस्त्रास्त्रादिसे सुसज्जित करता है और छावनियोंको भी शस्त्रास्त्रादिसे सुसज्जित करता है पुनः युद्ध क्षेत्रके लिये आज्ञा देता है ॥

इस मंत्रमें सैनिक जनोंके लिये पितर शब्द आया है। और उनके लिये सेना मण्डल या छावनी बनानेका आदेश है ॥

स्वधाकारेण पितृभ्यो यज्ञेन देवताभ्यः ।
दानेन राजन्यो वशाया मातुर्हेडं न गच्छति ॥ अथ० १२ । ४ । ३२

(राजन्यः पितृभ्यः स्वधाकारेण देवताभ्यो यज्ञेन दानेन वशाया मातुर्हेडं न गच्छति) राजन्यः क्षत्रियो भूपतिः पितृभ्यः सैनिकेभ्यः स्वधाकारेण वेतनोपहारदानेन देवताभ्यो विद्वद्भ्यो यज्ञेन दक्षिणायुक्तेन सम्मेलनेन विद्याप्रचारेण वेत्येवं दानेन वशायाः स्वायत्ताया मातुः पृथिव्या हेडं क्रोधं दौरवस्थिकं दुर्भिक्षादिकं न गच्छति न प्राप्नोति "हेडः क्रोधनाम" (निरु० २ । १३) ॥

भाषार्थ—(राजन्यः पितृभ्यः स्वधाकारेण) राज्याधिकारी भूपति सैनिकलोगोंके लिये वेतनोपहार देने से (देवताभ्यो यज्ञेन दानेन) विद्वानोंके लिये दक्षिणा युक्त यज्ञसे, सम्मेलनसे तथा विद्याप्रचारार्थ दानसे (वशाया मातुर्हेडं न गच्छति) स्ववश स्वाधीन पृथिवीके द्वारा दुरवस्थासम्बन्धी दुःख दुर्भिक्ष और दुर्मरणादि राष्ट्रिय उपद्रवको प्राप्त नहीं होता है ॥

शिक्षा—राष्ट्रपतिको आवश्यक है कि दुर्भिक्ष और दुर्मरण आदि उपद्रव से राष्ट्रको बचानेके लिये वेतनवृत्ति देकर नाना-विध प्रबन्ध और रक्षा करने वाले सैनिकोंका और यज्ञों तथा विद्या क्षेत्रोंके प्रबन्ध और प्रचारसे विद्वानोंका सत्कार करे॥

इस मंत्रमें पितर शब्द सैनिकोंके लिये आया है। और उनका कार्य राष्ट्र-रक्षण तथा राष्ट्रको सब प्रकारके उपद्रवोंसे बचाना और उनके लिये वेतनोपहार देने का विधान है॥

नमो यमाय नमो अस्तु मृत्यवे नमः पितृभ्य उत ये नयन्ति।
उत्पारणस्य यो वेद तमग्निं पुरो दधे स्मा अरिष्टतातये॥
अथ० ५। ३०। १२

(यमाय नमः) यमाय यमनशीलाय वायवे नमो यज्ञः स्वनुष्ठानकर्म (मृत्यवे नमः) मृत्यवे मारकाय प्रकुपिताय वायवे नमो यज्ञः स्वनुष्ठितं कर्म (पितृभ्य उत ये नयन्ति) पितृभ्यः प्राणेभ्य उतापि ये शरीरं नयन्ति (अस्मा अरिष्टतातये) अस्मै रोगिणेऽरिष्टितातयेऽरोग्यत्वाय (उत्पारणस्य यो वेद तमग्निं पुरोदधे) उत्पारण-स्योत्पूरयितव्यमन्तःकोष्ठम् 'द्वितीयार्थे षष्ठी' यो वेद लभते तमग्निं जठराग्निं पुरोदधे पूर्वं स्थापयामि॥

भाषार्थ—(यमाय नमः) यमनशील वायुके लिये यज्ञ या अनुष्ठान कर्म (मृत्यवे नमः) मारक प्रकुपित वायुके लिये यज्ञ या अनुष्ठानकर्म (पितृभ्य उत ये नयन्ति) प्राणोंके लिये भी उक्त यज्ञ या अनुष्ठानकर्म हो जो शरीरको चलाते हैं (अस्मा अरिष्टतातये) इस रोगीके लिये आरोग्यता सम्पादनार्थ (य उत्पारणस्य वेद तमग्निं पुरोदधे) जो पूर्ण करने योग्य अन्तःकोष्ठ को प्राप्त हुई जाठराग्नि है उसको प्रथम स्थापित करता हूँ॥

शिक्षा—रोगीके स्वास्थ्यसम्पादनके वास्ते दोषोंका प्रशमन और जीवनप्रद वायुके धारणार्थ प्राणशक्तिके सञ्चारार्थ सबसे प्रथम चिकित्सकको कोष्ठाग्नि व्यव-स्थित करनेके लिये औषधाद्युपचार करना चाहिये॥

इस मंत्रमें जीवननायक प्राणोंके लिये पितर शब्द आया है और उनके उपयुक्त करनेके लिये यज्ञ का विधान है॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य अपरास ईयुः।
ये पार्थिवे रजस्यानिषत्ता ये वा नूनं सु वृजनासु विक्षु॥
ऋ० १०। १५। २, यजु० १९। ६८

इस मन्त्रमें पितर शब्दका अर्थ पूर्व पश्चिम ध्रुवा तथा ऊर्ध्वा दिशाको प्राप्त होने वाली सूर्यकिरणोंका है और उनके उपयोगी बनानेके वास्ते यज्ञका विधान है। विवरणके लिये देखो सू० अथ० १० । १५ । २ (पृष्ठ ४२) ॥

ये समानाः समनसः पितरो यमराज्ये ।
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ यजु० १९ । ४५

(ये समनसः समानाः पितरो यमराज्ये) ये समानविज्ञाना अत एव समानाः पितरः प्रजापालका यमराज्ये यमस्य सभाधीशस्य राज्ये राष्ट्रे सन्ति (तेषां लोकः स्वधा नमो यज्ञश्च देवेषु कल्पताम्) तेषां पितृणां लोकः सभादर्शनं स्वधाऽन्नं नमः सत्करणं च यज्ञः सङ्गन्तव्यो न्यायो देवेषु विद्वत्सु कल्पतां समर्थितोऽस्तु। इति दयानन्दः ॥

भाषार्थ—(ये समनसः समानाः पितरो यमराज्ये) जो समानविज्ञान वाले एक जैसे प्रजापालक न्यायाधीशके राष्ट्रमें राजपुरुष हैं (तेषां लोकः स्वधा नमो यज्ञेषु कल्पताम्) उन ऐसे पालक राजसभासदोंका सभादर्शन अन्न सत्कार और न्याय सफल तथा समर्थ हो ॥

शिक्षा—जिस राष्ट्रके अन्दर राष्ट्रपति या न्यायाधीशके साथ काम करने वाले राष्ट्रपालक सभासद परस्पर सहमत और विद्यायुक्त होते हुवे राष्ट्रको चलाते हैं वहींपर सभानियमन, अन्नादि पदार्थ, यथायोग्य सत्कार और न्याय, विद्वान् लोगोंका स्वीकार और राष्ट्रकी उन्नति होती है ॥

इस मन्त्रमें राजसभासदोंके लिये पितर शब्द आया है और यहां उनके कार्योंका वर्णन है जोकि यथावसर सभा करना, विद्वानोंका मान, राष्ट्रमें अन्नकी वृद्धि और न्याय है ॥

एतत्ते प्रततामह स्वधा ये च त्वामनु ॥ अथ० १८ । ४ । ७५ ॥
एतत् ते ततामह स्वधा ये च त्वामनु ॥ अथ० १८ । ४ । ७६ ॥
एतत् ते तत स्वधा ॥ अथ० १८ । ४ । ७७ ॥

इन मन्त्रोंमें प्रत्यक्षतः पितर शब्द नहीं है हां आगे चलकर—

नमो वः पितरः स्वधा वः पितरः ॥ अथ० १८ । ४ । ८५ ॥

इस मन्त्रमें अपने पिता, पितामह, प्रपितामह, तथा पालक, गृहस्थ-वानप्रस्थ-संन्यासी, अन्नदानी, दुग्धादि रसीली वस्तुका दानी, शासनकर्ता, नीतिज्ञ,

धनदण्डदाता, प्रहारदण्डदाता, आत्मज्ञानदाता, विद्यादानकर्ता इन सभीको पितर शब्द से कहा है। इनका यथायोग्य स्वागत करना मनुष्यका कर्तव्य वर्णन किया है विवरणके लिये देखो सूक्त० अथ० १८। ४। ७१-८५ (पृष्ठ २२७-२८०)

त्रेधा भागो निहितो यः पुरा वो देवानां पितॄणां मर्त्यानाम्।
अंशान् जानीध्वं विभजामि तान् वो यो देवानां स इमां पारयाति॥
अथ० ११। १। ५॥

(देवानां पितॄणां मर्त्यानां वो यस्त्रेधा भागः पुरा निहितः) देवानां दिव्यधर्माणां पदार्थानां पितॄणां पालकधर्माणां पदार्थानां मर्त्यानां मरणधर्माणां पदार्थानां युष्माकं तेषाम् 'पुरुषव्यत्ययः' । यस्त्रेधा त्रिविधो भागोऽत्रजीवे पुरा पूर्वतः शाश्वतिकस्वभावतो नित्यरूपतो निहितः स्थितोऽस्ति (अंशान् जानीध्वम्) तत्र भागेंऽशान् निजनिजभागान् जानीध्वं हे जना यूयं स्वीकुरुत (तान् वो विभजामि) तान् युष्मदीयभागान् युष्मभ्यमहमीश्वरो विभजामि (यो देवानां स इमां पारयाति) यश्च भागो देवानां दिव्यधर्माणां भागोऽस्ति स इमाममृतदेवतां पारयाति समर्थयति॥

भाषार्थ—(देवानां पितॄणां मर्त्यानां वो यस्त्रेधा भागः पुरा निहितः) देवों पितरों और मर्त्यों अर्थात् दिव्यगुणपदार्थों पालकधर्मियों और शीघ्र २ मरणधर्मियोंका भाग जीवके अन्दर पूर्वसे ही रखा है (अंशान् जानीध्वम्) इस भाग में अंशों को अपने २ अवयवोंको स्वीकार करो (तान् वो विभजामि) उन तुम्हारे भागों को मैं इस शरीरमें विभक्त करता हूँ (यो देवानां स इमान् पारयाति) जो दिव्यधर्मों का भाग है वह इस जीवरूप अमर देवताको समर्थ बनाता है॥

शिक्षा—शरीरके अन्दर ईश्वरने तीन धर्मों वाले पदार्थों के अंश रखे हैं। जिनमें एक दिव्यधर्मवाले दूसरे पालकधर्मवाले तीसरे बारम्बार नष्टहोने वाले हैं। इन तीनोंमें जो दिव्यधर्म वाले पदार्थ हैं वे इस जीवशक्तिको धारण करते हुए समर्थ बनाते हैं।

इस मन्त्रमें पालकधर्मी पदार्थों के लिये पितर शब्द आया है । उन सामष्टिक पालकधर्मी पदार्थों का अंश जीव शरीरके अन्दर पालनधर्मसे वर्तमान है॥

श्येनो नृचक्षा दिव्यः सुपर्णः सहस्रपाच्छतयोनिर्वयोधाः।
स नो नियच्छाद्व वसु यत् पराभृतमस्माकमस्तु पितृषु स्वधावत्॥
अथ०। ७। ४१। २

(नृचक्षा दिव्यः सुपर्णः सहस्रपाच्छतयोनिर्वयोधाः श्येनः) यो नृचक्षा नृणां दर्शयिता दिव्यो द्युलोके स्थितः सुपर्णः सुपतनः सहस्रपात्–असंख्यरश्मिधारासञ्चारी शतयोनिरसंख्यानां लोकानां योनिः सम्बन्धको वयोधाः प्राणधारयिता प्राणप्रेरकः "प्राणो वै वयः" (ऐ० १ । २८) "श्येन इन्द्रः सूर्यः" (नि० ११ । २) (स नो वसु नियच्छात्) स सूर्यो नोऽस्मभ्यं वसु वासयितव्यं तेजोधनं नियच्छाद् ददातु (यत् पितृषु स्वधावत्) यद्वसु पितृषु रश्मिषु स्वधावदुदकवदस्तीतिशेषः (अस्माकं पराभृतमस्तु) तदस्माकं पराभृतं सुपोषणनिमित्तमस्तु ॥

भाषार्थ—(नृचक्षा दिव्यः सुपर्णः) जो प्राणियोंको दृष्टिशक्ति देनेवाला द्युलोकस्थ प्रकाशस्वरूप (सहस्रपाच्छतयोनिः) असंख्य रश्मिधाराओंका सञ्चारक पृथिवी आदि असंख्य लोकोंको स्वप्रकाशसे सम्बन्ध करने वाला (वयोधा श्येनः) प्राणियों के प्राणका धारण करानेवाला सूर्य (स नो वसु नियच्छात्) वह हमारे लिये अपना तेजोरूप धन प्रदान करे (यत् पितृषु स्वधावत्) जो रश्मियों के अन्दर जलके साथ विद्यमान है (अस्माकं पराभृतमस्तु) वह हमारे लिये सुपोषणका निमित्त हो ॥

शिक्षा—आकाशके मध्य सूर्य असंख्य रश्मिधाराओंको फेंकता हुआ सब प्राणियोंके जीवनका हेतु बनता है। वह अपने सजल तेजको जोकि रश्मियोंके अन्दर वर्तमान है उसको हमारे लिये प्रदान करता है ॥

इस मन्त्रमें सूर्यरश्मियोंके लिये पितर शब्द आया है और उनके अन्दर सजल तेज प्राणियोंके हितके लिये वर्तमान है ऐसा वर्णन है। उनके प्रति किसी कर्तव्यका विधान नहीं है ॥

पितॄणां भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥ अथ० १० । ५ । १३

(पितॄणां भाग स्थ) इमा आपो जलानि पितॄणां रश्मीनां भागाः सन्ति । 'अत्र जडवस्तुसम्बन्धप्रकरणमुत्तरमन्त्रे "देवस्य सवितुर्भाग स्थ" इति च लिङ्गम् । प्रत्यक्षं च जलानि सूर्यरश्मय आकर्षन्ति तस्माद्वयं प्रार्थयामहे (अपां शुक्रं वर्चः) यदपां जलानां शुक्रं वीर्यं बलं वर्चश्च (देवीरस्मासु धत्त) हे आपो देव्योऽस्मासु धत्त धारयत (प्रजापतेर्वो धाम्ना अस्मै लोकाय सादये) प्रजापतेः परमेश्वरस्य धाम्ना धारकस्थानेनाहं निजशरीरेऽस्मै लोकाय पृथिवीलोकनिवासाय सादये स्थापयामि ॥

भाषार्थ—(पितॄणां भाग स्थ) ये पृथिवीके जल सूर्यरश्मियोंके भाग हैं। क्योंकि वे इनको आकर्षण करती हैं। इस लिये हम प्रार्थना करते हैं कि (अपां शुक्रं

वर्चः) कि जो जलोंका बल और वेग है उसको (देवीरस्मासु धत्त) जल हमारे अन्दर धारण करावें (प्रजापतेर्वो धाम्ना अस्मै लोकाय सादये) प्रजापति परमेश्वर के धारक स्थानसे मैं अपने शरीरमें इस पृथिवीलोकके निवासार्थ स्थापित करता हूँ ॥

शिक्षा—पृथिवी से वाष्परूपमें उठकर जल सूर्यरश्मियोंका भाग बन जाता है और जो प्रजापति परमेश्वरके नियमित मेघमण्डल स्थानमें रहता है वह पुनः वृष्टि के द्वारा पृथिवी पर आकर प्राणियोंके जीवन धारणका हेतु बनता है ॥

इस मंत्रमें सूर्यरश्मियों के लिए पितर शब्द आया है। और वाष्पीभूत मेघ मण्डलस्थ जल उनका भाग अर्थात् उनके आश्रय रहने वाला जलांश है ॥

ये ते पूर्वे परागता अपरे पितरश्च ये ।
तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती ॥ अथर्व० १८ । ३ । ७२

इस मन्त्रमें सूर्य किरणोंके लिये पितर शब्द आया है, और उनसे ताडित होकर वृष्टिधाराका पृथिवी पर प्राप्त होना दर्शाया है। विवरण के लिये देखो सूक्त० १८ । ३ । ७२ (पृष्ठ १८०)

सोदक्रामत् सा पितॄनागच्छत् तां पितर उपाह्वयन्त स्वध एहीति ।
अथ० ८ । १३ । ५

तां स्वधां पितर उपजीवन्त्युपजीवनीयो भवति य एवं वेद ।
अथ० १८ । १३ । ८

वक्तव्य—इन मन्त्रोंके अर्थ समझनेमें पूर्वापर मन्त्रोंका पाठ अपेक्षित है अतः प्रथम निम्नप्रदर्शित पूर्वके मन्त्रोंका पाठ करें—

यां प्रच्युतामनु यज्ञाः प्रच्यवन्त उपतिष्ठन्त उपतिष्ठमाना म् ।
यस्या वृते प्रसवे यक्षमेजति सा विराडृषयः परमे व्योमन् ॥
अथ० ८ । ९ । ८

विराड् वेदमग्र आसीत्० ॥ ८ । ११ । १

तथा प्रकृत मन्त्रोंसे अगले मन्त्र भी निम्नप्रदर्शित देखें—

सोदक्रामत् सा मनुष्यानागच्छत् तां मनुष्या उपाह्वयन्तेरावत्येहीति ॥९॥
तस्या मनुर्वैवस्वतो वत्स आसीत् पृथिवी पात्रम् ॥ १० ॥

तां पृथी वैन्योधोक् तां कृषिं च सस्यं चाधोक् ॥ ११ ॥
ते कृषिं च सस्यं च मनुष्या उपजीवन्ति कृष्टराधिरुपजीवनीयो भवति
य एवं वेद ॥ १२ ॥
सोदक्रामत् सा सर्पानागच्छत् तां सर्पा उपाह्वयन्त विषवत्येहीति ॥
अथ० ८ । १४ । १३

(य एवं वेद स प्रजापतेश्च परमेष्ठिनश्च पितुश्च पितामहस्य च प्रियं धाम भवति) जो इस प्रकार जानता है वह पूर्वोक्त हिरण्यगर्भ आदिकोंका पात्र बनता है ॥

शिक्षा—सृष्टिका मूलरूप बीजसमूह सृष्ट्युत्पत्ति के लिये सूक्ष्मस्थानों तक में गति करता है । वह सृष्टिकी जननशक्ति तथा अलग २ सृष्टिके शुक्ररूप बीज और काल वा सूर्यको प्राप्त होता है पुनः स्थूल शरीर की ओर चलता है ॥

यहां संवत्सरके लिये पिता और सूर्य के लिये पितामह शब्दका प्रयोग है।

स महिमा सद्रुर्भूत्वान्तं पृथिव्या अगच्छत् स समुद्रोभवत् ॥
तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चापश्च श्रद्धा च वर्षं भूत्वानुव्यवर्तन्त ॥ अथर्व० १५ । ७ । १, २

(स महिमा सद्रुर्भूत्वा पृथिव्या अन्तमगच्छत् स समुद्रोऽभवत्) स एव सृष्टिबीजसमूहो महिमा महत्वमापन्नः सद्रुः सन्द्रुः सम्यग्द्रवणशीलो भूत्वा 'समो-मकारलोपश्छान्दसः' पृथिव्या अन्तं निम्नस्थानमगच्छत् ॥ १ ॥

(तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चापश्च श्रद्धा च वर्षं भूत्वा-ऽनुव्यवर्तन्त) तं सृष्टिबीजसमूहं हिरण्यगर्भो व्यक्तिबीजं संवत्सरः सूर्योऽन्तरिक्ष-जलानि श्रद्धा तेजः "तेज एव श्रद्धा" (श० ११ । ३ । १ । १) वर्षं वर्षा, इमे सर्वे भूत्वा प्राप्य । 'भू धातुरत्र प्राप्त्यर्थः' अनुव्यवर्तन्तानुविवर्तन्ते साहाय्यं कुर्वन्ति ॥ २ ॥

भाषार्थ—(स महिमा सद्रुर्भूत्वा) वह सृष्टिबीजसमूह महत्वको प्राप्त हुआ म्यग् द्रवणशील होकर (पृथिव्या अन्तमगच्छत्) पृथिवी के नीचे स्थान को प्राप्त हुआ (स समुद्रोऽभवत) वह समुद्र हो गया ॥ १ ॥

(तं प्रजापतिश्च परमेष्ठी च) उस सृष्टिबीजसमूह को हिरण्यगर्भ जनन-शक्ति और व्यक्तिबीज (पिता च पितामहश्च) संवत्सररूपकाल और सूर्य (आपश्च)

श्रद्धा च वर्षम्) अन्तरिक्ष के जल, तेज और वर्षा ये सब ('भूत्वानुव्यवर्तन्त) प्राप्त होकर सहायता करते हैं ॥ २ ॥

शिक्षा—सृष्टिबीजसमूह विस्तार को प्राप्त करता हुआ द्रवणशील होकर पृथिवीके नीचाङ्गमें समुद्रके रूपमें प्रकट हुआ। वहां उसको जननशक्ति और व्यक्तिबीज संवत्सर और सूर्य अन्तरिक्ष के जल और तेज तथा वर्षा प्राप्त होकर सृष्ट्युत्पत्ति के लिये उसके सहायक बनते हैं॥

यहां पर भी पूर्व के समान संवत्सर और सूर्य के लिये पिता और पितामह शब्द आये हैं ॥

नैतां विदुः पितरो नोत देवा येषां जल्पिश्चरत्यन्तरेदम् ।
त्रिते स्वप्नमदधुराप्त्ये नर आदित्यासो वरुणेनानुशिष्टाः ॥

अथर्व० १९ । ५६ । ४

(वरुणेनानुशिष्टा आदित्यासो नर आप्त्ये त्रितेऽदधुः) वरुणेन जन्मदानार्थं वरयित्रा धर्मपतिना देवेन। "वरुण धर्मणां पते" (तै० ३ । ११ । ४ । १) अनुशिष्टाः प्रेरिता आदित्यासो मासा नरः शरीरनेतारः "द्वादशमासाः संवत्सरस्यैत आदित्या एते हीदं सर्वमाददाना यन्ति" (श० ११।६।३।८) आप्त्ये-आप्तव्ये प्राप्तव्ये त्रिते स्थूल-सूक्ष्मकारणशरीरे स्थानत्रये वर्तमाने-इन्द्रे जीवात्मनि स्वप्नमदधुर्धारयन्ति। "आप्त्य-माप्तव्यम्" (निरु० ११ । २१) "त्रितस्त्रिस्थानः" (निरु० ६ । २५) (या जल्पिरेषामन्तरेदं चरति) या जल्पिर्जल्पना स्वप्नस्य व्यक्तभावनैषामन्तरा मध्ये वर्तमानेदं प्रत्यक्षं चरति प्राप्नोति (एतां पितरो न विदुर्नोत देवाः) एतां जल्पि स्वप्नप्रवृत्तिं पितरः प्राणा न विदुर्न जानन्ति नोत नापि देवा इन्द्रियाणि जानन्ति ॥

भाषार्थ—(वरुणेनानुशिष्टा आदित्यासो नर आप्त्ये त्रितेऽदधुः) जन्मदानार्थ वरने वाले धर्मपतिदेवसे प्रेरित शरीर के नायक महीने प्राप्त करने योग्य स्थूल, सूक्ष्म कारण शरीर में वर्तमान जीवात्मा के अन्दर स्वप्न को धारण कराते हैं (या जल्पि-रेषामन्तरेदं चरति) जो स्वप्न को व्यक्तभावना इनके अन्दर वर्तमान होती हुई प्रत्यक्ष प्राप्त होती है (एतां पितरो न विदुर्नोत देवाः) उस स्वप्न की स्मृति को न प्राण जानते हैं और न इन्द्रियां ॥

शिक्षा—जन्मदाता कर्मानुसार जीव को शरीर में भेजता है पुनः उसके नियमों से जैसे २ बालक महिमा को प्राप्त होता जाता है वैसे २ उसका आत्मा कारण

सूक्ष्म और स्थूल शरीर में अभिव्यक्त होकर स्वप्नों का अनुभव करता है जो कि उसके प्राणों और इन्द्रियों के अन्दर विचरता हुआ प्रतीत होता है ॥

इस मन्त्रमें प्राणोंके लिये पितर शब्द आया है ॥

·······पितरो नाराशंसाः ॥ यजु० ८ । ५८

(पितरः) ज्ञानिनः (नाराशंसाः) नरानाशंसन्ति नराशंसानामिम उपदेशकाः । इति दयानन्दः ॥

भाषार्थ—(पितरः) ज्ञानी जन (नाराशंसाः) जो मनुष्यों को श्रेष्ठ बनाने वाले उपदेशक हैं वे हमारी रक्षा करें ॥

शिक्षा—विद्वानों को अपना उपदेशक बनाना चाहिये मूर्खों को नहीं ॥

इस मन्त्रमें पितर शब्द ज्ञानी जनों के लिये आया है ॥

जीवं रुदन्ति विमयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥
ऋ० १० । ४० । १०

जीवं रुदन्ति वि नयन्त्यध्वरं दीर्घामनु प्रसितिं दीध्युर्नरः ।
वामं पितृभ्यो य इदं समीरिरे मयः पतिभ्यो जनये परिष्वजे ॥
अथ० १४ । १ । ४६

(नरो जीवं रुदन्ति) नरो मनुष्या जीवं जीवमेकाकिनं स्वकीयं मत्वा रुदन्ति दुःखमनुभवन्ति । अतः (अध्वरे विमयन्ते) अध्वरे यज्ञे विवाहसंस्कारे विमयन्ते भार्यां विवहन्ति । पुनश्च (दीर्घां प्रसितिमनुदीधियुः) दीर्घां चिरकालां प्रसितिं प्रकृष्टबन्धनीं सहयोगितामनुदीधियुः परस्परं क्रीडन्ति (ये पितृभ्य इदं वामं समेरिरे) ये खलु पितृभ्यः पितृधर्मेभ्य इदं वामं श्रेष्ठं सन्तानं समेरिर उत्पादितवन्तः। तेभ्यः (पतिभ्यो जनयो मयः परिष्वजे) पतिभ्यो जनयो जाया मयः सुखं परिष्वजे—आलिङ्गन्ति ॥

भाषार्थ—(नरो जीवं रुदन्ति) मनुष्य अपने एकाकी जीवन को मान कर दुःखानुभव करते हैं । अतः (अध्वरे विमयन्ते) विवाहसंस्काररूपी यज्ञमें भार्या को विवाहते हैं । फिर (दीर्घां प्रसितिमनुदीधियुः) चिरकालीन उत्तम बन्धनी सहयोगिता में परस्पर क्रीडा करते हैं (ये पितृभ्य इदं वामं समेरिरे) जो पितृधर्म

के लिये इस श्रेष्ठ सन्तानको उत्पन्न करते हैं उन (पतिभ्यो जनयो मयः परिष्वजे) पतियोंके लिये स्त्रियां सुख का आलिङ्गन करती हैं ॥

शिक्षा—मनुष्य अपने जीवन को अकेला समझ कर दुःख अनुभव करते हैं। फिर विवाह कर सन्तानोत्पन्न करनेमें प्रवृत्त होते हैं। एवं स्त्रियां भी उनके लिये अनुकूल सुख सम्पादन करती हैं ॥

इस मन्त्र में पितृधर्मों के लिये पितर शब्द आया है और सन्तानोत्पत्ति करके पितृधर्मों की पूर्ति का वर्णन है ॥

यम

इस प्रकरणमें यम शब्द वाले उन मन्त्रों पर विचार किया जावेगा जिनमें यमके स्वरूपका वर्णन है हम "मुख्यशब्दार्थसमन्वय" में यम के सप्रमाण अर्थ दे आए हैं वहां 'काल, आदित्य, वायु, अग्नि, धर्म, राजा, ईश्वर' आदि अर्थ सिद्ध कर आए हैं यहां मन्त्रों में उनके स्वरूप आदि का वर्णन होगा ॥

यमो मृत्युरघमारो निर्ऋथो बभ्रुः शर्वोऽस्ता नीलशिखण्डः ।
देवजनाः सेनयोत्तस्थिवांसस्ते अस्माकं परिवृञ्जन्तु वीरान् ॥

अथ० ६ । ९३ । १

(यमो मृत्युरघमारो निर्ऋथो बभ्रुः शर्वोऽस्ता नीलशिखण्डो देवजना उत्तस्थिवांसस्तेऽस्माकं वीरान् सेनया परिवृञ्जन्तु) यमो यमपदधारको यमनशीलो सेनानायको मृत्युर्मृत्युपदधारको मारणधर्मी सेनानायकोऽघमारोऽघमारपदधारकः पापनाशकः सेनानायको निर्ऋथो निर्ऋथपदधारको हिंसनशीलः सेनानायको बभ्रुर्बभ्रुपदधारको हरणशीलः सेनानायकः शर्वः शर्वपदधारको वधशीलः सेनानायको ऽस्ताऽस्तेति पदस्य धारकोऽस्त्रक्षेपणशीलो नीलशिखण्डो नीलशिखण्डपदधारको नीलो विषसम्पर्केण नीलवर्णः शिखण्डो मयूरपुच्छ इव वाणो यस्य सोऽयं विषसम्पृक्तवाणसाधकः सेनानायक एवं त एते सर्वे देवजना देवानग्निविद्युदादीन् तत्कोपांश्च जनयितारः प्रकटयितार उत्तस्थिवांसो युद्धायोत्थिताः सन्नद्धाः सन्तोऽस्माकं वीरान् सैनिकान् सेनया सेनाक्रमेण सेनानियमेन परिवृञ्जन्तु सर्वतस्त्यजन्तु युद्धकरणाय सर्वतः प्रसारयन्तु ॥

भावार्थ—(यमः) यमपदवीधारक यमनशील सेनानायक (मृत्युः) मृत्युपदवीधारक मारणधर्मी सेनानायक (अघमारः) अघमारपदवीधारक पाप-

नाशक सेनानायक (निऋ॔थः) निऋ॔थ पदवीधारक हिंसनशील सेनानायक (बभ्रुः) बभ्रुपदवीधारक हरणशील सेनानायक (शर्वः) शर्वपदवीधारक वधशील सेनानायक (अस्ता) अस्तापदवीधारक अस्त्रक्षेपणशील सेनानायक (नीलशिखण्डः) नीलशिखण्डपदवीधारक विषसम्पर्क से बाणसाधने वाला सेनानायक (देवजना उत्तस्थिवांसः) एवं ये सब अग्नि विद्युत् आदि तथा उनके प्रयोगोंको प्रकट करनेवाले युद्धके लिये सन्नद्ध हुए (ते अस्माकं वीरान्) वे हमारे वीर सैनिकों को (सेनया परिवृञ्जन्तु) सेनानियम या सेनाक्रमसे युद्ध करनेके लिये सब तरफ फैलावें ॥

शिक्षा—युद्धमें भिन्न २ प्रयोगों के लिये यम आदि आठ प्रकारके सेना नायक होने चाहियें और उनके अधीन सेनाविभाग से सैनिकजन भी होने चाहियें ॥

इस मन्त्रमें युद्धमें यमपदवीधारक यमनशील सेनानायक के लिये यम शब्द आया है ॥

मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
अथोयमस्य पड्वीशात् सर्वस्माद्देवकिल्विषात् ॥ ऋ० १०।९७।१६
यजु० १२ । ९०, अथ० ६ । ९६ । २ तथा ७ । ११२ । २

(शपथ्यादथो वरुण्यादथो यमस्य पड्बोशादुत सर्वस्माद्देवकिल्विषान्मा मुञ्चन्तु) हे विद्वांसो वैद्याः ! ओषधयः शपथकर्मणोऽपि वरेषु भवादपराधाद्वरुणरोगाद्वाऽथ न्यायाधीशस्य न्यायविरोधाचरणात् समयस्य प्रतिकूलाचरणाद्वा सर्वस्माद्विद्वत्सवपराधकरणादिन्द्रियविपरीताचरणकृतरोगाद्वा मां पृथक् कुर्वन्तु । तथा च दयानन्दः ॥

भावार्थ—(शपथ्यात्) हे वैद्य महानुभावो! ओषधियां शपथसम्बन्धी कर्मसे अर्थात् पूजनीय पुरुषके कठोर भर्त्सनके शोकसे (अथो वरुण्यात्) और श्रेष्ठोंमें हुए अपराधसे अथवा वरुणरूप मोहसे वा वरुण रोगसे (अथो यमस्य पड्वीशात्) न्यायाधीशके न्यायविरोधसे अर्थात् राजद्रोहसे परतन्त्रताके दुःखसे या समयके प्रतिकूल आचरणसे (सर्वस्माद्देवकिल्विषात्) सभी प्रकारके विद्वानोंके अनादररूप अपराधसे या इन्द्रियोंके अनिष्टाचरणसम्बन्धी रोगसे (मा मुञ्चन्तु) मुझे पृथक् करें ॥

शिक्षा—वैद्यों को चाहिये कि ओषधियोंके उपयोगद्वारा मनुष्योंके सब प्रकारके रोगोंको शान्त करें और अपने आप भी रोग-रहित रहें ॥

इस मन्त्रमें न्यायाधीश तथा समयके अर्थमें यम शब्द आया है ॥

अमुत्र भूयादध यद्द यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥
यजुः २७ । ९, अथ० ७ । ५३ । १

(बृहस्पतेऽमुत्र भूयादभिशस्तेरमुञ्चः) हे बृहस्पते ! परजन्मनि भाविनः सर्वतोऽपराधान्मुच्याः (अध यद् यमस्य मृत्युमग्नेऽश्विना शचीभिर्भिषजा प्रत्यौहताम्) अथ च यन्नियन्तुर्मारकं सद्वैद्यौ तथाऽध्यापकोदेशकौ कर्मभिरौषधानि वितर्केण साध्नुताम् (अस्मादेवानाम्) अस्माच्च विदुषामारोग्यं सम्पादयताम् । इति दयानन्दः ॥

भाषार्थ—(बृहस्पतेऽमुत्र भूयादभिशस्तेरमुञ्चः) हे बृहस्पति ! परजन्ममें होने वाले सब अपराधोंसे छुटकारा दे (अध यद् यमस्य मृत्युमग्नेऽश्विना शचीभिर्भिषजा प्रत्यौहताम्) और जो राष्ट्रपति नियन्ताका भी मारने वाला है उसको अच्छे वैद्य अथवा अध्यापकोपदेशक अपने कर्मों और औषधों तथा वितर्कसे उसको सिद्ध करें (अस्मादेवानाम्) इसी प्रकार विद्वानोंके आरोग्यका सम्पादन करें ॥

शिक्षा—जगदीश देव परमात्मा मनुष्योंके कर्मानुसार दूसरे जन्ममें फल भोग कराता है उससे बड़ेसे बड़ा अपराधी सम्राट भी नहीं बच सकता ॥

इस मन्त्रमें नियन्ता राष्ट्रपतिके लिये यम शब्द आया है ॥

ज्येष्ठघ्न्यां जातो विचृतोर्यमस्य मूलबर्हणात् परि पाह्येनम् ।
अत्येनं नेषद्दुरितानि विश्वा दीर्घायुत्वाय शतशारदाय ॥

अथ० ६ । ११० । २

(ज्येष्ठघ्न्यां जातो विचृतोर्यमस्यैनं मूलबर्हणाद् विश्वा दुरितान्यतिनेषच्छतशारदाय दीर्घायुत्वाय परिपाहि) ज्येष्ठसन्तानघातन्यां स्त्रियां जात उत्पन्नो बालोऽथवा विचृतोर्विशिष्टसम्पृक्तयोर्बालकयोर्यमस्य युगलस्य मध्यादेनमेकैकं जीवितं वा बालं मूलबर्हणान्मूलछेदनान्नाडीछेदनादारभ्य विश्वा दुरितानि सर्वसङ्कटान्यतिनेषदतिनयेदुल्लंघयेच्छतशारदाय शतवार्षिकाय दीर्घायुत्वाय दीर्घजीवनाय परिपाहि परिरक्ष । इति जयदेवः ॥

भाषार्थ—(ज्येष्ठघ्न्यां जातः) जेष्ठसन्तान जिसकी मर जाती है ऐसी प्रसूत स्त्रीमें उत्पन्न हुआ बालक अथवा (विचृतो र्यमस्य) विशिष्ट सम्पृक्त बालकोंमें जो जोडेका बालक है (एनं मूलबर्हणात्) उसकी नाड़ीछेदनसे ही (विश्वा दुरितान्यतिनेषत्) सब सङ्कटोंको दूर हटाकर (शतशारदाय दीर्घायुत्वाय परिपाहि) सौ वर्षके दीर्घजीवनके लिये रक्षा करनी चाहिये ॥

शिक्षा—जिस स्त्रीका पहला बालक मर गया हो ऐसी स्त्री में फिर दुवारा हुई सन्तानका अथवा युगल सन्तानका नाड़ीछेदनकालसे ही रक्षण करना चाहिये ॥

इस मन्त्रमें युगल अर्थमें यम शब्द आया है ॥

ये दक्षिणतो जुह्वति जातवेदो दक्षिणाया दिशोभि दासन्त्यस्मान् ।
यममृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥

अथ० ४ । ४० । २

(जातवेदो ये दक्षिणाया दिशोऽस्मानभिदासन्ति) हे जाते जाते विद्यमान सूर्य ! ये पीडकजन्तवो दक्षिणाया दिश आगत्यास्मानभिदासन्ति पीडयन्ति तथा च (दक्षिणतो जुह्वति) दक्षिणतोऽङ्गान् जुह्वति-अदन्ति । 'हु दानादनयोरित्यदनार्थः' (ते यममृत्वा पराञ्चो व्यथन्ताम्) ते यमं त्वां सूर्यं प्राप्य प्राञ्चः सम्मुखं सन्तो व्यथन्तां व्यथां प्राप्नुवन्ति (एनान् प्रतिसरेण हन्मि) एनानहमपि प्रतिसरेण प्रतिकरणेन प्रतिकाररूपेणौषधेन प्रत्यक् सम्मुखं हन्मि प्रतिकरोमि प्रतिगच्छामि ॥

भाषार्थ—(जातवेदो ये दक्षिणाया दिशोऽस्मानभिदासन्ति) हे उत्पन्न वस्तु मात्रके अन्दर विद्यमान सूर्य ! जो पीड़कजन्तु दक्षिण दिशासे आकर हमको पीड़ित करते हैं तथा (दक्षिणतो जुह्वति) दक्षिणके अङ्गोंको खाते हैं (ते यममृत्वा पराञ्चो व्यथन्ताम्) वे तुझ सूर्यको प्राप्त हो सम्मुख हुए पीड़ित हों (एना प्रतिसरेण हन्मि) इनका मैं भी प्रतिकाररूप औषधसे प्रतिकार करता हूँ ॥

शिक्षा—सूर्य अपनी रश्मियोंसे दंशमशकादि पीड़क जन्तुओं को नष्ट करता है अतः उसके रश्मिसञ्चारके लिये घरमें अन्य दिशाओंके समान दक्षिणमें भी वातायनादि होने चाहियें ॥

इस मन्त्रमें सूर्यके लिये यम शब्द आया है ॥

मा वो मृगो न यवसे जरिता भूदजोष्यः । पथा यमस्य गादुप ॥

ऋ० १ । ३८ । ५

(मृगो न यवसे वो जरिताऽजोष्यो मा भूत्) मृग इव घास एतेषां मरुतां स्तोता जनोऽसेवनीयो न भवेत् (यमस्य पथोपगात्) निग्रहीतुर्वायोः श्वासप्रश्वासरूपेण मार्गेण न गच्छेत् । इति दयानन्दः ॥

भाषार्थ—(मृगो न यवसे वो जरिताऽजोष्यो मा भूत्) मृग जैसे घास में विचरता हुआ न हटाना चाहिये या न पकड़ना चाहिये एवं इन मनुष्योंका स्तुति करने वाला किसी प्रकार भी पकड़में नहीं आ सकता (यमस्य पथोपगात्) पकड़ने वाले वायु के श्वासप्रश्वासरूप मार्ग से न जावे ॥

शिक्षा—जो मनुष्य दूसरे मनुष्यों का यश गाता है यथावत् स्तुति करता है निन्दा नहीं वह मनुष्य किसीकी पकड़में नहीं आता ॥

इस मन्त्रमें वायुके लिये यम शब्द आया है ॥

वीलुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना।
तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय॥ ऋ० १।११६।२

(शाशदाना नासत्या वीलुपत्मभिराशुहेमभिर्वा देवानां जूतिभिर्वा तद्रासभः प्रधन आजा यमस्य सहस्रं जिगाय) छेदकौ सत्यस्वभावौ बलेन पतनशीलैः शीघ्रं गमयद्भिर्वा विदुषां युद्धक्रियाभिर्वा पुरुषः प्रकृष्टे संग्रामे शत्रुसमूहस्यासंख्यातं जयेत्। इति दयानन्दः ॥

भाषार्थ—(शाशदाना) छेदन करनेवाले (नासत्या) सत्यस्वभाववाले (वीलुपत्मभिः) बल से पतनशीलोंद्वारा (आशुहेमभिः) शीघ्र ले जानेवालों से या (देवानां जूतिभिर्वा) विद्वानोंकी क्रियाओंसे (तद्रासभः) वह पुरुष (प्रधन आजा) बड़े संग्राममें (यमस्य सहस्रम्) शत्रुसमूहके असंख्य बलको (जिगाय) जीते ॥

शिक्षा—अग्नि और विद्युत् द्वारा शीघ्रकारी अस्त्रों से बड़े भारी संग्राम में विजय प्राप्त करना चाहिये ॥

इस मन्त्रमें यमनशील शत्रुसमूह या शत्रु के अर्थमें यम शब्द आया है॥

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥
ऋ० १०। १७। १, अथ० १८। १। ५३

इस मन्त्र में दिवसके अर्थमें यम शब्द आया है । यहां पर उषा के उदय होने और दिनके प्रकाश तथा रात्रि के नाश का वर्णन है । विवरणके लिये देखो सूक्त अथ० १८ । १ । ५३ (पृष्ठ १२०)

वैवस्वतः कृणवद्‌ भागधेयं मधुभागो मधुना संसृजाति।
मातुर्यदेन इषितं न आगन् यद्वा पितापराद्धो जिहीडे ॥
अथ० ६। ११६। २

(वैवस्वतो भागधेयं कृणवत्) वैवस्वतः कालः समयो भागधेयं जीवनभागं कृणवत्करोति (मधुभागो मधुना संसृजाति) मधुभागो रसभागो जीवनरसस्य भागकर्ता मधुना रसेन मां संयोजयति (मातुर्यदेन इषितं न आगन् यद्वा पिताऽपराद्धो जिहीडे) मातुरिषितं मातुः शरीरान्निर्गतमेनः पापमागच्छत् यद्वा पितुः शरीरादपराद्धो दोषो जिहीडे ताडयामि ॥ . . . .

भाषार्थ—(वैवस्वतो भागधेयमकृणवत्) विवस्वान् सूर्यसे उत्पन्न हुआ समय यद्यपि जीवनके भाग को बनाता है (मधुभागो मधुना संसृजाति) जीवनरसका भाग करने वाला वह भाग मुझे जीवनरससे संयुक्त करता है (मातुर्यदेन इषितं न आगन्) माताकी ओर से जो त्रुटि मेरेमें प्राप्त हुई है (यद्वा पितापराद्धः) अथवा पिताके शरीर से जो विकार मेरे में आया है (जिहीडे) मैं उसे द्वेष पूर्वक ताडित करता हूँ ॥

शिक्षा—सूर्यकी गतिसे उत्पन्न हुए काल ने मेरे जीवनका निर्माण किया है। इस जीवन में यदि माता के गर्भ या पिता के वीर्य से कोई दोष जीवनका बाधक आ गया हो तो उसको चिकित्सा और सुनियमके आचरणसे दूर कर देना चाहिये ॥

इस मन्त्रमें विवस्वान् के उत्पन्न हुए प्रारम्भिक कालके लिये यमशब्द आया है जोकि प्राणियोंके जीवनभाग का निर्माता है ॥

विष्टारिणमोदनं ये पचन्ति नैनानवर्त्तिः सचते कदाचन।
आस्ते यम उपयाति देवान्त्सं गन्धर्वैर्मदते सोम्येभिः ॥

अथ० ४ । ३४ । ३

(ये विष्टारिणमोदनं पचन्ति) येऽधीतविद्या विष्टारिणं विस्तारयति जीवनं यन्तमोदनं रेतो निजशरीरे पचन्ति पक्वं कुर्वन्ति। "रेतो वा ओदनः" (१३ । १।१।४) (नैनानवर्तिः कदाचन सचते) एतान् जनानवर्त्तिरवर्तनमालस्यमवरणं निराशत्वं च कदाचन कदापि न सचते सम्बध्नाति (यमे—आस्ते) यमे जीवनकाले पूर्णायुषि आस्ते तिष्ठति (गन्धर्वैः सोम्येभिर्देवान् सम्मदते) गन्धर्वैः सूर्यरश्मिभिः सोम्येभिः चन्द्रदीधितिभिश्च सह देवान् दिव्यगुणान् संयोजयति। 'मद तृप्तियोग इति योगार्थः' ॥

भाषार्थ—(ये विष्टारिणमोदनं पचन्ति) जो शिक्षित जन जीवनविस्तारके हेतुरूप वीर्यको निजशरीरमें पकाते हैं (नैनानवर्त्तिः कदाचन सचते) इनको आलस्य और निराशा कभी प्राप्त नहीं होती (यमे-आस्ते) जीवनकाल अर्थात् पूर्णायुमें स्थिर होते हैं (गन्धर्वैः सोम्येभिर्देवान् सम्मदते) सूर्यरश्मियों और चन्द्रकिरणोंके द्वारा दिव्यगुणोंसे संयुक्त होता है ॥

शिक्षा—वीर्यधातु शरीरकी उन्नतिका कारण है। जो लोग इसको अपने शरीरके अन्दर धारण करते हैं, अपक्वका व्यय नहीं करते हैं उन संयमी पुरुषों के प्रति आलस्य और निराशा पास नहीं फटकते। और अपने जीवनकालमें अथवा

पूर्णायुमें स्थिर हुये सूर्य और चन्द्रकी रश्मियोंसे अनेक दिव्य गुणों का लाभ प्राप्त करते हैं ॥

इस मन्त्रमें जीवनकालके लिये यम शब्द आया है और ब्रह्मचर्य पालन से उसमें स्थिर रहनेका वर्णन है ॥

भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम् ।
भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः ॥ ऋ० १० । १६४ । २

(वैवस्वते भद्रं वै वरं वृणते) वैवस्वते जीवनकालाय भद्रं कल्याणकरं वै वरं वरणीयं वाममङ्ग वृणते स्वीकुर्वन्ति (भद्रं दक्षिणं युञ्जन्ति) भद्रं दक्षिणमङ्गं युञ्जन्ति प्राप्नुवन्ति (भद्रं चक्षुर्बहुत्रा जीवतो मनः) भद्रं चक्षुर्बहुत्रा बहुविषयकं सर्वविषयकं मनो जीवतो मनुष्यस्येच्छन्ति ॥

भाषार्थ—(वैवस्वते भद्रं वै वरं वृणते) जीवनकालके लिये कल्याणकारी वाएं अङ्गको लोग चाहते हैं (भद्रं दक्षिणं युञ्जन्ति) कल्याणकारी दक्षिण अङ्गको भी चाहते हैं (भद्रं चक्षुर्बहुत्रा जीवतो मनः) आंख भी कल्याणकारी और बहुतविषयवाला मन भी कल्याणकारी ही चाहते हैं ॥

शिक्षा—मनुष्योंको चाहिये कि अपने जीवनकालको उपयोगी बनाने के लिये दाएं बाएं अङ्गों, इन्द्रियों और मन से सदा कल्याण साधक पुण्यमार्गका आचरण किया करें ॥

इस मन्त्रमें जीवनकालके लिये यम शब्दका प्रयोग है और उसकी कल्याणमय स्थिति बनानेके लिये प्रार्थना है ॥

विष्टारिणमोदनं ये पचन्ति नैनान् यमः परि मुष्णाति रेतः ।
रथीह भूत्वा रथयान ईयते पक्षी ह भूत्वाति दिवः समेति ॥
अथ० ४ । ३४ । ४

(ये विष्टारिणमोदनं पचन्ति) पूर्ववद् ये जना जीवनविस्तारनिमित्तं वीर्यं निजशरीरे पक्वं कुर्वन्ति स्थापयन्ति (नैनान् रेतो यमः परिमुष्णाति) एनानेतेषां रेतो वीर्यं यमो जीवनकालो न परिमुष्णाति न स्खलयति वीर्यविकारं न करोति 'एनानिति विभक्तिव्यत्ययः' (रथीह भूत्वा रथयाने ईयते) रथी रथवानिव भूत्वा रथयाने शरीर ईयते गच्छति (पक्षी ह भूत्वा दिवः समेति) पक्षीव भूत्वा दिवो द्युलोकान् मेघमण्डलादीन् लोकान् समेति सम्यग्गच्छत्यदुःखेन गच्छति ॥

भाषार्थ—(ये विष्टारिणमदनं पचन्ति) जो शिक्षित जन जीवनविस्तार

के कारण वीर्यको निज शरीरमें धारण करते हैं (नैनान् रेतो यमः परिमुष्णाति.) इनके वीर्य को जीवनकाल स्खलित नहीं करता वीर्य विकारको उत्पन्न नहीं करता है (रथी ह भूत्वा रथयान ईयते) रथवान् जैसा होकर शरीर रथके यातव्य संसार मार्गमें यात्रा करता है (पक्षी ह भूत्वा दिवः समेति) पक्षीके तुल्य होकर मेघ मण्डलादि स्थानोंको देहपातके अनन्तर अच्छी तरहसे जाता है ॥

शिक्षा—ब्रह्मचर्य पालन करनेसे जीवन भरमें कभी वीर्यदोष नहीं हो सकता तथा अपने शरीरका स्वामी बनकर उससे उचित संसारयात्रा करता है तथा मेघमण्डलादि स्थानोंको भी सुखसे प्राप्त होता है ॥

इस मन्त्रमें भी पूर्वके समान जीवन कालके लिये यम शब्द आया है और ब्रह्मचर्यके सेवनसे जीवन भरमें किसी वीर्य रोगके न होनेका वर्णन है ॥

यदुलूको वदति मोघमेतद्य यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥

ऋ० १० । १६५ । ४

(यदुलूको मोघं वदति) विषं विषप्रयोगं विषवन्तं वा जनं दृष्ट्वोलूकः पक्षी मोघमकस्माद् मोहमापन्नः सन् वदति (यदेतत्कपोतोऽग्नौ पदं कृणोति) यदैतत् तथैव कपोतः पक्षी विषं विषप्रयोगं विषवन्तं वा जनं दृष्ट्वा भयभीतो मोहमाप्तोऽग्नौ पदं कृणोति पादं प्रक्षिपति (यस्य एष दूतः प्रहितः) यस्य मृत्योरेष उलूकः कपोतो वा दूतः प्रहितः प्रेरित इव सन् तन्मृत्युसूचकः सन् पूर्वोक्तं व्यापारं करोति (तस्मै मृत्यवे यमाय नमोऽस्तु) तस्मै मारकाय कालाय समयाय नमो यज्ञस्तत्प्रतिकारो वज्रं वाऽस्तु। एवंविषपरीक्षणप्रयोगः सुश्रुतेऽपि निदर्शितस्तद्यथा "चकोरस्याक्षिवैराग्यं जायते क्षिप्रमेव तु ॥२८॥ दृष्ट्वान्नं विषसंसृष्टं म्रियन्ते जीवजीवकाः । कोकिलः स्वरवैकृत्यं क्रौञ्चस्तु मदमृच्छति ॥ २९ ॥ हृष्येन्मयूर उद्विग्नः क्रोशतः शुकसारिके । हंसः क्ष्वेडति चात्यर्थं भृङ्गराजस्तु कूजति ॥ ३० ॥ पृषतो विसृजत्यश्रु विष्ठां मुञ्चति मर्कटः । सन्निकृष्टांस्ततः कुर्याद्राजस्तान् मृगपक्षिणः । वेश्मनोऽथ भूषार्थं रक्षार्थञ्चात्मनः सदा" (सुश्रुतस्य कल्पस्थाने १ । २२-३२) ॥

भाषार्थ—(यदुलूको मोघं वदति) जिससे कि उल्लू पक्षी विष, विषप्रयोग या विषवाले मनुष्यको देखकर अकस्मात् मोहको प्राप्त हुआ बोला करता है (यदेतत् कपोतोऽग्नौ पदं कृणोति) उसी प्रकार कबूतर पक्षी विष, विषप्रयोग या विषवाले मनुष्य को देखकर भयभीत हुआ मोह को प्राप्त हुआ अग्निमें पैर रखता है (यस्य एष दूतः प्रहितः) जिस मृत्युका उलूक या कबूतर दूतके समान सूचक होकर पूर्वोक्त व्यापार

करता है (तस्मै मृत्यवे यमाय नमोऽस्तु) उस मारने वाले समयके लिये उसका प्रतिकार होना चाहिये ॥

शिक्षा—विष, विषप्रयोग या विष वाले मनुष्यको देखकर उल्लू घबरा कर अकस्मात् बोला करता है और कबूतर घबराकर अग्निकी तरफ जाता है। इसप्रकार पक्षियोंके उत्पातको देखकर मृत्युसमयका अनुमानकर उसका प्रतिकार करना चाहिये ॥

इस मन्त्रमें कालके लिये यम शब्द आया है ॥

यः प्रथमः प्रवतमाससाद बहुभ्यः पन्थामनुपस्पशानः ।
योऽस्येशे द्विपदो यश्चतुष्पदस्तस्मै यमाय नमो अस्तु मृत्यवे ॥
अथ० ६ । २८ । ३

(यः प्रथमो बहुभ्यः प्रवतं पन्थामनुपस्पशान आससाद) यः प्रथमतया प्रकटी भूतो यमः कालो बहुभ्यः प्रकारेभ्यः प्रवतमुद्गतं निवतं वृद्धयुवकशिशुस्थं पन्थां मार्गमनुपस्पशानः पाशयमान आससाद प्राप्तवान् "पश्यत सूक्त० (ऋ० १०।१४।१-२पृ० १८)" (योऽस्य द्विपदश्चतुष्पद ईशे तस्मै मृत्यवे यमाय नमोऽस्तु) योऽस्य विश्वस्य द्विपदश्चतुष्पदश्चेष्टे तस्मै मारकाय कालाय नमो यज्ञोऽस्तु ॥

भाषार्थ—(यः प्रथमो बहुभ्यः प्रवतं पन्थामनुपस्पशान आससाद) जो प्रथम प्रगट हुआ काल बहुत प्रकारसे वृद्धयुवक और शिशुओंमें स्थित मार्गको बांधता हुआ प्राप्त है (योऽस्य द्विपदश्चतुष्पद ईशे) जो इस विश्वके दो पैर वाले और चार पैर वालोंपर अधिकार रखता है अर्थात् सारे प्राणियोंको स्वाधीन रखता है (तस्मै मृत्यवे यमाय नमोऽस्तु) उस मारनेवाले कालके लिये यज्ञ करना चाहिये ॥

शिक्षा—काल सबसे प्रथम संसारमें प्रगट होता है और जो अन्य उत्पन्न हुए सभी प्राणियोंको स्वाधीन रखता हुआ उनको शिशु युवक और वृद्धके अवस्थारूप मार्गपर चलाता है और अन्तमें मारता है इसलिये इस परिणामी और नश्वर जीवनका प्राप्त होके ब्रह्मयज्ञ होमयज्ञ आदि द्वारा समयका उत्तम उपयोग करना चाहिये ॥

इस मन्त्रमें यमका अर्थ काल है किन्तु वह शैशव यौवन और वार्द्धक्य परिणामोंका लाने वाला है एवं वार्द्धक्यके उपरान्त देहपातका परिणाम करने वाला भी काल ही है ॥

नमोऽस्तु ते निऋते तिग्मतेजोऽयस्मयान् विचृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ॥
अथ० ६ । ६३ । २

तिग्मतेजो निर्ऋते ते नमोऽस्तु) तिग्मतेज उत्साह्यतेजोयुक्ते निर्ऋते भूमे ! ते तुभ्यं नमोऽयं शरीरयज्ञोऽस्तु "तिग्मं तेजतेरुत्साहकर्मणः" (निरुक्त १० । ७) "इयं पृथिवी वै निर्ऋतिः" (श० ५ । २ । ३ । ३) "निर्ऋतिः पृथिवीनाम" (नि० १।१) (अयस्मयान् बन्धपाशान् विचृत) अयस्मयान् लोहमयानिव बन्धपाशान् गर्भे बन्धनीयपाशान् विचृत मुञ्च (यमः पुनरित्त्वां मह्यं ददाति) यमः कालः पुनरित् पुनरपि त्वां मह्यं ददाति शरीरभोग्याय (तस्मै मृत्यवे यमाय नमोऽस्तु) तस्मै मृत्यवे मारकाय यमाय कालाय नमो यज्ञोऽस्तु ॥

भाषार्थ—(तिग्मतेजो निर्ऋते ते यमाय नमोऽस्तु) हे उत्साह्य तेजवाली भूमि ! तेरे लिये यह शरीरयज्ञ हो लोहमय गर्भके बन्धनीयपाशोंको खोल (यमः पुनरित्त्वा मह्यं ददाति) काल पुनर्जन्मके रूपमें फिर तुझको मेरे भोगके लिये देता है (तस्मै मृत्यवे यमाय नमोऽस्तु) उस देहपात कराने वाले कालके लिये पूर्वोक्त यज्ञ हो ॥

शिक्षा—जीव अपने कर्मानुसार भोग भोगनेके लिये गर्भमें प्रवेश कर पुनर्जन्म धारण करता है फिर गर्भबन्धनसे छूटकर भूमि पर गर्भसे बाहर आता है एवं स्वकीय भोगोंको भोगता हुआ अन्तिम परिणाम तक पहुँचता है उस अन्तिम परिणामकारी कालके लिये ब्रह्मयज्ञ होमयज्ञ आदिका सेवन करना चाहिये ॥

इस मन्त्रमें भी कालके लिये यम शब्द आया है और जो कि अन्तिम परिणाम कारी भी है ॥

एवोष्वस्मान् निर्ऋते नेहा त्वमयस्मयान् विचृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ॥
अथ० ६ । ८४ । ३

सर्वं पूर्ववत्, अनेहा अनाहन्त्री भूमिरिति विशेषः ॥

भाषार्थ—सब कुछ पूर्ववत् केवल (अनेहा) हनन न करने वाली भूमि यह विशेषण अधिक लगा देना चाहिये ॥

शिक्षा— पूर्ववत् ।

उक्त दोनों मन्त्रों में आए हुए "यमो मह्यं पुनरित् त्वां ददाति" वाक्यके सम्बन्धमें अन्य विद्वान् लिखते हैं "यमो मह्यं पुनरित् त्वां ददाति" का भाव पता नहीं चलता ॥

लेखक—वादीने मन्त्रमें आए हुए "तिग्मतेजो निर्ऋते" का तेज नष्ट करने वाली निर्ऋति यह अर्थ कुछ पौराणिक कल्पनामें किया है और

मन्त्रार्थमें भी पौराणिक कल्पनाकी गन्ध रखी है। अतः "यमो मह्यं पुनरित्वां ददाति" का भाव पता नहीं चलता ऐसा लिखना पड़ा। यदि विद्यासम्बन्धी अर्थ किया जाता तो ऐसा न लिखना पड़ता। उक्त वाक्य अत्यन्त सुगम है क्योंकि जीवका गर्भबन्धनोंको अनुभव करते हुए उनसे छूटकरगर्भसे बाहर भूमिपर आने का वर्णन है और उक्त वाक्य द्वारा कहता है कि (निर्ऋते) हे भूमि! (यमः) काल (मह्यम्) मुझे (पुनरित्) फिर भी पुनर्जन्मार्थ (त्वां ददाति) तुझे सौंपता है। इस प्रकार स्पष्टार्थ है॥

देवेभ्यः कमवृणीत मृत्यु प्रजायै किममृतं नावृणीत।
बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं प्रारिरेचीत्।
ऋ० १० । १३ । ४

देवेभ्यः कमवृणीत मृत्युं प्रजायै किममृतं नावृणीत।
बृहस्पतिर्यज्ञमतनुत ऋषिः प्रियां यमस्तन्वमा रिरेच॥
अथ० १८ । ३ । ४१

इस मन्त्र में परमात्मदेव जगदीश्वर न देवोंको मृत्यु से अलग रहने या मरने वाले प्राणियों को अमरपन से अलग रहने का कारण है। प्रत्युत उनके अपने अपने कर्म ही कारण हैं। जगदीशदेव तो वस्तुतः संसारमें प्रत्येक प्राणी के शरीर को उत्पन्न करता है। किन्तु समय बलवान् है वही उनकी प्यारी कायाको उनसे खाली करा लेता है। विवरण के लिये देखो सूक्त० अथ० १८ । ३ । ४१ (पृष्ठ १६७)

यहां भी यमका अर्थ काल ही है। दोनों मन्त्रोंका अर्थ समान है। केवल विभक्तिव्यत्यय और विकरणागम ही ऋङ्मन्त्र में विशेष है। अर्थात बृहस्पतिम्= बृहस्पतिः, ऋषिम्=ऋषिः, अकृण्वत=अकृणुत॥

रुद्रो वो ग्रीवा अशरैत् पिशाचाः पृष्टीर्वोऽपि शृणातु यातुधानाः।
वीरुद् वो विश्वतो वीर्या यमेन समजीगमत्॥ अथ० ६ । ३२ । २

(पिशाचा वो ग्रीवा रुद्रोऽशरैत) पिशाचाः पिशितं मांसमाचामन्ति ये ते यूयं पिशाचा मांसलेहका मत्कुणादयो वो युष्माकं ग्रीवा मुखानि रुद्रोऽग्निरशरैत् छिनत्तु। "अग्निर्वै रुद्रः" (श० ५ । ३ । १ । १०) (यातुधाना वोऽपि पृष्टीः शृणातु) यातुधाना हे जीवनकालस्य पानकर्तारो मशकादयो विषजन्तवो वो युष्माकं पृष्टीः पार्श्वास्थीन्यपि शृणातु सोऽग्निश्छिनत्तु (विश्वतोवीर्या वो वीरुद् यमेन समजीगमत्)

युष्माकं विश्वतो वीर्या सर्ववीर्याणि वीरुदोषधिर्यमेन कालेनान्तकालेन समजीगमत् सङ्गमयतु ॥

भाषार्थ—(पिशाचा वो ग्रीवा रुद्रोऽशरैत्) मांसको चाटने वाले खटमल आदि जन्तुओ ! तुमको अग्नि छिन्न भिन्न करदे (यातुधाना वोऽपि पृष्टी: शृणातु) हे जीवनकालके पान करने वाले मच्छर आदि विष जन्तुओं ! वह तुम्हारी पसलियों को तोड़ फोड़दे (विश्वतोवीर्या वो वीरुत) तुम्हारे सब बलों को ओषधि (यमेन समजीगमत्) अन्तकाल को प्राप्त करावे ॥

शिक्षा—अग्नि तथा ओषधिप्रयोगसे खटमल मच्छर आदि पीड़कजन्तुओं की निवृत्ति करनी चाहिये ॥

इस मन्त्र में कालके लिये यम शब्द आया है ॥

विवस्वान् नो अमृतत्वे दधातु परैतु मृत्युरमृतं न एतु ।
इमान् रक्षतु पुरुषाना जरिम्णो मोष्वेषामसवो यमं गुः ॥

अथ० १८ । ३ । ६२

इस मन्त्रमें कालके अर्थमें यमशब्द है । यहां जरावस्थापर्य्यन्त प्राणरक्षाकी प्रार्थना है । देहपातरूप परिणामकारी कालके प्रति प्राण न जावें अर्थात् पूर्णायु का भोग करनेका वर्णन है । विवरणके लिये देखो सूक्त० अथ० १८ । ३ । ६२ (पृष्ठ १७४)

अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जति देवाः ।
अहरहर्जायते मासि मास्यथा देवा दधिरे हव्यवाहम् ॥

ऋ० १० । ५२ । ३

(अयं यो होता स यमस्य किरु) अयं यो होता सूर्यः । "असौ वै होता योऽसौ सूर्यस्तपति" (गो० उ० ६ । ६) स यमस्य कालस्य किः कर्ता सम्पादक उ ह्यस्ति । 'कृ धातोरौणादिकौ डि प्रत्ययः' (कमप्यूहे) कं प्राणिनां प्राणमप्यूहे वहति "सर्वान् प्राणान् रश्मिषु संनिधत्ते" (प्रश्नो० १ । ६) "प्राणो वाव कः" (जै० उ० ४ । २३ । ४) (देवा यत्समञ्जन्ति) देवा द्योतमाना रश्मयो यद्यतोऽत्र सूर्ये समञ्जन्ति सङ्गच्छन्ते । रश्मयो देवाः "देवा उदिता सूर्यस्य" (ऋ० १ । ११५ । ४) अतः (अहरहर्जायते) अहरहः प्रतिदिनं प्रकटीभवति (अथा देवा मासि मासि हव्यवाहं दधिरे) अथाऽपि च ते देवा द्योतमाना रश्मयो मासि मासि हव्यवाहं तमेव संसारवोढारं सूर्यं दधिरे धारयन्ति मासे मासे सूर्यक्रान्तिर्भवतीति ज्योतिर्विद्या प्रदर्श्यते ॥

भाषार्थ—(अयं यो होता स यमस्य किरु) यह सूर्य कालका बनानेवाला है (कमप्यूहे) प्राणियोंके प्राणको वहन करता है (देवा यत्समञ्जन्ति) द्योतमान रश्मियां जिससे इस सूर्यमें सङ्गत हैं अतः (अहरहर्जायते) प्रतिदिन प्रकट होता है (अथा देवा मासि मासि हव्यवाहं दधिरे) और वे द्योतमान रश्मियां मास मासमें इस संसारवोढा सूर्यको धारण करती हैं। मास मासमें सूर्यक्रान्ति होती है यह एक ज्योतिर्विद्या प्रदर्शित है ॥

शिक्षा—सूर्य, कालका उत्पन्न करने वाला है वही सब प्राणियोंके जीवन-काल को स्थिर करके प्राणका वहन करता है। उसकी रश्मियां उदय और अस्त के भेदसे प्रतिदिन उसको प्रकट करती हैं अहोरात्र बनाती हैं। और फिर मास मासमें भी क्रान्ति करके प्राप्त होती हैं। इस प्रकार कालकी उत्पत्ति और उसके विस्तारका निमित्त सूर्य है ॥

इस मन्त्रमें कालके लिये यम शब्दका प्रयोग है और सूर्य से उसकी उत्पत्ति का प्रसङ्ग तथा विस्तारका वर्णन है ॥

उत् त्वाहार्षं पञ्चशलादथो दशशलादुत ।
अथो यमस्य पड्वीशाद्द विश्वस्माद्द देवकिल्विषात् ॥ अथ०८।७।२८

(पञ्चशलादथो दशशलादुत यमस्य पड्वीशादथो विश्वस्मादेवकिल्विषात्त्वोदोहार्षम्) पञ्चशलाद्रोगात्पञ्चसु स्थानेषु शलप्रवेशवद्दुःखादथ च दशशलाद्दशस्थानेषु शलप्रवेशवद्दुःखादुत यमस्य समयस्य मिथ्याचरणरोगादथापि विश्वस्माद्देवकिल्विषादिन्द्रियविकाररोगादहं त्वामुदाहार्षं पृथगानीतवानानयामि वेति वैद्योक्तिः ॥

भाषार्थ—(पञ्चशलात) पांच स्थानों में शल अर्थात किसी काँटे आदिके प्रवेश से जो दुःख होता है उससे (अथो दशशलात्) और दश स्थानोंमें प्रविष्ट हुए काँटे आदिके दुःखसे (उत यमस्य पड्वीशात) और कालके मिथ्याचरणसे (अथो विश्वस्मादेवकिल्विषात) तथा सम्पूर्ण इन्द्रियविकारोंके रोगसे (त्वामुदाहार्षम्) तुझ को मैं वैद्य पृथक् करता हूँ ॥

शिक्षा—औषधियों और शल्य उपकरणों द्वारा कण्टकादि प्रविष्टसे होने वाले रोगों का इलाज करना चाहिये ॥

इस मन्त्रमें कालके लिये यम शब्द का प्रयोग है ॥

यत्ते यमं वैवस्वतं मनो जगाम दूरकम् ।
तत्त आवर्त्तयामसीह क्षयाय जीवसे ॥ ऋ० १०।५८।१

(यत्ते मनो वैवस्वतं यमं दूरकं जगाम) यत्तव मनोऽन्तःकरणं वैवस्वतं यमं कालं दूरकं दूरं जगाम गतम् (क्षयाय जीवसे तत्त आवर्तयामसि) जीवसे जीवितं क्षयाय निवासाय तत्ते मन आवर्तयामसि पुनरानयामः। इयं सम्बन्धिना मुक्तिर्विज्ञेया ॥

भाषार्थ—(यत्ते मनः) हे रोगी ! जो तेरा मन (वैवस्वतं यमम्) विवस्वान् सूर्यके पुत्र काल अर्थात समय को (दूरकं जगाम) दूर प्राप्त हो गया है (जीवसे क्षयाय) जीने के लिये और इस संसारमें रहनेके लिये (तत्ते) उस तेरे मनको (आवर्तयामासि) फिर लौटा लाते हैं ॥

शिक्षा—वैद्यों तथा सम्बन्धियों की ओर से रोगीको आश्वासन देना चाहिये कि तेरे मन के अन्दर जो जीवन की निराशा आगई है उसको हटाते हैं और तुझे जल्दी अच्छा करते हैं ॥

इस मन्त्र में काल के लिये यम शब्द आया है ॥

यमादहं वैवस्वतात्सुबन्धोर्मन आभरम् ।
जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥ ऋ० १० । ६० । १०

(अहं वैवस्वताद्यमात् सुबन्धोर्मन आभरम्) अहं वैवस्वताद्यमात् कालात् सुबन्धोर्निजप्रियजनस्य मन आभरमाहृतवानानयामि वा (जीवातवे न मृत्यवेऽथोऽरिष्टतातये) जीवितुमेव न तु मृत्यवेऽरिष्टतातये स्वस्थतायै ॥

भाषार्थ—(अहं वैवस्वताद्यमात्) मैं वैवस्वत यम अर्थात् कालसे (सुबन्धोर्मन आभरम्) निज प्रियजनके मनको लाता हूँ (जीवातवे न मृत्यवे) जीनेके लिये (न मृत्यवे) मरनेके लिये नहीं (अरिष्टतातये) स्वस्थता के लिये ॥

शिक्षा—सुवद्य अथवा रोगी के परिवार का कोई दृढ़ सङ्कल्पी जन उसको आश्वासन दे कि मैं तुझे मरने नहीं दूंगा। मैं तुझे अनेक उपायोंसे स्वस्थ कर दूंगा॥

इस मन्त्र में पूर्वके समान कालके अर्थ में यम शब्द आया है ॥

यमलोक वा यमराज्य

इस प्रकरणमें वे मन्त्र होंगे जिनमें यमके किसी स्थान, स्वत्व या अधिकार का वर्णन होगा अथवा जिनका अन्य विद्वानोंने उक्त शीर्षक देकर विचार किया है॥

सर्वान् कामान् यमराज्ये वशा प्रददुषे दुहे ।
अथाहुर्नारकं लोकं निरुन्धानस्य याचिताम् अथ० १२ । ४ । ३६

(वशा प्रददुषे यमराज्ये सर्वान् कामान् दुहे) वशा वश्या पृथिवी "इयं पृथिवी वै वशा पृश्निः" (श० १ । ८ । ३ । १५) प्रददुषे-आश्रमविद्यालयसम्मेलनकृषिप्रयोजनाय तां पृथिवीं प्रत्तवते राष्ट्रपतये यमराज्ये राष्ट्रे सर्वान् कामान् दुहे दोग्धि प्रपूरयति (अथ याचितां निरुन्धानस्य नारकं लोकमाहुः) अथ याचितां पूर्वोक्ताश्रमादिप्रयोजनाय याचितां पृथिवीं निरुन्धानस्याप्रदातूराष्ट्रपतेर्नारकं लोकं नीचैर्गतं पतनस्थानमवनतिमाहुर्ब्रुवन्ति ॥ "नरकं न्यरकं नीचैर्गमनम्" (निरु० १ । ११)

भाषार्थ—(वशा प्रददुषे) राजाके वश्य हुई पृथिवी आश्रम, विद्यालय और सम्मेलन आदि के प्रयोजनार्थ भूमि देने वाले राष्ट्रपतिके लिये (यमराज्ये सर्वान् कामान् दुहे) राष्ट्रके अन्दर सारे सुखों को पूर्ण करती है (अथ याचितां निरुन्धानस्य) अन्यथा पूर्वोक्त आश्रम आदि प्रयोजनके लिये मांगी हुई भूमिको न देने या इन्कार करने वाले राष्ट्रपतिके सम्बन्धमें (नारकं लोकमाहुः) पतनका स्थान कहते हैं ॥

शिक्षा—राष्ट्रपतिको आवश्यक है कि सर्वप्रकारसे सुखीहोनेके लिये वह अपने राष्ट्रमें आश्रम, विद्यालय, सम्मेलन आदिके निमित्त भूमि, प्रजा या प्रजा के मुख्य जनों को देता रहे । जो ऐसा न किया जाए तो निःसन्देह राजा राष्ट्रके साथ पतन को प्राप्त होता है ॥

इस मन्त्रमें राष्ट्रके लिये यमराज्य शब्द आया है और यहां यम का अर्थ राजा का है ॥

उग्रंपश्ये राष्ट्रभृत् किल्विषाणि यदक्षवृत्तमनु दत्तं न एतत् ।
ऋणान्नो नर्णमेर्त्समानो यमस्य लोके अधि रज्जुरायत् ॥

अथ० ६ । ११८ । २

(उग्रंपश्ये राष्ट्रभृद् यन्नो दत्तमक्षवृत्तमनुकिल्विषाण्येतत्) उग्रम्पश्ये राष्ट्रभृद् ह उग्रद्रष्ट्रि राष्ट्रपालिके न्यायसभे ! यदृणं नोऽस्मभ्यमुत्तमर्णेन दत्तमक्षवृत्तमैन्द्रियकं किल्विषाणि किल्विषं पापमेतत्सञ्जातमस्ति (न ऋणमेच्छमानो यमस्य लोक ऋणान्नोऽधिरज्जुरायत्) न ऋणमेच्छमान उत्तमर्णो यमस्य लोके यमनशीलस्य न्यायाधीशस्य स्थाने न्यायमन्दिर ऋणहेतोर्बन्धनमभिलक्ष्याऽऽयदागच्छति प्राप्नोति [अत्र सायणेन "ईर्त्समानः" अस्य स्थाने "इच्छमानः" इति पाठः कृतः]॥

भाषार्थ—(उग्रं पश्ये राष्ट्रभृत्) हे उग्रदर्शक भय दिखाने वाली राष्ट्रपालक न्यायसभा ! (यन्नो दत्तम्) जो ऋण उत्तमर्ण ने हमको दिया है (अक्षवृत्तमनु

किल्विषाण्येतत्) वह ऐन्द्रियिकपाप हो गया है (नऋणमेच्छमानः) ऋण चुकती चाहने वाला उत्तमर्ण (यमस्य लोके) न्यायमन्दिर (Highcourt) में (ऋणान्नः) ऋणके कारण हमारे वास्ते (अधिरज्जुरायत्) बन्धनको लक्ष्य करके प्राप्त हुआ है ॥

शिक्षा—किसीके पाससे ऋण लेकर उसको अवसर पर चुकाना चाहिये। यदि न देनेकी पापवृत्ति हो जावे तो न्यायसभाके अधीन न्यायमन्दिर (Highcourt) में बन्धन द्वारा दिलवाना चाहिये ॥

इस मन्त्रमें न्यायाधीशके लिये यम शब्द आया है और न्यायमन्दिर (Highcourt) के लिये यमलोक शब्दका प्रयोग है ॥

ये समाना समनसः पितरो यमराज्ये ।

तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ यजु० १९ । ५

इस मन्त्रमें प्रजापालक न्यायाधीशके लिये यम शब्द आया है और यम-राज्यका अर्थ राष्ट्रके हैं । विवरणके लिये देखो प्रकीर्णसमन्वय (पृष्ठ २७६)

पुनर्देहि वनस्पते य एष निहितस्त्वयि ।

यथा यमस्य सादन आसातै विदथा वदन् ॥ अथ० १८ । ३ । ७०

इस मन्त्रमें यमका अर्थ वायु है उसका स्थान अन्तरिक्ष है अत एव अन्त-रिक्षके लिये 'यमस्य सादन' शब्दका प्रयोग है और यज्ञमें होमा हुआ पदार्थ अन्तरिक्ष में पहुँच कर दूर २ स्थानों तक में यज्ञकी सूचना देता है । सूर्यरश्मिद्वारा मेघ-मण्डलमें पहुँचकर पुनः वापिस आनेकी चर्चा है । विवरणके लिये देखो सूक्त० अथ० १८ । ३ । ७० (पृष्ठ १७८)

इन्द्रः प्राङ् तिष्ठन् दक्षिणा तिष्ठन् यमः ॥ अथर्व ९ । ७ । २०

(इन्द्रः प्राङ् तिष्ठन् यमो दक्षिणा तिष्ठन्) इन्द्रः सूर्यः प्राङ् पूर्वस्यां दिशि तिष्ठन् रश्मीन् प्रेरयति । "अथ यः स इन्द्रोऽसौ स आदित्यः" (श० ८ । ५ । ३ । २) यमो वायुर्दक्षिणा दक्षिणस्यां दिशि तिष्ठन् ऋतून् प्रेरयति "अयं वै यमो योऽयं वायुः पवते" (श० १४ । २ । २ । ११)

भावार्थ—(इन्द्रः प्राङ् तिष्ठन् यमो दक्षिणा तिष्ठन्) सूर्य पूर्व दिशामें स्थित हुआ रश्मियोंको प्रेरित करता है और वायु दक्षिण दिशामें स्थित हुआ ऋतुओं को प्रेरित करता है ॥

शिक्षा—रश्मिसञ्चार पूर्व दिशासे होता है और ऋतुसञ्चार दक्षिण दिशा से तथा रश्मियोंका अधिष्ठाता सूर्य है और ऋतुओंका वायु ॥

इस मन्त्रमें वायुके लिये यम शब्द आया है जो ऋतुप्रेरक होने से दक्षिण में रहता है ॥

नराशंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।
सूर्यामासाचन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना ॥

ऋ० १० । ६४ । ३

(नरावाशंसं पूषणमगोह्यं देवेद्धमग्निं गिराऽभ्यर्चसे) नरावाशंसं नराशंसं वा, 'अत्र वा निपातस्य मध्यपातः' । नरैः शंसः शंसनीय इति नराशंसस्तं वाऽपि पूषणं सर्वपोषकमगोह्यं सर्वत्र विराजमानं देवेद्धं देवा इद्धाः प्रकाशिता येन तमग्निमग्रेनेतारं सर्वज्ञं वा परमेश्वरं गिरा वेदवाचाऽभ्यर्चसे उपास्व । 'लिङर्थे लेट्' । यश्च परमेश्वरः (दिवि सूर्यामासाचन्द्रमसा यमं त्रितं वातमुषसमक्तुमश्विना) दिव्यन्तरिक्षे सूर्यामासाचद्रमसा सूर्याचन्द्रमसा सूर्यचन्द्रमसौ सूर्यचन्द्रौ 'मासा शब्दोपाजनः' यमं विश्वकालं त्रितमिन्द्रम् । "त्रितस्त्रिस्थान इन्द्रः" (निरुक्त ६ । २५) वातं वायुमुषसमुषसः प्रकाशं दिनमक्तुं रात्रिमश्विनावित्यादीन् देवानुत्पादयति ॥

भावार्थ—(नरावाशंसं पूषणम्) मनुष्योंसे प्रशंसनीय सर्वपोषक (अगोह्यं देवेद्धमग्निम्) सवत्र विराजमान देवोंके प्रकाशक अग्रनेता सर्वज्ञ परमेश्वर की (गिराऽभ्यर्चसे) हे जीव ! तू वेदवाणीके द्वारा उपासना कर । जो परमेश्वर (दिवि सूर्यामासाचन्द्रमसा) आकाशमें सूर्य और चन्द्रमाको (यमं त्रितं वातम्) विश्वकाल, विद्युत् और हवाको (उषसमक्तुम्) दिन और रातको (अश्विना) द्यावापृथिवीको उत्पन्न करता है ॥

शिक्षा—जो जगदीश्वर सम्पूर्ण सृष्टिके सूर्य आदि पदार्थों का उत्पन्न करने वाला तथा सर्वत्र व्यापक और उपास्य देव है उस परमेश्वरकी वेदमन्त्रोंसे स्तुति प्रार्थना करनी चाहिये ॥

इस मन्त्रमें यमका अर्थ काल है और उक्त यम आदिका आधार अन्तरिक्ष है ॥

इदं यमस्य सादनं देवमानं यदुच्यते ।
इयमस्य धम्यते नाडीरयं गीर्भिः परिष्कृतः ॥ ऋ० १० । १३५ । ७

इस मन्त्रमें यमका अर्थ आदित्य है और 'यमस्य सादनम्' से प्राणिशरीर अभीष्ट है । शरीर के अन्दर जो नाडी आदि का व्यापार हो रहा है वह सब सूर्यरश्मियों के प्रताप से है । विवरणके लिये देखो सूक्त० ऋ० १० । १३५ । ७ (पृष्ठ ६८)

यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तूद्भ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥

अथ० १८।४।४३

इस मन्त्रमें जीवनकाल के लिये यम शब्द आया है । शरीर के अन्दर मांस ग्रन्थियों के साथ शिरायें ताने बाने के रूपमें फैली हुई हैं जो वातादिकी वाहक होनेसे जीवनकालको स्थिर रखने वाली हैं। विवरणके लिये देखो सूक्त १८। ४। २६ (पृष्ठ १६८)

पुमान् पुंसोधितिष्ठ चर्मेहि तत्र ह्वयस्व यतमा प्रिया ते ।
यावन्तावग्रे प्रथमं समेयथुस्तद् वां वयो यमराज्ये समानम् ॥

अथ० १२।३।१

(पुमान् पुंसश्चर्माधितिष्ठ) पुमान् पुंस्कर्मविशिष्टजीवात्मन्! त्वं पुंसश्चर्म पुरुषदेहमधितिष्ठाश्रयस्व (तत्रेहि) तत्र देहे वर्तमानः सन्निहि गच्छ संसारयात्रां कुरु (यतमा ते प्रिया ह्वयस्व) यतमा या काचित्तव प्रियाऽनुकूला भवेत्तां ह्वयस्व भार्यात्वेन स्पर्धस्वेच्छ (यावन्तावग्रे प्रथमं वयः समेयथुः) यावन्तौ यौ कावपि युवां पतिपत्न्यावग्रे विवाहात् प्राक् प्रथमं वयो यौवनं समेयथुः प्राप्नुथः (यमराज्ये वां तत्समानं) कालराज्ये कालपरिणामे वां युवयोस्तद् यौवनं समानं मानेन सहितं सन्तानोत्पादनयोग्यं भवेत् ॥

भावार्थ—(पुमान् पुंसश्चर्माधितिष्ठ) हे पुरुषकर्मयुक्त जीवात्मन्! तू पुरुष देह को प्राप्त हो (तत्रेहि) उस देहमें वर्तमान होकर संसारयात्रा कर (यतमा ते प्रिया ह्वयस्व) जो तेरी अनुकूल भार्या रूपमें स्त्री हो उसको इच्छा कर (यावन्तावग्रे प्रथमं वयः समयेथुः) जो भी कोई तुम दोनों पतिपत्नी विवाहसे पहले यौवन को प्राप्त हुए हो (यमराज्ये वां तत्समानम्) कालपरिणाम में तुम्हारा वह यौवन सन्तानोत्पत्ति करने के योग्य होवे ॥

शिक्षा—पुरुषकर्मों से विशिष्ट जीव पुरुषदेहमें जाता है । देह प्राप्त करके संसार यात्राके निमित्त जो उसके अनुकूल स्त्री मिलती है उसके साथ विवाह करना चाहिये और वे जो पतिपत्नी हों विवाहसे पहले उनको देखना चाहिये या विवाह करने से पहले यह ख्याल होना चाहिये कि वे यौवन कालको प्राप्त और सन्तान उत्पन्न करने के योग्य तो हैं ॥

इस मन्त्र में कालके अर्थमें यम शब्द आया है और यमराज्य शब्द का अर्थ समय का आधिपत्य या काल परिणाम है॥

समस्मिंल्लोके समु देवयाने सं स्मा समेतं यमराज्येषु।
पूतौ पवित्रैरुप तद्ध्वयेथां यद् यद् रेतो अधि वां संबभूव॥

अथ० १२।३।३

(अस्मिन् लोके सम्--देवयाने सम्--संस्मा यमराज्येषु समेतम्) हे पति-पत्न्यौ युवामस्मिन् लोके गृहस्थाश्रमे सम्-समेतं सङ्गत्य गच्छतं देवयाने देवा विद्वांसो यान्ति यत्रेति तत्र विद्वत्समाजे सं समेतं सङ्गत्य गच्छतं यमराज्येषु कालपरिणामेषु वार्द्धक्यादिषु सं समेतं सङ्गत्य गच्छतम् (यद् यद् रेतो वामधिसम्बभूव) यद् यदेव रेतो वीर्यञ्च रजश्च वामधि युवयोरन्तरे सम्बभूव सम्भवति-उत्पद्यते (पवित्रैः पूतौ तदुपह्वयेथाम्) पवित्रैः कर्मभिः पूतौ स्वस्थौ सन्तौ युवां तद् वीर्यं रजश्चोपह्वयेथामु-पस्पर्धेथामुपयोजयथः॥

भाषार्थ—(अस्मिन् लोके सम्………एतम्) हे पतिपत्नी तुम दोनों इस गृहस्थाश्रम में मिलकर चलो (देवयाने सम्………एतम्) विद्वत्समाज में इकट्ठे जाओ (सं स्मा यमराज्येषु समेतम्) वृद्धावस्थादि कालपरिणामोंमें तुम मिलकर रहो (यद् यद् रेतो वामधिसम्बभूव) जो २ वीर्य और रज तुम दोनोंके अन्दर उत्पन्न हो (पवित्रैः पूतौ तदुपह्वयेथाम्) पवित्र कर्मों से तुम स्वस्थ होते हुए उस वीर्यरज का गृहस्थधर्मों में उपयोग करो॥

शिक्षा—स्त्रीपुरुषों को स्वगृह विद्वत्समाज और जीवनकाल की अवस्थाओंमें मिलकर जाना और रहना चाहिये तथा पवित्र कर्मों का आचरण करते हुए स्वस्थ अवस्थामें सन्तानोत्पत्तिके लिये गृहस्थ वर्तन करें॥

इस मन्त्रमें वृद्धावस्थादि काल परिणामोंके लिये यमराज्य शब्द आया है॥

एतत् ते देवः सविता वासो ददाति भर्तवे।
तत्त्वं यमस्य राज्ये वसानस्तार्प्यं चर॥ अथ० १८।४।३१

इस मन्त्रमें यमका अर्थ काल है और यमराज्य से मतलब कालकी अधीनता का है। जीवात्मा को ईश्वरकी ओर से शरीर प्रदान किया जाता है और उसको वह कालके अधीन रखता हुआ उसका उपभोग करता है। विवरण के लिये देखो सूक्त० अथर्व० १८।४।३१ (पृष्ठ २०२)

धाना धेनुरभवद्व वत्सो अस्यास्तिलोऽभवत् ।
तां वै यमस्य राज्ये अक्षितामुपजीवति ॥ अथ० १८ । ४ । ३२

इस मन्त्रमें यमका अर्थ काल है और यमराज्यसे मतलब कालकी अधीनता है । शरीरके अन्दर रक्तवाहक नाड़ियां विद्यमान हैं उनके साथ कचित् कचित् मांसग्रन्थियां या नाडीग्रन्थियां भी हैं जो उक्त नाडियोंमें से रिसते हुए रक्तको अपने अन्दर ग्रहण करती हैं । विवरणके लिये देखो सूक्त० १८।४।३२ (पृष्ठ २०२)

ददाम्यस्मा अवसानमेतद्व य एष आगन् यम चेदभूदिह ।
यमश्चिकित्वान् प्रत्येतदाह ममैष राय उपतिष्ठतामिह ॥
अथ० १८ । २ । ३७

इस मन्त्र में कालके लिये यम शब्दका प्रयोग है मरनेके अनन्तर दूसरे जन्ममें जानेसे पूर्व जीवको कुछ विश्राम मिलनेकी चर्चा है । विवरणके लिये देखो सूक्त० १८ । २ । ३७ (पृष्ठ १३७)

ब्रह्मज्यं देव्यघ्न्य आ मूलादनु संदह ॥ अथ० १२ । ५ । ६३
यथायाद्व यमसादनान् पापलोकान् परावतः ॥ अथ० १२ । ५ । ६४

(अघ्न्ये देवि ब्रह्मज्यमामूलादनु संदह यथा यमसादनान् परावतः पापलोकानायात्) हे अघ्न्ये देवि ! अघघ्नि-आघातघ्नि-आघातेन हन्त्रि देवि दिव्ये द्योतमाने विद्युत् ! "अघ्न्या अघघ्नीति वा" (निरु० ११ । ४४) "अघं हन्तेर्निर्ह्रसितोपसर्ग आहन्तीति" (निरु० ६ । ११) ब्रह्मज्यं ब्रह्मघातिनं वेदनिन्दकं नास्तिकं वा जनमामूलादनुसन्दह विनाशय । ब्रह्मघाती जनः कयापि विद्युत्प्रयुक्तशक्त्या विनाश्यः, इति राजनियमो निदर्श्यते । यथाऽयं जनो यमसादनाद्यमस्थानान्मरणानन्तरं परावतोऽत्यन्तान् पापलोकान् पापयोनीर्निकृष्टशरीराण्ययाद् गच्छेद् गच्छति वा ॥

भाषार्थ—(अघ्न्ये देवि ब्रह्मज्यमामूलादनुसन्दह) हे आघातसे नष्ट करने वाली द्योतमान विद्युत् तू ब्रह्मघाती वेदनिन्दक नास्तिक का मूलके साथ विनष्ट करदे (यथा यमसादनात् परावतः पापलोकानयात्) जिससे यह मनुष्य मरणानन्तर अत्यन्त पापयोनियों निकृष्टशरीरोंको प्राप्त होवे ॥

शिक्षा—राष्ट्रके अन्दर राष्ट्रपतिकी ओर से ऐसा नियम बनाया जाए कि ब्रह्मघातक मनुष्यको किसी विद्युत्-प्रयुक्त शक्तिसे उसको मार दिया जाय ॥

इस मन्त्रमें यमसादन शब्दका अर्थ मरणस्थिति है और यह प्राणोंका यमन करने वाला अन्तिम काल है ॥

यम के सम्बन्धी

यहां वे मन्त्र होंगे जिनमें किन्हीं वस्तुओं का यम के साथ कोई विशेष सम्बन्ध पाया जावे।

यत्र राजा वैवस्वतो यत्रावरोधनं दिवः।
यत्रामूर्यह्वतीरापस्तत्र मामृतं कृधीन्द्रायेन्दो परिस्रव ॥
ऋ० ९। ११३। ८

(यत्र वैवस्वतो राजा यत्र दिवोऽवरोधनं यत्रामूर्यह्वतीरापः) यत्र यस्मिन् ब्रह्मणि वैवस्वतो राजा कालोऽथ च यत्र यस्मिन् दिवो द्युलोकस्यावरोधनमन्तिमत्वं यत्र यस्मिनमूस्ताः सूक्ष्मा आन्तरिक्ष्यो महत्य आपः सन्ति (इन्दो तत्र माऽमृतं कृधि) इन्दो हे मनः! तत्र ब्रह्मणि मामृतं कृधि कुरु सम्पादय (इन्द्राय परिस्रव) अथ च मामिन्द्रायेन्द्रत्वसम्पादनाय परिस्रव परिणमय ॥

भाषार्थ—(यत्र वैवस्वतो राजा) जिस ब्रह्म के अन्दर सूर्यसे उत्पन्न हुआ काल और (यत्र दिवोऽवरोधनम्) जिसमें द्युलोककी अन्तिमता तथा (यत्रामूर्यह्वीरापः) जिसके अन्दर वे सूक्ष्म अन्तरिक्ष के विस्तृत पानी हैं (इन्दो तत्र मामृतं कृधि) हे मेरे मन ! तू उस ब्रह्मके अन्दर मुझे अमृत बनादे मरणभय से रहित करके मोक्षानन्द को प्राप्त करादे (इन्द्राय परिस्रव) और मुझे उस विश्वसम्राट् परमेश्वर की ओर झुका दे ॥

शिक्षा—सर्वव्यापक विश्वनायक जगदीश्वर के अन्दर विश्वकाल और द्युलोक की सारी सीमा तथा अन्तरिक्षके जल वशीभूत हुए वर्तमान हैं। उस ऐसे अन्तर्यामी जगन्नायक प्रभुकी ओर अपना मन लगाना तथा अपनी आत्माका समर्पण करना आवश्यक है ॥

इस मन्त्रमें वैवस्वतशब्द कालार्थक यमका विशेषण बनकर आया है ॥

प्रजापतिश्च परमेष्ठी च शृङ्गे इन्द्रः शिरो अग्निर्ललाटं यमः कृकाटम् ॥
अथ० ९। ७। १

(प्रजापतिश्च परमेष्ठी च शृङ्गे) समग्रसूक्तदर्शनात्प्रतीयते यदत्र पशुरूपा गौर्नाधिक्रियतेऽपि तु समष्टिसृष्टिं गामलङ्कृत्य वर्णनमस्ति उक्तं च सूक्तान्ते "एतद् विश्वरूपं सर्वरूपं गोरूपम्" (२५) यथा च बृहदारण्यकेऽश्वालङ्कारः "उषा वा अश्वस्य मेध्यस्य शिरः (बृ० १। १। १) प्रजापतिश्च पार्थिव्य आपः परमेष्ठी च

द्युस्थानीया आपश्चास्याः समष्टिसृष्टिरूपाया गोः शृङ्गे शीर्णशीले शृङ्गस्थानीये स्तः "आपो वै प्रजापतिः परमेष्ठी ता हि परमे स्थाने तिष्ठन्ति" (श० ८ । २ । ३ । १३) (इन्द्रः शिरः) आदित्यः शिरःस्थानीयः (अग्निर्ललाटम्) अग्निर्ललाटस्थानीयः (यमः कृकाटम्) यमो यमनशीलः कालः कृकाटं कण्ठगतजीवननाडीमर्म । कृकं कण्ठमटतीति कृकाटम् । सुश्रुते तु द्वे कृकाटिके इत्युक्तमत्र त्वेकमेवाङ्गमभिलक्ष्यते । "जत्रूर्ध्वमर्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे कृकाटिके" (सुश्रुतस्य शारीरस्थाने ६ । ७)॥

भाषार्थ—(प्रजापतिश्च परमेष्ठी च शृङ्गे) इस सम्पूर्ण सूक्त के देखने से पता चलता है कि यहां पशुरूप गायका वर्णन नहीं है किन्तु समष्टि-सृष्टि का गोरूपमें आलङ्कारिक वर्णन है यह बात इस सूक्तके २५ वें मन्त्रसे भी प्रकट है। अतः पार्थिव जल और द्युस्थानका मेघरूप जल इस समष्टिसृष्टिरूपगायके शृङ्गतुल्य हैं (इन्द्रः शिरः) आदित्य सिरके समान (अग्निर्ललाटम्) अग्नि मस्तकके तुल्य (यमः कृकाटम्) यमनशीलकाल कण्ठगतजीवननाडीमर्म अर्थात् कृकाटिका = घाटा = घाट के तुल्य है ॥

शिक्षा—समष्टिसृष्टिविज्ञानका गुरुजन शिष्योंको भिन्न २ अलङ्कारों से परिचय करावें ॥

इस मन्त्रमें यमनशील कालके लिये यम शब्द आया है ॥

कृणोमि ते प्राणापानौ जरां मृत्युं दीर्घमायुः स्वस्ति ।
वैवस्वतेन प्रहितान् यम दूतांश्चरतोऽप सेधामि सर्वान् ॥

अथ० ८ । २ । ११

(प्राणापानौ दीर्घमायुस्ते कृणोमि) हे पुरुष ! प्राणापानौ दीर्घमायुस्तुभ्यं कृणोमि करोमि (वैवस्वतेन प्रहितान् चरतः सर्वान् यमदूतान् जरां मृत्युमपसेधामि) वैवस्वतेन विश्वकालेन प्रहितान् प्रेरितान् चरतो गच्छतः सर्वान यमदूतान् कालावयवान् जरां मृत्युं प्रत्यपसेधामि प्रत्यपगमयामि ॥

भाषार्थ—(प्राणापानौ दीर्घमायुस्ते कृणोमि) हे पुरुष ! प्राण अपान और दीर्घायु को तेरे लिये करता हूँ (वैवस्वतेन प्रहितान् चरतः सर्वान् यमदूतान् जरां मृत्युमपसेधामि) विश्वकाल से प्रेरित गतिशील सब कालावयवों को तेरी वृद्धावस्था और उसके अनन्तर मृत्यु के प्रति भेजता हूँ अर्थात मैं वैद्य अथवा सद्व्यवहारशिक्षक तुझे इस प्रकार ले जाता हूँ कि तेरा जीवन अधिक से अधिक काल तक संसार में ठहरे ॥

शिक्षा—सुवैद्य या सद्व्यवहारशिक्षक जन मनुष्योंको पूर्णायुके भोगार्थ उपचारों और व्यवहारों का उपदेश दें ॥

इस मन्त्रमें वैवस्वत विशेषणके रूपसे यम (विश्वकाल) के लिये आया है॥

नयतामून् मृत्युदूता यमदूता अपोम्भत ।
परः सहस्रा हन्यतां तृणेढ्वेनान् मत्यं भवस्य ॥ अथ० ८।८।११

(मृत्युदूता यमदूता अमूनपनयत-उम्भत) मृत्युदूता मृत्योर्दूता मृत्युं प्रति नेतारो मृत्युपरिणामकर्तारो दवितार उपतापयितारो येऽप्युपाया यमदूता यमस्य दूता यमनं प्रति नेतारो वशकर्तारो यमनोपायास्ते सर्वेऽमून् दस्यून् शत्रूनपनयत दूरीकुरुतापोम्भतापूरणान् रिक्तान् शक्तिहीनान् कुरुत । 'उम्भ पूरणे' अपोपसृष्टस्यापूरणार्थः सम्पद्यते (भवस्य मत्यमेनान् तृणेढु) भवस्याग्नेः । "अग्निर्वै देवस्तस्यैतानि नामानि शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाहीकाः" (श० १।७।३।८) मत्यं मतौ भवं साधनं यन्त्रम् । "भवेच्छन्दसि" अष्टा० (४।४।११०) एनान् शत्रून् तृणेढु हन्तु । 'तृह हिंसायाम्' रुधादिस्तस्मात् "तृणह इम्" (अष्टा० ७।३।९२) इतीमागमः (परः सहस्रा हन्यन्ताम्) ते च शत्रवः परः सहस्रा अत्यन्तासंख्याता हन्यतां म्रियेरन् ॥

भाषार्थ—(मृत्युदूता यमदूता, अमून्-अपनयत-उम्भत) मृत्युके प्रति ले जाने वाले मृत्यु परिणाम करने वाले दुखदायक उपाय तथा यमन के प्रति ले जाने वाले वशकरने के उपाय उन शत्रुओं को दूर करें, शक्तिहीन करें (भवस्य मत्य मेनान् तृणेढु) अग्निका साधक यन्त्र इन शत्रुओं का हनन करे (परः सहस्रा हन्यन्ताम्) और वे शत्रु अत्यन्य असंख्य नष्ट हो जावें ॥

शिक्षा—युद्धमें शत्रुओंके प्रति मारण और वशीकरण उपायोंका प्रयोग करना चाहिये । तोपादि अग्नियन्त्र से शत्रुओं की अधिक संख्या का हनन करना चाहिये ॥

इस मन्त्रमें वश करने वाले उपायों के लिये यम शब्द आया है ॥

अतिद्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन्त्सुविदत्रां उपेहि यमेन ये सधमादं मदन्ति ॥
अथ० १०।१४।१०

अतिद्रव श्वानौ सारमेयौ·······।·······अपीहि·······॥
अथ० १८।२।११

इस मन्त्रमें दिन रात यमके दूत श्वान हैं देहान्त के पश्चात् जीव शीघ्र शीघ्र दिन रातों से सूर्य रश्मियों द्वारा पुनर्जन्मको प्राप्त होता है। तथा काल के अर्थ में यहां यम है। विवरण के लिये देखो सूक्त० ऋ० १० । १४ । १० (पृष्ठ ३३)

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ।
ताभ्यामेनं परिदेहि राजन् स्वस्ति चास्मा अनमीवञ्च धेहि ॥

ऋ० १० । १४ । ११, अथ० १८ । २ । १२

इस मन्त्रमें पूर्वके समान दिन रात यमके श्वान दूत हैं। और कालके अर्थ में यम है। जीव जीवनसमयको समाप्त करके पुनर्जन्मरूप नये जीवनको दिन रातोंके साथ वहन करता है। विवरणके लिये देखो सूक्त० ऋ० १०।१४।११ (पृष्ठ ३४)

उरुणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ॥

ऋ० १० । १४ । १२ अथ० १८ । २ । १३

इस मन्त्रमें भी दिन रात यम के दूत हैं। और आयुरूप जीवन काल यम है। वे दिन रात जीवको बारम्बार सूर्य दर्शन कराते हुए जीवन कालके अन्त तक पहुँचाकर पुनर्जन्ममें ले जाते हैं। विवरणके लिये देखो ऋ० १० । १४ । १२ (पृष्ठ ३५)

श्यामश्च त्वा मा शबलश्च प्रेषितौ यमस्य यौ पथिरक्षी श्वानौ।
अर्वाङेहि मा वि दीध्यो मात्र तिष्ठः पराङ्मनाः ॥ अथ० ८।१।९

इस मन्त्रमें भी दिन रात ही यमके दूत बतलाए गए हैं और यम काल है। अर्थ प्रायः ऋ० १० । १४ । १०-११ के समान है। केवल 'मा विदीध्यः = विरुद्ध ध्यान न कर' यह एक विशेष है। तथा श्याम और शबल दिन रातोंके नाम हैं "अहर्वै शबलो रात्रिः श्यामः" (कौ० २ । ९) ॥

इहैधि पुरुष सर्वेण मनसा सह।
दूतौ यमस्य मानुगा अधि जीव पुरा इहि ॥ अथ० ५ । ३० । ६

इस मन्त्रमें भी दिनके लिये यम शब्दका प्रयोग है और संवादक्रममें पत्नी रूप रात्रिकी ओरसे दिनको योग्य अनुमति दी है। विवरणके लिये देखो सूक्त० अथ० १८ । १ । १५ (पृष्ठ १०८)

अन्यमु षु त्वं यम्यन्य उ त्वां परिष्वजाते लिबुजेव वृक्षम् ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥
ऋ० १० । १० । १४, अथ० १८ । १ । १६

इस मन्त्रमें रात्रिके लिये यमी शब्द आया है और संवादक्रममें पतिरूप दिनकी ओरसे रात्रिको भी नियोगकी अनुज्ञा दी है। विवरणके लिये देखो सूक्त० अथ० १८ । १ । १६ (पृष्ठ १०६)

यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः ।
आसीदतं स्वमु लोकं विदाने स्वासस्थे भवतमिन्दवे नः ॥
ऋ० १० । १३ । २

(यमे इव यतमाने यदैतम्) हे समष्टिसृष्टिरूपयज्ञस्य हविर्धाने द्यावापृथिव्यौ युवां यमे इव युगलभूते द्वे कन्ये इव यतमाने साम्मुख्ये प्रयतमाने यद्यतो हि युवामत्र समष्टावैतं प्राप्नुथः (मानुषा देवयन्तो वां प्रभरन्) मानुषा मनुष्या देवयन्त आत्मनो देवानिच्छन्तः समष्टिविद्यायां नैपुण्यमिच्छन्तः "न छन्दस्यपुत्रस्य" (अष्टा० ७।४।३५) 'अनेन क्यचीकाराभावः' युवां प्रभरन् प्रभरन्ति प्रधारयन्ति' 'लिङर्थे लेट्' तस्मात् (स्वमु लोकं विद्वाने आसीदतम्) स्वमुलोकं निजविद्यास्थानं विदाने प्राप्नुवत्यावासीदतं विद्याक्षेत्रे समन्तात्तिष्ठतम् (इन्दवे नः स्वासस्थे भवतम्) इन्दवे समष्टियज्ञाय "इन्दुर्यज्ञनाम" (नि० ३ । १७) नोऽस्मभ्यं स्वासस्थे सम्यग्विद्यास्थानप्रकाशिके भवतम् । इत्यधिदैवतम् ॥

भावार्थ—(यमे इव यतमाने यदैतम्) हे समष्टिरूप यज्ञ के हविर्धान होतव्य वस्तुओं के आश्रयीभूत द्यावापृथिवी तुम युगल दो कन्याओं के तुल्य आमने सामने जिससे प्रयत्न करती हुई प्राप्त हो अतः (मानुषा देवयन्तो वां प्रभरन्) मनुष्य तुम्हारी विद्यासे अपनेको विद्वान् बनानेकी इच्छा करते हुए तुमको धारण करते हैं

(स्वमुलोकं विदाने आसीदतम्) निजविद्यास्थानको प्राप्त होती हुई विद्याक्षेत्रमें वर्तमान रहो (इन्दवे नः स्वासस्थे भवतम्) समष्टियज्ञके लिये हमारे वास्ते सम्यक् विद्याक्षेत्रके प्रकाशक बनो ॥

शिक्षा—मनुष्यको विद्वान् बननेके लिये भूगोल और खगोलकी विद्याओंका परिचय करना आवश्यक है विना इनके समष्टिसंसारका परिचय नहीं हो सकता ॥

इस मन्त्रमें द्यावापृथिवी के लिये यमे शब्द आया है ॥

समौ चिद्धस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते ।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तौ न समं प्रणीतः ॥

ऋ० १० । ११७ । ९

(समौ चिद्धस्तौ न समं विविष्टः) समावपि हस्तौ न तुल्यं विविष्टः सर्वत्र व्याप्नुतः (सम्मातरा चिन्न समं दुहाते) सम् समा तुल्यैका माता ययोस्तौ सन्तानावपि न समं तुल्यं दुहाते दुग्धो दुग्धं पिबतः (यमयोश्चिन्न समा वीर्याणि) यमयोर्युगलयोरपि वीर्याणि बलानि न समा समानि तुल्यानि भवन्ति (ज्ञाती चित्सन्तौ समं न पृणीतः) ज्ञाती बन्धू अपि सन्तौ परस्परं समं न पृणीतः प्रसादयतस्तर्पयतः ॥

भाषार्थ—(समौ चिद्धस्तौ समं न विविष्टः) दोनों हाथ बराबर होते हुए भी सर्वत्र कार्यमें एक जैसे नहीं चलते हैं (सम्मातरा चिन्न समं दुहाते) एक मातासे उत्पन्न हुए भी दो बच्चे एक समान माता का दूध नहीं पीते (यमयोश्चिन्न समा वीर्याणि) युगल उत्पन्न हुए बालकोंके भी बल बराबर नहीं होते (ज्ञाती चित्सन्तौ समं न पृणीतः) दो मित्र या बन्धु भी परस्पर एक दूसरे के समान प्रेम नहीं करते ॥

शिक्षा—संसारके अन्दर विभिन्नताका राज्य है । जातियोंमें विभिन्नता है एक जातिकी व्यक्तियोंमें विभिन्नता है । वस्तुतः विभिन्नता विवेक और वस्तुपरिचयका निमित्त है । यदि कहीं आकृतिमें कुछ अभेद होगा तो वहां कर्ममें विभिन्नता होगी । दोनों हाथ देखनेमें बराबर हैं किन्तु काम करनेमें एक जैसे नहीं चलते । एक माताके दो बच्चे आयुमें बराबर हैं किन्तु एक समान दूध नहीं पीते । एक साथ उत्पन्न हुई दो वस्तुओं के बल विभिन्न हैं एक जैसे गहरे मित्रों में भी अधिक और अल्प प्रेम विभिन्नताका चित्र है ॥

इस मन्त्र में युगल अर्थ में यम शब्द का प्रयोग है ॥

इतश्च मामुतश्चावतां यमे इव यतमाने यदैतम् ।
प्र वां भरन् मानुषा देवयन्तो आ सीदतां स्वमु लोकं विदाने ॥

अथ० १८ । ३ । ३८

इस मन्त्रमें सहजात कन्याके अर्थ में उपमावाचक होकर 'यमे इव' शब्द आया है संसारमें अधः-ऊर्ध्व या स्थूल-सूक्ष्म की मर्यादा से पृथिवी और द्यौ वर्तमान हैं जो प्राणीमात्रको अपने अन्दर धारण करती हैं। विवरणके लिये देखो सूक्त० १८। ३। ३९ (पृष्ठ १६५)

एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च।
शकेम रायः सुधुरो यमं तेऽधिश्रवो देवभक्तं दधानाः॥ ऋ०१।७३।१०

(वेधोऽग्ने त एतोचथानि मनसे हृदे च जुष्टानि सन्तु) हे बुद्धिप्रद ईश्वर! तवैतानि वेदवचनानि मनसे हृदयाय च सेवितानि भवन्तु (यमं ते देवभक्तं श्रवो दधानाः सुधुरो रायोऽधिशकेम) तव नियामकं विद्वद्भिः सेवितं सर्वविद्याश्रवणं धरन्तः शोभन-धारणकं धनं प्राप्तुं शक्नुयाम। इति दयानन्दः॥

भाषार्थ—(वेधोऽग्ने त एतोचथानि) हे बुद्धिप्रद ईश्वर! तेरे ये वेदवचन (मनसे हृदे च जुष्टानि सन्तु) मन और हृदय के लिये उपयुक्त हों अर्थात् इन वेद-वचनों को हम अपने मनों और हृदयों में धारण करें (यमं ते देवभक्तं श्रवो दधानाः) तेरे नियामक तथा विद्वानों से सेवित सर्वविद्या के श्रवण को धारण करते हुए (सुधुरो रायोऽधिशकेम) शोभन धारण करने योग्य धन को प्राप्त कर सकें॥

शिक्षा—ईश्वर ने मनुष्यों के ज्ञान-विकास के लिये वेद मन्त्रों का उपदेश दिया है। उसको मन और हृदय में धारण करके संसार में सब प्रकार के सुखों को प्राप्त करना चाहिये॥

इस मन्त्र में नियामक अर्थ में यम शब्द आया है॥

यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि।
आगा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे॥
ऋ० १। ८३। ५

(प्रथमोऽथर्वा पथस्तते वेनो व्रतपा आजनि ततः सूर्यो गा आजत् काव्य उशना यज्ञैर्यमस्य सचा जातममृतमायजामहे) प्रख्यातोऽहिंसको विद्वान् मार्गान् तनुते कमनीयः सत्यनियमरक्षको जायते विस्तृतः सूर्यो यथा पृथिवीलोकानाकर्षणेन प्रक्षि-पति यथा कवेः पुत्रः शिष्यो वा कामयिता विज्ञानप्रचारैः सर्वनियन्तुर्विज्ञानेन प्रसि-द्धिगतमधर्मजन्मदुःखरहितं सङ्गच्छामहे। इति दयानन्दः॥

भाषार्थ—(प्रथमोऽथर्वा पथस्तते) प्रख्यात अहिंसक विद्वान् स्वमार्गों को

बनाता है (वेनो व्रतपा आजनि) कमनीय सत्यनियमरक्षक उत्पन्न होता है (ततः सूर्यो आजत्) विस्तृत हुआ सूर्य जैसे पृथिवीलोकों को आकर्षणसे इधर उधर कक्षामें चलाता है एवं (काव्य उशना यज्ञैः) कविका पुत्र या शिष्य कामनाशील विज्ञान प्रचारोंसे (यमस्य सचा) सर्वनियन्ताके विज्ञान से (जातममृतमायजामहे) प्रसिद्ध हुए अधर्म जन्म दुःखरहित सुखको प्राप्त करते हैं ॥

शिक्षा—धार्मिक विद्वान् जन संसारमें विद्याप्रचारसे जिस सत्य मार्गका प्रकाश करें वह धारण करने योग्य है ॥

इस मन्त्रमें नियन्ताके अर्थमें यम शब्द आया है ॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एनं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट ॥

ऋ० १ । १६३ । २, यजुः० २९ । १३

(वसव इन्द्रस्त्रितो यमेन दत्तमेनमायुनग्येन प्रथमोऽध्यतिष्ठद्गन्धर्वोऽस्य रशनामगृभ्णात् सूरादश्वं निरतष्ट) हे विद्वांसः ! विद्युत्पृथिवीजलान्तरिक्षेभ्यो वायुना दत्तं वह्निं युनक्ति-उपरि तिष्ठति पृथिव्या धर्ता सूर्यस्य किरणगतिं गृह्णाति सूर्यादाशुगामिनं वायुं तक्ष्णोति तनूकरोति । इति दयानन्दः ॥

भाषार्थ—(वसव इन्द्रस्त्रितः) हे विद्वानो ! विद्युत् पृथिवी जल अन्तरिक्ष से (यमेन दत्तमेनमायुनक्) वायुसे दिये हुए अग्निको युक्त होती है (प्रथमोऽध्यतिष्ठत्) जोकि प्रख्यात हुआ २ ऊपर स्थित होता है (गन्धर्वोऽस्य रशनामगृभ्णात्) पृथिवीका धारण करनेवाला किरणगतिको धारण करता है (सूरादश्वं निरतष्ट) सूर्य से आशुगामी वायुको सूक्ष्म बनाता है ॥

शिक्षा—विद्युत् पृथिवी, जल और अन्तरिक्षके अन्दरसे वायुके आधार पर अग्निके रूपको प्राप्त होती है । और वह सूर्यकी ओर से शीघ्रगामी वायुको सूक्ष्म करती है ॥

इस मन्त्रमें वायुके लिये यम शब्द आया है ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥

ऋ० १ । १६३ । ३, यजु० २९ । १४

(अर्वन् गुह्येन व्रतेन त्रितो यमोऽसि, आदित्योऽसि सोमेन विपृक्तोऽसि

दिवि त्रीणि बन्धनान्याहुः) हे जन ! वेगवान् गुप्तेन शीलेन त्रिभ्यो नियन्तेवासि सूर्यवद्विद्यया प्रकाशितस्त्वमसि, ऐश्वर्येण विशेषेण सम्बद्धोऽसि तस्य ते प्रकाशे त्रीणि बन्धनानि कथयन्ति । इति दयानन्दः ॥

भाषार्थ—(अर्वन् गुह्येन व्रतेन त्रितो यमोऽसि) हे मनुष्य ! तू वेग वाला गुप्तशीलसे तीनके लिये नियन्ताके समान है (आदित्योऽसि) सूर्यके समान विद्यासे प्रकाशमान है (सोमेन विवृक्तोऽसि) ऐश्वर्य से युक्त है (दिवि त्रीणि बन्धनान्याहुः) उसके प्रकाशमें देव-ऋण, ऋषि-ऋण, पितृ-ऋण ये तीन बन्धन कहते हैं ॥

शिक्षा—जैसे विद्युत् गुप्त आकर्षणधन से पृथिवी, जल, अन्तरिक्षमें विद्यमान होती हुई नियन्त्री है जैसे विद्युत्के समान राजा अपने नीति प्रयुक्त गुप्तधर्म से पृथिवी, समुद्र और पर्वतोंका नियन्ता स्वामी है वैसे शरीर, वाणी मनका स्वामी जीवात्मा है। क्योंकि वह सूर्यके समान विद्याप्रचार और ईश्वरीयबलसे युक्त होता है ॥

इस मन्त्रमें नियन्ताके अर्थमें यम शब्द आया है ॥

साकञ्जानां सप्तथमाहुरेकजं षडिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥

ऋ० १ । १६४ । १५

(साकञ्जानां सप्तथमेकजमाहुः) विश्वेदेवा अत्र देवताः "तस्य सूर्यस्य ये रश्मयस्ते विश्वेदेवाः" (श० ४ । ३ । १ । २६) "एते वै रश्मयो विश्वेदेवाः (श० १२ । ४ । ४ । ६) तस्मात् । साकञ्जानां सहजातानां सकृदुत्पन्नानां सूर्यरश्मीनां सप्तथं सप्तमं शुक्लभा इनिनामकं शुभ्रं रश्मिमेकजमेकस्मात् कारणादुत्पन्नमाहुर्वैज्ञानिका ब्रुवन्ति मन्यन्ते । सप्तथमित्यत्र "थट् च छन्दसि" (अष्टा० ५।२।५०) यश्च रश्मिमुख्यतः सूर्ये विद्यते । निरुक्तमप्येवं द्योतयतीव "सहजातानां षण्णामृषीणामादित्यरश्मयस्तेषामिष्टानि वा···नतानि वाऽद्भिः सह सम्मोदन्ते यत्रैतानि सप्त ऋषीणानि ज्योतींषि" (निरु० १४ । २०) (षडिद्यमा ऋषयो देवजा इति) षडिद् षट् तु ऋषयो गतिमन्तो रश्मयो देवजा देवेभ्यो द्युस्थानगतेभ्यः सूक्ष्मपदार्थेभ्य उत्पन्नाः सन्ति "देवः···द्युस्थानो भवतीति वा" (निरु० ७ । १५)(तेषामिष्टानि धामशो विहितानि) तेषां रश्मीनामिष्टानि कर्तव्यानि धामशो निजप्रभाव्यस्थानशो विहितानि निर्धारितानि सन्ति (रूपशो विकृतानि स्थात्रे रेजन्ते) रूपशो रूपं रूपमाश्रित्य विकृतानि भिन्ना भेदं प्राप्ताः स्थात्रे सूर्याय सूर्यमभिलक्ष्य रेजन्ते गतिं कुर्वन्ति । निरुक्तमप्यत्र रश्मिप्रकरणं द्योतयति ॥ पूर्वापरौ च रश्मिप्रकरणौ मन्त्रौ स्तस्तथा च सायणः ॥ .

भाषार्थ—(साकञ्जानां सप्तथमेकजमाहुः) सकृदुत्पन्न हुई सूर्य रश्मियों के मध्य सप्तम शुक्लभा नाम वाली शुभ्र रश्मिको एक ही कारणसे उत्पन्न हुई वैज्ञानिक लोग कहते हैं जो रश्मि मुख्यतः सूर्यके अन्दर विद्यमान है (षडिद्यमा ऋषयो देवजा इति) छः गतिशील रश्मियां तो द्युस्थान में प्राप्त सूक्ष्मपदार्थों से उत्पन्न हुई हैं (तेषामिष्टानि धामशो विहितानि) उन रश्मियोंके कार्य निज प्रभाव्य स्थान विभाग से निश्चित हैं (रूपशो विकृतानि स्थाने रेजन्ते) अपने २ रूपोंके आश्रयसे भिन्न २ हुई सूर्य को लक्ष्य करके गति करती हैं ॥

शिक्षा—सूर्य की सात रश्मियोंमें सातवीं शुक्लभा रश्मि मूल रश्मि है वह सूर्य के अपने स्वतः प्रभावसे ही उत्पन्न होती है शेष छः रश्मियां गतिशील हैं और द्युस्थान के सूक्ष्म पदार्थों से उत्पन्न हुई हैं जो कि रूपसे भिन्न २ हुई सूर्यको लक्ष्य करके संसार में गति करती हैं ॥

इस मन्त्र में यमनशील रश्मियों के लिये बहुवचनान्त यम शब्द आया है ॥

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥

ऋ० १ ।१६४ । ४६ ।

(विप्रा इन्द्रं मित्रं वरुणमग्निमाहुरथ स दिव्यः सुपर्णो गरुत्मान् बहुधा वदन्ति एकं सदग्निं यमं मातरिश्वानमाहुः) विद्वांसो जना ब्रह्मात्मानमेवेन्द्रं मित्रं वरुण-मग्निमाहुरथ च स एव विश्वात्मा दिव्यः प्रकाशमयः सुपर्णः सुपालको गरुत्मान् गुर्वात्मेत्येवं बहुधा बहुविशेषणैर्वदन्ति, यद्यपि ब्रह्मात्मैकं सद् वस्तु तथाप्यग्निमग्रे नेतारं यमं नियन्तारं मातरिश्वानं वायुमाहुः । निरुक्तेप्येवं व्याख्यातस्तथा च दयानन्दः॥

भाषार्थ—(विप्रा इन्द्रं मित्रं वरुणमग्निमाहुः) विद्वान् जन ब्रह्मात्मा को इन्द्र, मित्र, वरुण नाम से कहते हैं (अथ स दिव्यः सुपर्णो गरुत्मान् बहुधा वदन्ति) तथा वही विश्वात्मा प्रकाशमय सूर्य सुपर्ण गरुत्मान् एवं बहुत विशेषणों से कहते हैं (एकं सदग्निं यमं मातरिश्वानमाहुः) यद्यपि ब्रह्मात्मा एक सद् वस्तु है तथापि अग्र नेता होने से अग्नि नियन्ता होने से यम सर्वत्र प्राप्त होने से वायु कहते हैं ॥

शिक्षा—विश्व का उत्पन्न करने वाला देव यद्यपि एक है किन्तु विद्वान् लोग विविध गुणों के कारण उसको इन्द्र, मित्र, वरुण, आदित्य, चन्द्र, परमात्मा, अग्नि, यम, आदित्य आदि नामों से सम्बोधित करते हैं ॥

इस मन्त्र में यम शब्द का अर्थ विश्वनियन्ता ईश्वर है ॥

अग्ने शकेम ते वयं यमं देवस्य वाजिनः । अति द्वेषांसि तरेम ॥

ऋ० ३ । २७ । ३

(अग्ने ते वाजिनो देवस्य यमं वयं शकेम) अग्ने हे अग्रेनायक ! तव वाजिनो विज्ञानवतो देवस्य यमं यमनं नियन्त्रणं वयं धारयितुं शकेम शक्नुयाम (द्वेषांस्यतितरेम) द्वेषांसि पारस्परिकमनोवैपरीत्यान्यतितरेम पृथक्कुर्वीमहि ॥

भाषार्थ—(अग्ने ते वाजिनो देवस्य यमं वयं शकेम) हे अग्रेनेता ! तुझ विज्ञानसम्पन्न विद्वान् के नियन्त्रण को हम धारण कर सकें (द्वेषांस्यतितरेम) द्वेषों, पारस्परिक मनोमालिन्य आदि विचारों को हम पृथक् करें ॥

शिक्षा—विद्वान् नायक जन के नियन्त्रण में रह कर पारस्परिक मनोमालिन्य को दूर करना चाहिये ॥

क्व वोऽश्वाः क्वाभीशवः कथं शेक कथा यय ।
पृष्ठेसदो नसोर्यमः ॥ ऋ० ५ । ६१ । २

(क्व वोऽश्वाः क्वाभीशवः कथं शेक कथा यय नसोः पृष्ठे सदो यमः) हे मनुष्याः ! वो युष्माकं क्व कुत्राश्वाः सन्ति क्व चाभीशवोऽङ्गुलय इव व्यापनशीलास्तद्रश्मयः कथं न क्वापि दृश्यन्ते प्रत्युत यूयं कथं शेक, कथमेवं सद्यो गामिनो भवत । कथा यय केन प्रकारेण यूयं गच्छत नसोर्नासिकयोर्बन्धनीयं वस्तु क्व पृष्ठे च यत्सदः सदनमारोहणासनं क्व यमो नियन्ता च तेषामश्वानां सेवकः क्वास्ति न क्वापि तर्ह्येवं यूयमेतत्सर्वमन्तरेणात्र कथमागताः केनापि दिव्येन यन्त्रेण यूयमागता इति प्रतीयते । तथा च दयानन्दः ॥

भाषार्थ—(क्व वोऽश्वाः) हे मनुष्यो ! तुम्हारे घोड़े कहां हैं (क्वाभिशवः) और उनकी बागडोरें या लगाम कहां हैं । यहां कहीं दिखाई नहीं पड़ती प्रत्युत (कथं शेक) तुम लोग इस प्रकार कैसे शीघ्रगामी होते हो (कथा यय) किस प्रकार से तुम जाते हो (नसोः) नासिकाओंकी बन्धनीय वस्तु कहां है (पृष्ठे सदः) और पीठ परका आरोहण-आसन अर्थात् जीन कहां है (यमः) और उन घोड़ों का यमनशील सेवक अर्थात् साईस कहां है, कहीं भी नहीं । तब इस प्रकार इन सब वस्तुओंके विना यहां कैसे आए, किसी भी दिव्य यन्त्र विमान आदिसे आये हो ऐसा प्रतीत होता है ॥

शिक्षा—शीघ्रगमनके हेतु घोड़े, लगाम, ज़ीन, साईस आदि साधनोंसे भिन्न दिव्य साधन विमान आदि यान होता है इसको देखकर मनुष्य चकित होते हैं ॥

इस मन्त्रमें यमनशील सेवक अर्थात् साईसके अर्थमें यमशब्द आया है॥

त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।
यमेन ततं परिधिं वयन्तोऽप्सरस उपसेदुर्वसिष्ठाः ॥ ऋ० ७।३३।९

(अप्सरसो यमेन ततं परिधिं वयन्तो वसिष्ठाः प्रकेतैर्हृदयस्य निण्यं सहस्रवल्शमुपसेदुस्त इदभिसञ्चरन्ति) येऽन्तरिक्षचारिणो नियन्त्रा जगदीश्वरेण व्याप्तं सर्वलोकावरणं व्याप्नुवन्तोऽतिशयेन विद्यावन्तः प्रकृष्टप्रज्ञाभिरात्मनो मध्ये निर्णीतान्तर्गतमसंख्याताङ्कुरमिव बहुशास्त्रविज्ञानव्यवहारमुपसीदन्ति ते विद्वांस एव सम्यगाचरन्ति । इति दयानन्दः ॥

भाषार्थ—(अप्सरसो यमेन ततं परिधिं वयन्तः) जो अन्तरिक्षचारी नियन्ता जगदीश्वरसे व्याप्त सर्वलोकावरणको व्याप्त होते हुए (वसिष्ठाः प्रकेतैर्हृदयस्य निण्यं सहस्रवल्शमुपसेदुः) अत्यन्त विद्यावान् उत्तम बुद्धियोंसे अपने आत्मामें असंख्यात अङ्कुरके समान बहुत शास्त्रविज्ञानके व्यवहारको प्राप्त होते हैं (त इदभिसञ्चरन्ति) वे विद्वान् ही सम्यगाचरण करते हैं ॥

शिक्षा—अन्तरिक्षमें विमान द्वारा विचरने वाले विद्वान् अपनी उत्तम बुद्धियोंसे विद्याशास्त्रको धारण करते हुए संसारमें उत्तम आचरण और सुख प्राप्त करते हैं ॥

यहां यमका अर्थ नियन्ता ईश्वर है ॥

स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् ।
अर्यो गयं मंहमानं वि दाशुषे ॥ ऋ० ८ । २४ । २२

(वाजिनं यममनूर्मिं व्यश्ववदिन्द्रं स्तुहि) वाजिनं बलवन्तं यमं यमनशीलमनूर्मिमूर्मिरहितं प्रकाशतरङ्गरहितं व्यश्ववद् विगताश्ववद्रश्मिरहितमिवेन्द्रमादित्यं लक्ष्यीकृत्य स्तुहि सन्ध्यामुपास्व तत्साम्मुख्यं वा सेवस्व (अर्यो मंहमानं गयं दाशुषे वि) यश्चार्यः स्वामी दाशुषे दत्तवते यजमानाय मंहमानं महत्वयुक्तं गयं प्राणं विस्तारयति । "प्राणा वै गयाः" (श० १४ । ८ । १५ । ७) ॥

भाषार्थ—(वाजिनं यममनूर्मिं व्यश्ववदिन्द्रं स्तुहि) बलवान्, यमनशील प्रकाशतरङ्गरहित तथा रश्मिसञ्चाररहित आदित्यको लक्ष्यकरके सन्ध्योपासन कर या उसका सेवनकर (अर्यो मंहमानं गयं दाशुषे वि) स्वामी दाता यजमानके लिये महत्वयुक्त प्राणोंका विस्तार करता है ॥

शिक्षा—सूर्य जब प्रकाशतरङ्ग उठनेसे पूर्वकी अवस्थामें हो ऐसे प्रातःकाल

तथा जब रश्मिसञ्चार समाप्त हो चुके ऐसे सायंकालमें सन्ध्योपासन करना चाहिये। इस प्रकार सन्ध्योपासनसे जगदीश देव आत्मिक महत्ताका प्रदान करता है अथवा उक्त दोनों कालोंमें बाहर भ्रमण करना प्राणशक्ति बढ़ानेका हेतु है ॥

इस मन्त्रमें सूर्यके लिये यम शब्द आया है और उसके प्रातःकालीन तथा सायङ्कालीन स्वरूपका उपयोग है ॥

प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिम् । अग्निं रथानां यमम् ॥

ऋ० ८ । १०३ । १०

(आसाव प्रियाणां प्रेष्ठमु रथानां यममतिथिमग्निं स्तुहि) आसाव ! प्रियाणामतिप्रियं रथानां यमं नियन्तारमतिथिमतनशीलमतिगमनशीलमग्निं स्तुहि तद्विज्ञानेन सर्वत्र शिक्षस्व ॥

भाषार्थ—(आसाव प्रियाणां प्रेष्ठमु) हे विद्याओंके निष्कर्ष को निकालने वाले प्रियों के अतिप्रिय (रथानां यमम्) रथोंके नियन्ता (अतिथिमग्निं स्तुहि) अतनशील, गतिशील अग्निके विज्ञानकी सवत्र शिक्षा दे ॥

शिक्षा—अत्यन्त गतिका निमित्त इंजन आदि यानोंके नियन्ता अग्निकी विद्याका प्रचार करना चाहिये ॥

इस मन्त्रमें नियन्ताके अर्थमें यम शब्द आया है ॥

सं दक्षेण मनसा जायते कविर्ऋतस्य गर्भो निहितो यमा परः ।
यूना ह सन्ता प्रथमं विजज्ञतुर्गुहाहितं जनिम नेममुद्यतम् ॥

ऋ० ९ । ६८ । ५

(दक्षेण कविः संजायते मनसा ऋतस्य गर्भो निहितः संजायते) दक्षेण प्रज्ञानेन प्रद्योतनेन कविः सूर्यः संजायते प्रकटी भवति । "दक्षं प्रज्ञानम्" (ऐ० १ । १३) "असौ वा आदित्यः कविः" (श० ६ । ७ । २ । ४) मनसा मानसभावेनास्थिरभासनेन, ऋतस्योदकस्य गर्भो गर्भमध्ये निहितो यश्चन्द्रः स संजायते प्रकटी भवति । "मनसश्चन्द्रमाः" (ऐ० उ० १ । ४) "ऋतमुदकनाम" (नि० १ । १२) गर्भः, विभक्तिव्यत्ययः (यमा परोयूना ह सन्ता प्रथमं विजज्ञतुः) यमा यमौ संसारनियन्तारौ सूर्याचन्द्रमसौ । उक्तं च "येमाते भुवनानि विश्वा०" परोयूनाऽत्यन्तयुवानौ सन्तौ प्रथमं पूर्वं विजज्ञतुः प्रकटीभूतौ । परस् इत्यव्ययमत्यन्तार्थे यथा छान्दोग्ये "आदित्यस्य परः कृष्णं रूपम्" (३ । ४ । ३) (गुहाहितं नेममुद्यतं जनिम) तयोश्चैकस्य चन्द्रस्य

गुहाहितमन्धकारावृत्तायां रात्रौ निहितं जनिम प्रकटीभावोऽपरस्यैकस्य नेममर्धसमयमुद्यतमुदयरूपो दिवसप्रकाशः प्रकटी भावः ॥

भाषार्थ—(दक्षेण कविः संजायते) प्रद्योतमान प्रकाशसे सूर्य प्रकट होता है (मनसा ऋतस्य गर्भो निहितः) अस्थिर ज्योतिसे उदकके बीचमें स्थित चन्द्र प्रकट होता है (यमा परोयूना ह सन्ता प्रथमं विजज्ञतुः) संसारके नियन्ता सूर्य और चन्द्रमा अत्यन्त युवक होते हुए प्रथम प्रकट हुए (गुहाहितं नेममुद्यतं जनिम) उन दोनों में चन्द्रमाका अन्धकारावृत रात्रिमें प्रकटीभाव है और सूर्यका प्रकटीभाव, पृथिवीका अर्धभाग दिन का प्रकाश है ॥

शिक्षा—सूर्य प्रद्योतमान प्रकाश और चन्द्र अस्थिर ज्योति से प्रकट होते है दोनों पृथिवी से पूर्व उत्पन्न हुए २ तथा युवा या परस्पर सम्बन्ध रखने वाले हैं तथा चन्द्रका रात्रिमें और सूर्य का दिनमें प्रकाश होता है ॥

इस मन्त्रमें नियन्ता के अर्थ में द्विवचनान्त यम शब्द आया है ॥

अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या ।
भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे ॥

ऋ० १० । २१ । ५

(अथर्वणा जातोऽग्निर्विश्वानि काव्या विदत्) अथर्वणाऽचलायमानेन जगदीश्वरेण जातो जनितोग्निर्विश्वानि काव्या काव्यानि कविकर्माण्यादित्यकर्माणि ज्वलनादीनि विदत् प्राप्तवान् "असौ वा आदित्यः कविः (श० ६ । ७ । २ । ४) अत एव (विवस्वतो दूतोभुवत) विवस्वतस्तस्यादित्यस्य दूतस्तद्गुणसूचको भुवदस्ति । एवम् (यमस्य काम्यः प्रियो विवक्षसे) यमस्यादित्यस्य काम्यः कमनीयः प्रियः सन् विवक्षसे महत्त्वाय "विवक्षसे महन्नाम" (नि० ३ । ३) (मदे वो वि) मदे हर्षकरे सोमे सोमाद्योषधिहोमनिमित्ते वो युष्मभ्यं वि विधत्ते ॥ ?

भाषार्थ—(अथर्वणा जातोग्निर्विश्वानि काव्या विदत्) अचलायमान जगदीश्वरका रचा हुआ अग्नि आदित्यके ज्वलन आदि सब कर्मको प्राप्त है अत एव (विवस्वतो दूतो भुवत्) आदित्यका गुणसूचक है । एवम् (यमस्य काम्यः प्रियो विवक्षसे) आदित्य का कमनीय प्रिय होकर महत्व के कार्य में प्रवृत्त होता है (मदे वो वि) हर्षकारी सोम आदि ओषधि के होमार्थ तुम्हारे लिये विद्यमान है ॥

शिक्षा—अग्निमें सूर्यकी ज्वलन आदि शक्तियां मौजूद हैं और जैसे आकाश में सूर्य लोकों का नियन्ता है एवं पृथिवी पर सब परिणामों का निमित्त अग्नि है जिसमें होम करना चाहिये ॥

इस मन्त्र में सूर्य के लिये यम शब्द का प्रयोग है। यहां सायणने यम का अर्थ यजमान किया है ॥

अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः ।
अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे ॥

ऋ० १० । ४९ । ३

(अहं कवयेऽत्कं हथैः शिश्नथम्) अहं राजा सेनापतिर्वा कवये मेधाविने शत्रुसेनानायकायात्कं वज्रं हथैर्हननप्रकारैः शिश्नथं श्नथयेयं मारयेयं श्नथयामि मारयामि वा। "श्नथयति वधकर्मा" (नि० २ । १९) (अहमाभिरूतिभिः कुत्समावम्) अहमाभिरूतिभी रक्षणक्रियाभिः कुत्सं स्ववज्रमावं समन्ताद्रक्षेयं रक्षामि वा, "कुत्सं वज्रनाम" (नि० २ । २७) (अहं शुष्णस्य श्नथिता) अहं शुष्णस्य शत्रुबलस्य श्नथिता हिंसिता स्याम् "शुष्णं बलनाम" (नि० २ । ९) (वधो यमम्) वधो निजसैन्यबलं यमं नियमितवान् नियच्छामि वा। 'यम धातोरङि लुङ्लकाररूपमडभावश्च' [अत्रैकेन महानुभावेन भ्रान्त्या यममिति नामपदं मत्वा यमप्रकरणे पठितो मन्त्रः] (य आर्यं नाम दस्यवे न ररे) यश्चाहमार्यं नाम दस्यवे दुष्टजनाय न ररे न दत्तवान् न ददामि वा ॥

भाषार्थ—(अहं कवयेऽत्कं हथैः शिश्नथम्) मैं राजा या सेनापति बुद्धिमान् शत्रुसेनानायकके लिये वज्रको हनन प्रकारोंसे ताड़ित करता हूँ (अहमाभिरूतिभः कुत्समावम्) मैं इन अपनी रक्षणक्रियाओंसे स्ववज्रको स्थिर रखता हूँ (अहं शुष्णस्य श्नथिता) मैं शत्रुबलको नष्ट करने वाला होंऊं (वधो यमम्) और निज सैन्यबलको नियन्त्रित करता हूँ (य आर्यं नाम दस्यवे न ररे) क्योंकि दस्यु के साथ युद्ध करके उसको पराजित करना और आर्यकी रक्षा करना मेरा कर्तव्य है, उस दस्युके लिये आर्य नाम नहीं देता हूँ ॥

शिक्षा—राजा या सेनापतिको उचित है कि दुष्ट शत्रुके प्रति सज्जनताका व्यवहार न करे किन्तु हनन प्रकारोंसे वज्रसे ताड़न और उसके बलको अस्त व्यस्त करने तथा अपने वज्रको बचावसे धारण और स्वसेना बल का नियन्त्रण करना चाहिये शत्रुको कभी भी सज्जन समझ कर न छोड़ना चाहिये ॥

इस मन्त्रमें यम शब्द नहीं है और न ही यमका कोई लेश है। किसी विद्वान् ने भ्रान्ति से "यमम्" मन्त्रमें आये इस क्रियापदको द्वितीयान्त नाम पद पढ़कर यमके प्रकरणमें मन्त्रका संग्रह कर दिया जो उचित न था। सायण ने भी

स्पष्टरूप से क्रियापदका ही अर्थ लिखा है। यह पद सर्वानुदात्त है। आमन्त्रित और युष्मद् अस्मद्के अन्वादेशको छोड़कर कोई भी नामवाचक पद सर्वानुदात्त नहीं होता क्रियापद ही पूर्व पदको अपेक्षित करके सर्वानुदात्त होता है यह बात व्याकरणशास्त्रज्ञ जानते ही हैं॥

भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः।
श्रमस्य दायं विभजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः॥

ऋ० १०। ११४। १०

(रथस्य धूर्षु युक्तासोऽस्थुः) रथस्य सूर्यमण्डलस्य धूर्षु परिधिषु युक्तासोऽश्वा इव युक्ताः सूर्यरश्मयोऽस्थुस्तिष्ठन्ति (एके भूम्या अन्तं परिचरन्ति) एके रश्मयो भूम्याः पृथिव्याः सीमान्तं परिचरन्ति परिभ्रमन्ति (श्रमस्य दायं विभजन्ति) एके श्रमस्य दायं खण्डयितारं भागं विभजन्ति सेवन्ते एवमहोरात्रौ सम्पादयन्ति (एभ्यो यदा यमो हर्म्ये हितो भवति) एभ्य एषाम्। 'षष्ठ्यर्थे चतुर्थी बहुलम्' यदा यमो रश्मिभिरादित्यो हर्म्ये गृहे मण्डले हितः स्थितो भवति "हर्म्यं गृहनाम" (नि० ३। ४)॥

भाषार्थ—(रथस्य धूर्षु युक्तासोऽस्थुः) सूर्यमण्डलकी परिधियोंमें घोड़ोंके समान युक्त हुई सूर्यरश्मियां स्थिर हैं (एके भूम्या अन्तं परिचरन्ति) जिनमें से कुछ एक किरणें पृथिवी की सीमा पर परिभ्रमण करती हैं (श्रमस्य दायं विभजन्ति) और कुछ एक श्रमके खण्डित करने वाले भागको सेवन करती हैं इस प्रकार दिन रातको बनाती हैं (एभ्यो यदा यमो हर्म्ये हितो भवति) इन रश्मियोंका यमन करने वाला आदित्य जब अपने मण्डलमें स्थिर होता है॥

शिक्षा—सूर्यमण्डलकी रश्मियोंका संचार दो प्रकार से है जो सूर्यरश्मियां भूमिके ऊपरी भाग पर स्पर्श करती हैं वे दिनका प्रकाश करती हैं और जो सूर्य के अस्त होने पर पृथिवीके अलग करने वाले दूसरे भाग पर होती हैं वे रात्रि को बनाती हैं॥

इस मन्त्रमें आदित्यके लिये यम शब्द आया है॥

दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः। पूर्वेण मघवन्पदाजो
वयां यथा यमो देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥

ऋ० १०। १३४। ६

(मन्तुमो दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि) मन्तुमो हे मननशील राजन्!

यथा हस्तिपो दीर्घं ह्यङ्कुशं धारयति तथा त्वं शक्तिं सैन्यशक्तिं बिभर्षि धारयसि (मघवन् पूर्वेण पदाजो वयां यथा यमः) मघवन् हे ऐश्वर्यवन् राजन् ! यथाऽजश्छागः पूर्वेण यथापादेन वयां शाखामायत्ती करोति तथा वा त्वं यमो नियच्छ । अत्र यम धातोर्लेटि रूपम् (जनित्री देव्यजीजनज्जनित्री भद्राजीजनत्) जनित्री जनयित्री या देवी त्वामेवं राष्ट्रपालनार्थमेवोत्पादितवती सा भद्रा कल्याणकारिणी त्वामेतदर्थमुत्पादितवती ॥

भाषार्थ—(मन्तुमो दीर्घं ह्यङ्कुशं यथाशक्ति बिभर्षि) हे मननशील राजन् ! जैसे हाथीवान् दीर्घ अङ्कुशको धारण करता है वैसे तू सेनाशक्ति को धारण करता है (मघवन् पूर्वेण पदाऽजो वयां यथा यमः) हे ऐश्वर्यशाली नरेश ! जैसे बकरी अपने आहार के लिये सामनेके पैरसे पेड़की शाखाको स्ववश करती है वैसे तू भी राष्ट्र का नियमन कर (जनित्री देव्यजीजनत्) उत्पन्न करने वाली दिव्य शक्ति ने या तेरी माता ने तुझे राष्ट्रपालन के लिये उत्पन्न किया है (जनित्री भद्राऽजीजनत्) उत्पन्न करने वाली तथा तुझे सुख देने वाली ने तुझे उत्पन्न किया है इसलिये कुछ राष्ट्र सम्बन्धी कर्तव्य का पालन कर ॥

शिक्षा—हाथीवान् जैसे अङ्कुशसे हाथी का नियन्त्रण करता है इसी प्रकार राष्ट्रपतिको सेनाद्वारा निजराष्ट्रका नियन्त्रण करना चाहिये । राजवंश में जन्म पा कर राष्ट्रकी उन्नति तथा प्रजाहित का ध्यान अवश्य होना चाहिये ॥

इस मन्त्रमें भी यम शब्द नहीं है और न ही उसका कोई लेश है किन्तु यम धातुसे लेट् लकार का प्रयोग है । यहां भी "यमः" सर्वानुदात्त पद है । सायण ने भी स्पष्ट लिखा है—"यमेर्लेट्यडागमः बहुलं छन्दसीति शपो लुक्" (इति सायणः) ॥

यमाय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय हयो दात्र एधि वयो मह्यं प्रति ग्रहीत्रे ॥ यजुः० ७ । ४७ ॥

(वरुणो यमाय मह्यं त्वा ददातु) वरुणः सत्योपदेष्टाप्तो यमाय विषयभोगादुपरताय मह्यं त्वामुपदेशकं ददातु (सोऽमृतत्वमशीय) सोऽहममृतत्वं मोक्षमशीय प्राप्नुयाम् (दात्रे हय एधि) दात्रे वरुणाय त्वं हयो ज्ञानवर्धननिमित्तमेधि भव (मह्यं वयः प्रतिग्रहीत्र एधि) मह्यं चिरजीवनसुखं स्वीकर्त्रे भव ॥ इति दयानन्दः ॥

भाषार्थ—(वरुणो यमाय त्वा मह्यं त्वा ददातु) सत्योपदेशक आप्त पुरुष विषयभोग से उपरत मेरे लिये तुझको देवे (सोऽमृतत्वमशीय) मैं मोक्षपद प्राप्त करूं (दात्रे हय एधि) दान करने वाले वरुण के लिये तू ज्ञान का निमित्त बन

(मह्यं वयः प्रतिग्रहीत्र एधि) मुझ चिरजीवन सुख स्वीकार करने वाले के लिये तू स्थिर हो ॥

शिक्षा—सत्योपदेष्टा आप्त विद्वान् अपने तय्यार किये हुए विद्यार्थियों को पुरोहित, शिक्षक तथा उपदेशक के रूपमें यजमानों में भेजे और उनको धार्मिक रुचि उत्पन्न करके धर्मलाभ पहुँचा कर सुख का कारण बने ॥

इस मन्त्रमें यमका अर्थ विषयभोगसे उपरत सज्जन पुरुष है ॥

प्रथमा ह व्युवास सा धेनुरभवद्य यमे ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥ अथ० ३ । १० । १

(प्रथमा ह्युवास) प्रथमा प्राथमिकोषा ह्युवसान्धकारनाशनं कृतवती (सा यमे धेनुरभवत्) सोषा यमे सूर्यनिमित्ते धेनुर्धापयित्री माताऽभवत् । 'यमे निमित्तसप्तमी' । "रुशद्वत्सा सूर्यवत्सा सूर्यमस्या वत्समाह सहचरणाद्रसहरणाद्वेति" (निरु० २ । २०) (सा पयस्वती न उत्तरामुत्तरां समां दुहाम्) सा पयस्वती रसवती सती नोऽस्मभ्यमुत्तरामुत्तरां समामग्रेऽग्रे काले दुहां सुखं दुग्धाम् ॥

भाषार्थ—(प्रथमा ह्युवास) सबसे प्रथम आनेवाली ऊषा ने रात्रि के अन्धकार को नष्ट कर दिया (सा यमे धेनुरभवत्) वह सूर्यके निमित्त उसको धारण करने वाली माता बनी (सा पयस्वती न उत्तरामुत्तरां समां दुहाम्) वह रसवाली होती हुई हमारे लिये आगे २ के कालमें सुखका दोहन करे ॥

शिक्षा—प्रातःकालकी उषा जब आती है तो रात्रिका अन्धकार नष्ट हो जाता है पुनः उसके साथ सूर्य का आगम होता है मानो सूर्यको वह वत्सके समान धारण करती हुई हमारे लिये सुखको दोहती हुई आती है ॥

इस मन्त्रमें आदित्यके लिये यम शब्द आया है ॥

यद्राजानो विभजन्त इष्टापूर्तस्य षोडशं यमस्यामी सभासदः ।
अविस्तस्मात् प्रमुञ्चति दत्तः शितिपात् स्वधा ॥ अथ० ३।२९।१

(यमस्यामी सभासदो राजानो यदिष्टापूर्त्तस्य षोडशं विभजन्ते) यमस्य यमनशीलस्य राज्ञोऽमी सभासदो राजानो राज्याधिकारिणो यदिष्टापूर्त्तस्येष्टापूर्त्तार्थं षोडशमायस्य भागं विभजन्ते राजबलाद् गृह्णन्ति (तस्मादविः शितिपात्प्रमुञ्चति) तस्मादवी रक्षकः स भागः शितिपाच्छुक्लपात् पुण्यपात्स्वधा कररूपा सती दुःखात्प्रमुञ्चति ॥

भाषार्थ—(यमस्यामी सभासदो राजानः) सम्राट्के सभासद् माण्डलिक राजा वा राजपुरुष (यदिष्टापूर्त्तस्य षोडशं विभजन्ते) इष्टापूर्त्त के लिये इष्ट अर्थात्

विद्वत्सभा, राष्ट्रसम्मेलन, राष्ट्रपालन तथा नियमन सङ्गतिकरण, शिक्षणालय आदि स्थानोंमें व्ययार्थ, आपूर्त्त अर्थात राजमार्ग यात्रिशाला, गोशाला, कूप, तड़ाग, वापी बन्ध आदि सामाजिक (Public) कार्य के लिये सोलहवां भाग राजबलसे ग्रहण करते हैं (तस्मादर्वि शितिपात् प्रमुञ्चति) अतएव वह रक्षाके निमित्त पुण्यांश कर रूप (Tax) भेंट उनको दुःखसे छुड़ाती है ॥

शिक्षा—राष्ट्रपति की आज्ञासे राजपुरुष प्रजासे विद्याप्रचारादि धार्मिक तथा यात्रिशालादि सामाजिक कार्यों के लिये सोलहवां भाग कर लिया करें जिससे वह प्रजाको सब प्रकारके दुःखोंसे बचा सकें ॥

इस मन्त्रमें राष्ट्रपतिके लिये यम शब्द आया है ॥

अवैरहत्यायेदमा पपत्यात् सुवीरताया इदमा ससद्यात् ।
पराङेवपरा वद पराचीमनुसंवतम् । यथा यमस्य त्वा
गृहेऽरसं प्रति चाकशानाभूकं प्रति चाकशान् ॥ अथ० ६ । २९ । ३

(अवैरहत्यायेदमा पपत्यात्) वीरहत्यायां भवं वैरहत्यं कर्म तदभावोऽवैरहत्यं तस्मा अवैरहत्याय कर्मण इदं पाप्म वज्रमापपत्यात् समन्तात्पतति (सुवीरताया इदमाससद्यात्) सुवीरतायै पाप्म वज्रमाससद्यादासदनं शान्तं भावं प्राप्नोति (पराङेव परावद पराचीमनु संवतम्) पराङेव पराङ्मुखानेव सैनिकान् परावद भर्त्सय निन्द्य पराचीमनु या पराची दिशा तैरनुगता तां प्रति संवतं सङ्गतं भव (यमस्य गृहे यथाऽरसं त्वा प्रतिचाकशानाभूकं प्रतिचाकशान्) यमस्य यमनशीलस्य कालस्य गृहे ग्रहणात्मके व्यापारे प्रवर्तमानं यथाऽरसं पाप्म वज्रं त्वां प्रतिचाकशान् तेऽवीराः प्रतिपश्येयुः, आभूकमासमन्ताद् भवन्ति यस्मिन्निति स आभूकः कालोऽथवा त्वामाभूकं कालमेव तेऽवीराः प्रतिपश्येयुः ॥ "सुवृभूशुषिकुषिभ्यः कुक्" (उणा० ३ । ४१) ॥

भाषार्थ—(अवैरहत्यायेदमा पपत्यात्) अवीरहत्या कर्मके निमित्त अर्थात् कायरता के लिये यह पाप वज्र सब तरफ से गिरता है (सुवीरताया इदमाससद्यात्) सुवीरता के लिये वह पाप वज्र शान्त भावको प्राप्त होता है (पराङेव परावद पराचीमनुसंवतम्) पराङ्मुख सैनिकों को निन्दित कर और पीछेकी दिशा में लौटने वालों के साथ सङ्गत हो (यमस्य गृहे यथाऽरसं त्वा प्रतिचाकशानाभूकं प्रतिचाकशान्) यमनशील काल के व्यापार में प्रवृत्त हुए तुझ पाप वज्र को वे अवीर कायर पुरुष देखें या तुझ कालरूप को देखें ॥

शिक्षा—युद्ध क्षेत्रमें कायरता दिखलाने वाले पुरुषों के ऊपर वज्रपात होता

है और धीरताके साथ युद्ध करने वालों के प्रति वह कुछ प्रभाव नहीं कर पाता। जो युद्धक्षेत्र से मुंह मोड़ कर भागते हैं मानों उनके पीछे २ पाप वज्र घूमता है॥

इस मन्त्रमें यमनशील काल के लिये यम शब्द आया है॥

अष्टेन्द्रस्य षड् यमस्य ऋषीणां सप्त सप्तधा॥
अपो मनुष्यानोषधीस्ताँ उ पञ्चानु सेचिरे॥ अथ० ८।९।२३

(इन्द्रस्याष्ट) इन्द्रस्यादित्यस्याष्टादित्या यामा अहोरात्रस्याष्टप्रहराः पदानि सन्ति "अष्टौ ह वै पुत्रा अदितेः। यांस्त्वेतद्देवा आदित्या इत्याचक्षते" (श० ३।१।३।३)(यमस्य षट्) यमस्य संवत्सराख्यस्य कालस्य षडृतवः पदानि सन्ति (ऋषीणां सप्त सप्तधा) ऋषीणां प्राणानां सप्तेन्द्रियगोलकानि पदानि सप्तधा परस्परं सप्तपदेषु सम्बद्धानि सन्ति (अपो मनुष्यानोषधीस्ताननु पञ्च सेचिरे) अपो जलानि, मनुष्यान्, ओषधीस्ता-नेतान् प्रति पञ्च पदानि सेचिरे समवयन्ति। 'षच समवाये'। कूपस्तडागो-नदी स्रोतो द्यौश्चेत्येवं स्थानानि जलस्य। यथा वा मन्त्रे—"शं न आपो धन्वन्याः शमु सन्त्वनूप्याः। शं नः खनित्रिमा आपः शमु या कुम्भ आभृताः शिवा नः सन्तु वार्षिकीः" (अथ०१।६।४) 'ब्राह्मणक्षत्रियविट्शूद्राः। निषादः पञ्चमः' इति पञ्चपदानि मनु-ष्याणाम्। पार्थिवजङ्गमौद्भिदाप्यदिव्यभेदादोषधीनां पञ्चविधत्वम्॥

भाषार्थ—(इन्द्रस्याष्ट) आदित्य के आठ याम, दिन रात के आठ प्रहर पद हैं (यमस्य षट्) संवत्सर कालके वसन्तादि ऋतु नाम से छः पद हैं (ऋषीणां सप्त सप्तधा) प्राणों के सप्तेद्रिन्य गोलक पद हैं परस्पर एक २ गोलक के तन्तु सातों से सम्बन्ध रखने वाले हैं (अपो मनुष्यानोषधीस्ताननु पञ्च सेचिर) जल, मनुष्य ओषधि इनके प्रति पञ्च पद सम्बन्ध रखते हैं अर्थात् कूप, तडाग, नदी, स्रोत और द्युलोकके भेद ये जलके पांच स्थान हैं। ब्राह्मण, क्षत्रिय,वैश्य, शूद्र और निषाद भेदसे पांच मनुष्य हैं। पार्थिव,जङ्गम,उद्भिद, जलीय और दिव्य भेदसे पांच ओषधियां हैं॥

इस मन्त्रमें संवत्सर काल के लिये यम शब्द आया है॥

........यमाय असूम्॥ यजु० ३०।१४

(यमायासूम्) दण्डदानायासूं हस्तादिप्रक्षेप्त्रीं परासुव। इति दयानन्दः॥

भाषार्थ—(यमाय) दण्ड देने वालेके लिये प्रवृत्त हुई (असूम्) हस्तादि फैंकने वाली दण्डनीय पुरुषकी स्त्री आदि को पृथक् कर देना चाहिये॥

शिक्षा—जिस व्यक्तिको अपराधवश न्यायाधीशकी ओरसे दण्ड दिया जाये तो दण्डनीय पुरुषकी स्त्री आदि व्यक्तिको पाससे हटा देना चाहिए॥

इस मन्त्रमें दण्डदाताके लिये यम शब्द आया है ॥

........यमाय यमसूम् ॥ यजु० ३० । १५

(यमाय यमसूम्) नियन्त्रे नियन्तॄणां सवित्रीम् । इति दयानन्दः ॥

भावार्थ—(यमाय) नियन्ताके लिये (यमसूम्) नियन्ताओं को उत्पन्न करने वाली व्यक्ति को बुलाओ ॥

शिक्षा—समाज या राष्ट्रके अच्छे नियन्ताकी माताका सत्कार करना चाहिये ॥

इस मन्त्रमें नियन्ताके लिये यम शब्द आया है ॥

यत् संयमो न वियमो वियमो यन्नसंयमः ।

इन्द्रजाः सोमजा आथर्वणमसि व्याघ्रजम्भनम् ॥ अथ० ४ । ३ । ७

(इन्द्रजाः संयमो न वियमः) इन्द्रजा राष्ट्रपतिकृतं संयमः संयमनं न वियमो वियमनं भवति (सोमजा वियमो न संयमः) सोमजा ब्राह्मणकृतं वियमो वियमनं न संयमः संभमनं भवति "सोमो वै ब्राह्मणः" (तां० २३ । १६ । ५) (यदाथर्वणं व्याघ्रजम्भनमसि) यदेतदाथर्वणमथर्वणाऽहिंसकेन कृतं बन्धनं व्याघ्रजम्भनं व्याघ्रस्येव जम्भनं वशीकरणमस्ति । 'पुरुषव्यत्ययः' ॥

भावार्थ—(इन्द्रजा संयमो न वियमः) राष्ट्रपतिकी ओरसे जिन बातोंका संयमन किया गया हो उनका कभी वियमन भङ्ग न होना चाहिये तथा (सोमजा वियमो न संयमः) ब्राह्मणोंने जिन धार्मिक तत्वोंका वियमन अर्थात् फैलाव किया हो उनका कभी संयमन न होना चाहिये (यदाथर्वणं व्याघ्रजम्भनमसि) उक्त राष्ट्रपतिका संयमन और धार्मिक विद्वानों ब्राह्मणों का वियमन प्रजाके लिये अभ्युदय और निःश्रेयस् अर्थात् दुनियां और दीनकी कार्यसिद्धिके निमित्त हिंसारहित व्याघ्रजम्भनतुल्य है ॥

शिक्षा—राष्ट्रसंचालनके लिये राष्ट्रीय नियम और धर्मशास्त्रके आचरण भली प्रकारसे सेवन किये जायें और दोनों परस्पर एक दूसरेका बाधक न हों किन्तु प्रजा के हित सम्पादन करने वाले हों ॥

इस मन्त्रमें यम शब्द नहीं है किन्तु संयम और वियम शब्द हैं जो कि धात्वर्थापेक्षित हैं ॥

त्रिकद्रुकेभिः पवते षडुर्वीरेकमिद् बृहत् ।
त्रिष्टुब् गायत्री छन्दांसि सर्वा ता यम अर्पिता ॥

ऋ० १० । १४ । १६, अथ० १८ । २ । ३६

इस मन्त्रमें कालके लिये यम शब्द आया है तथा यह मन्त्र यम सूक्तका है जिसके अन्दर काल विज्ञान (Philosaphy of time) का वर्णन है और इस मन्त्रमें काल भूत, वर्तमान और भविष्यत् रूप तीन चक्रों द्वारा ऋतुओं में विभक्त होजाता है। न केवल प्राणियों के लिये ही यह काल यमन करने वाला है अपि तु पृथिवी, अन्तरिक्ष और द्यौ एवं तीनों लोकों अर्थात् सम्पूर्ण भुवन समयके नियन्त्रणमें रहता है इस बातका वर्णन है। विवरणके लिये देखो सूक्त १० । १४ । १६ (पृष्ठ ३७)

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।
विजेहमानः परशुर्नः जिह्वा द्रविर्न द्रावयति दारु धक्षत् ॥

ऋ० ६ । ३ । ४

(अस्य तिग्मं महि वर्पो यमसानो विजेहमानोऽश्वो नासा भसत्) अस्य विदुषस्तीव्रं महद्रूपं नियन्ता शब्दायमानोऽश्व इवाऽऽस्येन भासयति (परशुर्न जिह्वां द्रविर्न द्रावयति) कुठार इव वाणी द्रवीभूत्वोच्चारणक्रिया आर्द्रीं करोति (दारु धक्षत् चिदेम) काष्ठं दहेदपि प्राप्नुयाम् । इति दयानन्दः ॥

भाषार्थ—(अस्य तिग्मं महि वर्पः) विद्वान् का तैजस तथा महत्वपूर्ण रूप (यमसानो विजेहमानोऽश्वो नासा भसत्) नियन्ता शब्दायमान घोड़ेके समान मुखसे ध्वनि करता है (परशुर्न जिह्वाम्) कुठारके समान वाणी (द्रविर्न द्रावयति) द्रवीभूत होती हुई जैसी उच्चारणक्रियाओंको गीला करती है (दारु धक्षत्) काष्ठ को जलाती हुई जैसी है (चिदेम) उस वाणीको हम अवश्य प्राप्त करें ॥

शिक्षा—विद्या और ब्रह्मचर्य आदिसे तेजस्वी रूपलावण्य सम्पन्न मनुष्यकी कुठारवत् शीघ्रगतिवाली जिह्वासे उच्चरित बातोंको हम सुनें ॥

इस मन्त्रमें यम शब्द पृथक् नहीं है किन्तु समस्त शब्द 'यमसान' है जिस का अर्थ नियमन करने वाला है ॥

यस्मिन् वृक्षे सुपलाशे देवैः संपिबते यमः । अत्रा नो
विश्पतिः पिता पुराणाँ अनुवेनति ॥ ऋ० १० । १३५ । १

इस मन्त्रमें आदित्य के अर्थमें यम शब्द आया है। इस मन्त्रकी व्याख्या निरुक्तमें की है। वहां "यमो रश्मिभिरादित्यः" (नि० १२ । २९) इस का अर्थ आदित्य किया है किन्तु किन्हीं विद्वान् ने इस मन्त्र के 'यम' का अर्थ जीवात्मा किया

है उपर्युक्त निरुक्तकारके अर्थ को उपेक्षा से देखा है जो ठीक नहीं है। इसके सम्बन्धमें हम "प्राक्समन्वय" में संकेत कर चुके हैं। यहां मन्त्रमें संसारको वृक्षतुल्य क्षणभङ्गुर तथा जीवोंका निवासस्थान बतलाया है और सब जीवों का पिताके तुल्य सूर्यदेव अपनी किरणोंसे उत्पत्ति तथा रक्षा के लिये सङ्गत होता है। पुनः वही सूर्य वयोहीन जीवोंके सत्व कोखींच कर स्ववश कर लेता है। यह चर्चा है। विवरण के लिये देखो सूक्त० ऋ० १०। १३५। १ (पृष्ठ ६४)॥

इदं सवितर्विजानीहि षड् यमा एक एकजः।
तस्मिन् हापित्वमिच्छन्ते य एषामेक एकजः॥ अथ० १०। ८। ५

(सवितरिदं विजानीहि षड् यमा एक एकजः) सवितर्हे सूर्य! त्वमिदं विजानीहि विज्ञानं स्थिरीकुरु वाऽयं सूर्य एवं विज्ञानमादधाति यत् षड् यमा यम्यते नियम्यते विश्वं यैस्ते यमाः सूर्यरश्मयोऽथैक एकज एकस्मात्कारणाज्जातः सप्तमः शुक्लभारश्मिः, एवं सप्त ते रश्मयो ये सन्ति तान् त्वं विजानीहि विजानाति वा विज्ञानव्यापरे स्थापय स्थापयति वा। "प्रकीर्णसमन्वये पश्यत (पृ० ४१६) ऋ० १। १६४। १५" (य एषामेक एकजस्तस्मिन् हापित्वमिच्छन्ते) य एषां रश्मीनामेक एकजः शुक्लभा रश्मिस्तस्मिन्नन्ये षड् रश्मयो ह निरन्तरमपित्वं लयमिच्छन्ते प्राप्नुवन्ति, इति विज्ञानसिद्धान्तोऽनुभवश्च योगिनामपि। अस्मात् पूर्वश्च मन्त्रो "द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत। तत्राहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये" (अथ० १०। ८। ४) सूर्यविज्ञानविषयकस्तस्मादुत्तरेऽत्र प्रकृतमन्त्रे तदेव विज्ञानं सङ्गच्छते॥

भाषार्थ—(सवितरिदं विजानीहि) हे सूर्य! तू इस विज्ञानको स्थिर कर अथवा यह सूर्य इस प्रकार विज्ञानको धारण करता है (षड् यमा एक एकजः) कि छः संसारको नियमन करने वाली सूर्यरश्मियां और सातवीं स्वतः सूर्यसे उत्पन्न हुई शुक्लभा नामकी एवं ये सात किरणें हैं सूर्य जिनके वैज्ञानिक व्यापारमें स्थिर है (य एषामेक एकजस्तस्मिन् हापित्वमिच्छन्ते) और जिनमें स्वतः प्रकाशसे उत्पन्न हुई शुक्लभा मूल किरण है उसमें ये अन्य विविध रंग वाली छः किरणें निरन्तर लयको प्राप्त होती हैं। यह एक वैज्ञानिक सिद्धान्त और योगियोंका अनुभव है॥

शिक्षा—संसारका नियमन करने वाली विविध रंगकी छः किरणें शुक्लभा नामकी किरणमें लीन होजाती हैं यह एक रश्मिविज्ञानका सिद्धान्त है॥

इस मन्त्रमें संसारका नियमन करने वाली रश्मियोंके अर्थमें बहुवचनान्त यम शब्द आया है ॥

मृत्योरहं ब्रह्मचारी यदस्मि निर्याचन् भूतात् पुरुषं यमाय ।
तमहं ब्रह्मणा तपसा श्रमेणानयैनं मेखलया सिनामि ॥

अथ० ६ । १३३ । ३

(मृत्योरहं ब्रह्मचारी यदस्मि) अहं जीवो मृत्योर्ब्रह्मचार्यस्मि (भूतात् पुरुषं यमाय निर्याचन्) भूताद् भूतमात्रादुत्पन्नं पुरुषं शरीरं यमाय नियमनाय निर्याचन् निर्बाधयन् । "याचति वधकर्मा" (नि० २ । १९) (अहं तमेनं ब्रह्मणा तपसा श्रमेणानया मेखलया सिनामि) अहं तमेनं पुरुषं शरीरं ब्रह्मणा वेदेन तपश्चरणेन पुरुषार्थेनानया मेखलया कौपीनेन सिनामि बध्नामि ॥

भावार्थ—(मृत्योरहं ब्रह्मचारी यदस्मि) मैं जीव मृत्युका ब्रह्मचारी हूँ (भूतात् पुरुषं यमाय निर्याचन्) भूतमात्रसे उत्पन्न हुए शरीरको नियमन करनेके लिये बाधा न पहुँचाता हुआ (अहं तमेनं ब्रह्मणा तपसा श्रमेणानया मेखलया सिनामि) मैं इसको वेदसे, तपश्चरणसे, पुरुषार्थसे और इस कौपीनसे बांधता हूँ, नियमित करता हूँ या साधता हूँ ॥

शिक्षा—मनुष्यको अपने मनमें यह स्थिर कर लेना चाहिये कि मैं मृत्युका ब्रह्मचारी हूँ । मुझे मृत्युसे शिक्षा लेनी है जैसा कि महापुरुष मृत्युसे शिक्षा लेते रहे, अत एव उस मृत्युमें आचार्यदृष्टि कर अपने आपको या अपने शरीरको वेदाध्ययन, वेदानुकूलाचरण ब्रह्मचर्य, पुरुषार्थ और कौपीनसे दृढ़व्रती बनाकर संसारयात्रा करनी चाहिये ॥

इस मन्त्रमें नियमन करनेके अर्थमें यम शब्द आया है ॥

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय ।
स्वाहा घर्मः पित्रे ॥ यजु० ३८ । ९

(अङ्गिरस्वते पितृमते यमाय स्वाहा) विद्युदादिविद्या यस्मिन् विद्यते तस्मै पालकज्ञानिजनवते न्यायाधीशाय स्वाहा सत्करणम् (घर्माय स्वाहा) यज्ञाय स्वाहा सदनुष्ठानम् (घर्मः पित्रे स्वाहा) यज्ञः पितृनिमित्तेऽस्तु, एवं स्वाहाऽतश्च त्वां स्वीकरोमि । इति दयानन्दः । आधिदैविकश्चार्थः शतपथे ४ । २ । २ । ११ ॥

भावार्थ—(अङ्गिरस्वते पितृमते यमाय स्वाहा) विद्युत् आदि विद्या-

सम्पन्न और पालक ज्ञानीजन जिसके साथ हैं या पास हैं ऐसे न्यायाधीशका सत्कार करना चाहिये (घर्माय स्वाहा) यज्ञके लिये सदनुष्ठान करना चाहिये (घर्मः पित्रे स्वाहा) यज्ञ पालक ज्ञानी विद्वान् के लिये हो अतः तुझ विद्वान् को मैं स्वीकार करता हूँ ॥

शिक्षा—जिस न्यायाधीश राजाके यहां विद्युत् आदि पदार्थों की विद्याओं को जानने वाले और अच्छे राष्ट्रपालकजन हों उस राजा का सदा सत्कार करना चाहिये तथा विद्वान् धार्मिक पालक महानुभावका भी सत्कार करना चाहिये ॥

इस मन्त्रमें न्यायाधीश राजाके लिये यम शब्द आया है तथा आधिदैविक दृष्टिसे वायुके अर्थमें यम है ॥

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।
देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशस्पाहि
अर्चिरसि शोचिरसि तपोऽसि ॥ यजु० ३७ । ११

(सविता देवो मखाय यमाय त्वा सूर्यस्य त्वा तपसे त्वा पृथिव्यास्त्वा मध्वाऽनक्तु संस्पृशः पाहि-अर्चिरसि शोचिरसि तपोऽसि त्वा) ऐश्वर्यकर्ता दाता नियमाय न्यायानुष्ठानाद्याचरणाय त्वां प्रेरकस्येश्वरस्य त्वां धर्मानुष्ठानाय त्वां भूमेस्त्वां मधुरेण संयुनक्तु सम्यक् स्पर्शात् पाहि प्रदीप्तिरसि पवित्रोऽसि श्रमकर्ताऽसि त्वां सत्कुर्याम् । इति दयानन्दः ॥

भाषार्थ—(सविता देवो मखाय यमाय त्वा) ऐश्वर्यकर्ता दाता नियम और न्यायानुष्ठानाचरणके लिये तुझको (सूर्यस्य त्वा तपसे त्वा पृथिव्यास्त्वा) प्रेरक ईश्वर प्रतिपादित धर्मानुष्ठानके लिये तुझको भूमिके सम्बन्धमें (मध्वाऽनक्तु संस्पृशः पाहि) मधुरतासे संयुक्त करे उसके सम्यक् स्पर्शसे तू अपनी रक्षा कर (अर्चिरसि शोचिरसि तपोऽसि त्वा) प्रदीप्ति है, पवित्र है, श्रम करने वाला है इस प्रकार तेरा हम सत्कार करते हैं ॥

शिक्षा—मनुष्यको सूर्य, आतप, पृथिवी, दीप्ति आदिका उपयोग करने के लिये यज्ञका अनुष्ठान करना चाहिये ॥

इस मन्त्रमें नियमके अर्थमें यम शब्द आया है ॥

·······आप्यायमानो यमः सूयमानः ॥ यजु० ८ । ५७

(सूयमान आप्यायमानो यमः) उत्पद्यमानो वृद्ध इव यच्छति स्वयं सूर्यः। इति दयानन्दः ॥

भाषार्थ—(सूयमान आप्यायमानो यमः) उत्पन्न होता हुआ बढ़ता हुआ सूर्य ॥

शिक्षा—मनुष्योंको उदय होते हुए प्रकाश से बढ़ते हुए सूर्य का सेवन करना चाहिये ॥

इस मन्त्रमें सूर्यके लिये यम शब्द आया है ॥ इति ॥

॥ समाप्तोऽयं ग्रन्थः ॥

२२—१०—१९३२ ई० }

भवदीय—

प्रियरत्न आर्ष

इस ग्रन्थ में आए हुए प्रधान मन्त्रों की

अनुक्रमणिका

विक्रयार्थ

पुस्तकों की सूची

सं०	नाम पुस्तक	मूल्य	सं०	नाम पुस्तक	मूल्य
(१)	शताब्दी वृत्तान्त	१।)	(२३)	वेदविरुद्धमत खण्डन	=)॥
(२)	Voice of Arya Varta.	॥)	(२४)	ऋग्वेदादिभाष्यभूमिका	१॥)
(३)	संस्कृत सत्यार्थप्रकाश सजिल्द	२॥)	(२५)	संस्कारविधि	॥)
	,, ,, अजिल्द	२।)	(२६)	स्वीकारपत्रम्	)॥
(४)	पर्वपद्धति	।॥)	(२७)	पञ्चमहायज्ञविधि	—)॥
(५)	आर्यसमाज क्या है ?	।॥)	(२८)	सत्यधर्मविचार	—)॥
(६)	दश नियम व्याख्या	।)	(२९)	काशीशास्त्रार्थ	—)
(७)	ओम्प्रत्यक्ष	।॥)	(३०)	आर्य्याभिविनय	।—)
(८)	Truth & Vedas.	॥)	(३१)	आर्योद्देश्यरत्नमाला	)॥
(९)	Truth Bed Rocks of Aryan Culture.	॥=)	(३२)	ऋषि दयानन्द के मन्तव्यों पर तुलनात्मक विचार	॥)
(१०)	Crucifixion by an Eye witness.	।=)	(३३)	भारतमाता का सन्देश	॥)
(११)	Vedic Teachings.	१।॥)	(३४)	बङ्गला अनुवाद आर्यसमाज	।)
(१२)	वैदिक सिद्धान्त सजिल्द	१॥)	(३५)	वैदिकसन्ध्यारहस्य	—)॥
	,, ,, अजिल्द	१।)	(३६)	वैदिक विवाहादर्श	१।)
(१३)	विरजानन्द (विजय पद्यमय)	।)	(३७)	शुद्ध बालमनुस्मृति	।—)
(१४)	दयानन्द लहरी	—)॥	(३८)	वर्णव्यवस्था	—)
(१५)	प्राणायाम विधि	—)	(३९)	कुमुदिनीचन्द्र	२)
(१६)	महर्षि जीवन चरित्र	।)	(४०)	जातीयता	।=)
(१७)	दयानन्द ग्रन्थमाला	५)	(४१)	आरोग्यदिग्दर्शन	।=)
(१८)	व्यवहारभानु	=)॥	(४२)	हिन्दूमुसलिम इत्तिहाद (उर्दू)	।)
(१९)	भ्रमोच्छेदन	—)	(४३)	इज़हारे हकीक़त	१।)
(२०)	भ्रान्ति निवारणम्	=)	(४३)	कठोपनिषद (श्री नारायण स्वामीजी कृत टीका)	=)
(२१)	शिक्षा पत्री	=)	(४५)	वेदमें असित शब्दपर एकदृष्टि	—)।
(२२)	गोकरुणानिधि	=)		,, २५ प्रतिका	१।)

पुस्तक मिलने का पता—

प्रबन्धक 'सार्वदेशिक' कार्यालय, देहली ।

[illegible] (३८) वर्णव्यवस्था =)

(१४)	दयानन्द लहरी	—)॥	(३६)	कुमुदिनीचन्द्र	२)
(१५)	प्राणायाम विधि	—)	(४०)	जातीयता	।=)
(१६)	महर्षि जीवन चरित्र	।)	(४१)	आरोग्यदिग्दर्शन	।=)
(१७)	दयानन्द ग्रन्थमाला	५)	(४२)	हिन्दूमुसलिम इत्तिहाद (उर्दू)	।)
(१८)	व्यवहारभानु	=)॥	(४३)	इजहारे हकीक़त	१।)
(१६)	भ्रमोच्छेदन	—)	(४४)	कठोपनिषद (श्री नारायण स्वामीजी कृत टीका)	=)
(२०)	भ्रान्ति निवारणम्	=)			
(२१)	शिक्षा पत्री	=)	(४५)	वेदमें असित शब्दपर एकदृष्टि	—)।
(२२)	गोकरुणानिधि	=)		,, २५ प्रतिका	१।)

पुस्तक मिलने का पता—

प्रबन्धक 'सार्वदेशिक' कार्यालय, देहली ।

वेद में असित शब्द

पर

एक दृष्टि

यह वह पुस्तक है जिसमें ऋषि दयानन्द के किये हुए असित शब्द के बन्धनरहित अर्थ को युक्ति और प्रमाणों से ठीक सिद्ध किया है अपितु मनसा परिक्रमा मन्त्रों में छहों असित आदि शब्दों का वैज्ञानिक समन्वय किया गया है तथा अन्य सामयिक विद्वानों के अन्यथा वर्णन की समालोचना भी की गई है और यह बात भी सुस्पष्ट की है कि मनसा परिक्रमा के मन्त्रों में असित आदि शब्दों के सांप अर्थ कदापि नहीं हो सकते। यह पुस्तक श्री० पं० प्रियरत्न जी आर्ष ने लिखी है। इस पुस्तक पर श्री० महात्मा नारायण स्वामी जी, श्री० महात्मा हंसराज जी, श्री० पं० देवशर्मा जी आचार्य गुरुकुल कांगड़ी, श्री० पं० आत्माराम जी राज्यरत्न (अमृतसर) श्री० पं० गंगाप्रसाद जी चीफ जज टेहरी आदि विद्वानों की अत्युत्तम सम्मतियां आई हैं। पुस्तक अत्युपयोगी संग्रह के योग्य तथा सिद्धान्त रक्षा की दृष्टि से बांटने योग्य है मूल्य -)।, २५ प्रति १।)

क्रान्ति और शान्ति

यह पुस्तक भी श्री० पं० प्रियरत्न जी आर्ष ने लिखी है इसमें मनुष्य जीवन की छः प्रकार की क्रान्तियों और अभ्यास मार्ग की अद्भुत प्राचीन पद्धति का प्रतिपादन अनुसन्धान पूर्वक किया है तथा इस पर श्री० पूज्य महात्मा नारायण स्वामी जी की भूमिका भी है शीघ्र छपने वाली है।

मैनेजर—

सार्वदेशिक पुस्तकालय

श्रद्धानन्द बलिदान भवन, देहली।

भदावर प्रेस, ईश्वर भवन, देहली।